सर्वेषामेव भूतानां परलोकसमागमे ॥
प्रेतभावगतानां तु रौरवादिषु वर्तताम् ।
पञ्चभिः पञ्चभिस्त्वेभिः पात्रैरञ्जलिभिस्तथा ॥
एकादशैवेन्द्रियाणि पूर्यन्ते शास्त्रदर्शनात् ।

इति ब्राह्मे सपात्राञ्जलीनामिन्द्रियपूरकत्वाभिधानाच्चापूर्वतोयाञ्जलीनां च तापोपशान्त्यर्थत्वात्। अत्रास्वरसं सूचयन्नाह-*दि-

थिलाः। स एवेत्युक्तेः सपिण्डेन दशपिण्डे प्रक्रान्ते पुत्रागमेऽपि स न दद्यात्, *'असगोत्रः सगोत्रो वा' इति प्रागुक्तेः। *दाहकर्तैव दशाहं कुर्यादिति मिताक्षरायावसेति। रात्रिमृतौ त्ववयवकरणपिण्डमपवादः। *असगोत्र इति। यः सन्निकृष्टासन्निधानात् प्रथमेऽहनि दद्यात् स मध्ये सन्निकृष्टासन्निधानेऽपि दद्यात् नान्य इत्यर्थः। यत्तु—

स्वगृहे विद्यते पुत्रः पिता ग्रामान्तरे मृतः।
केनापि तत्र चारब्धमग्निपिण्डोदकादिकम्॥
पुत्रः संचयनात् प्राक् चेद् गच्छेदूर्ध्वं स आचरेत्।
स्वगृहे तत्र वा सर्वं प्रेतकार्यं सपिण्डनम्॥

इति मैत्रायणीयपरिशिष्टोक्तेः कथं कर्तृनियम इति? तन्न, तस्य निर्मूलत्वात्। यद्वा कर्ता चेत् पुत्रेण प्रतिषिद्धः सन् दशाहकर्म त्यजति तदा पुत्रो दशाहमावर्तयेत्। पुत्रश्चेदगच्छेत्तदा सञ्चयनात् प्रागूर्ध्वं च स आचरेदित्यर्थः। सञ्चयनं यदि कृतं तदा पुत्रो न तदाचरेत्, अन्यथा तु तदपि। ननु—

भयस्थानेऽथवा मार्गे मृतस्तत्र च संस्कृतः।
न तिष्ठति जनस्तत्र तत्र पिण्डं च वर्जयेत्॥

इति वाक्यवेद्यदाहास्थिसञ्चयौ संस्कारौ यत्र कृतौ तत्र भयादिना स्थातुमशक्तौ यत्र यत्र प्रेतकार्यकृद्गच्छेत्तत्रैव पिण्डोदकदानादि सपिण्डान्तं कुर्यादित्यापत्तिरितिचेत्? न, दशाहक्रियादेशस्य दाहास्थिसञ्चयदेशबाधेऽपि भेदाऽयोगात्। यदि पित्रोर्दशाहं कुर्वन् पुत्रो रोगेणान्येन वा केनचित्प्रतिबन्धेन समापयितुमशक्तः तदा तत्पुत्रः पितामहस्य दशाहमावर्तयेत्। तस्य पुत्रान्तरसत्त्वे तु स एव। दत्तकसत्त्वे यथामतं स वा पौत्रो वा। मातुः पक्षिणीमध्ये मातृक्रिया कार्या, द्व्यहत्र्यहवृद्धौ त्र्यहाशौचवत्। *दाहकर्तैवेति। पुत्राद्यसन्निधानेऽन्येन दाहे कृते प्रथमपिण्डो-

म् । शुद्धितत्त्वे वायवीयेऽपि—

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि ॥ इति ।

तत्रैव—

*पूरकेण तु पिण्डेन देहो निष्पद्यते यतः ।
कृतस्य करणायोगात् पुनर्नावर्तयेत् क्रियाम् ॥

शुद्धिप्रकाशे वायवीयेऽपि—

निवर्तयति यो मोहात् क्रियामन्यनिवर्तिताम् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥
तस्मात् प्रेतक्रिया येन केनापि च कृता यदि ।
न तां निवर्तयेत्प्राज्ञः सतां धर्ममनुस्मरन् ॥ इति ।

आदिपुराणे—

पितृशब्दं स्वधां चैव न प्रयुञ्जीत कर्हिचित् ।
*अनुशब्दं तथा चेह प्रयत्नेन विवर्जयेत् ॥
उपतिष्ठतामयं पिण्डः प्रेतायेति समुच्चरेत् ।

क्रियानिबन्धे व्यासः—

प्रेताय पिण्डं दत्त्वा तु ततोऽग्नीयादिनात्यये ॥

भविष्ये—

ओदनामिषसक्तूनां शाकमूलफलादिषु ।
प्रथमेऽहनि यद्दत्तद्दद्याद्दुत्तरेऽहनि ॥
गृहद्वारे श्मशाने वा तीर्थे देवगृहेपि वा ।
यत्राद्ये दीयते पिण्डस्तत्र सर्वं (१)समाचरेत् ॥

प्रक्रमात्पूर्वं पित्राद्यागमनेऽपि दाहकर्तृभिन्नतया निषेधात्कथञ्चिद्-ग्धुर्विपर्यासे क्रियामात्रावृत्तिर्वाचनिकत्वात् । *पूरकेण त्विति । आद्यपिण्डानन्तरं पुत्राद्यागमे देहस्य प्रारब्धत्वात्तन्निष्पत्तावेव यते-

---

(१) 'समापयेत्' ग० ।

ब्राह्मे—

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकाश्च समासतः ॥
गलांसभुजवक्षांसि तृतीयेन यथाक्रमम् ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
जानू जङ्घे तथा पादौ पञ्चमेन तु सर्वदा ।
सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ॥
दन्तलोमान्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥ इति ।

याज्ञवल्क्येन तु—

*पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ।

इत्युक्तम् । अत्र फलतारतम्यं ज्ञेयमिति विज्ञानेश्वरः । तेन त्र्यहाशौचपरत्वं देवयाज्ञिकोक्तं चिन्त्यम् ।

आशौचस्य च ह्रासेपि पिण्डान्दद्याद्दशैव तु ।

इति वचनाच्च । दिनत्रयावश्यकत्वार्थमिति हारलतादयः ।

शातातपः—

जलमेकाह*माकाशे स्थाप्यं क्षीरं च मृन्मये ।

पारस्करः—"मृन्मये तां रात्रिं क्षीरोदके विहायसि

तेत्यर्थः । *अनुशब्दं ये च त्वामत्रान्विति । *पिण्डयज्ञावृतेति । पितृयज्ञवत् आवृत् अनुष्ठानप्रकारः तथा प्राचीनावीतित्वादिना दिनत्रयं प्रेतायान्नं क्षितौ दद्यादित्यर्थः । पितृयज्ञप्रकारोक्तावपि स्वधाशब्दादिनिषेधः पूर्वोक्तः । *आकाश इति । शिक्यादौ द्रव्यद्वयविधानसामर्थ्याद्वयोः शरावयोर्भेदेन विधानम् । 'मृन्मये' इति एकवचनादेकत्रैवोभयविधानमिति तु न युक्तम्,

पृथक्शरावयोर्दद्यादेकाहं क्षीरमम्बु च ।

निदध्युः, *प्रेतात्र स्नाहीत्युदकं, पिब चेदमिति क्षीरम्" ।
इदं रात्रावेवेति गौडाः । गारुडे तु—

अपक्के मृन्मये पात्रे दुग्धं दद्यादिनत्रयम् ।

इत्युक्तम् । हेमाद्रौ पाद्मे तु दशाहमुक्तम्—

*तस्मान्निधेयमाकाशे दशरात्रं पयो जलम् ।
सर्वतापोपशान्त्यर्थमध्वश्रमविनाशनम् ॥

देवजानीये कारिकायाम्—

तत्र प्रेतोपकृतये दशरात्रमखण्डितम् ।
कुर्यात्प्रदीपं तैलेन वारिपात्रं च मार्तिकम् ॥
भोज्याद्भोजनकाले तु भक्तमुष्टिं च निर्वपेत् ।
नामगोत्रेण सम्बुद्ध्या धरित्र्यां पितृयज्ञवत् ॥

शातातपः—

भूलोकात्प्रेतलोकं तु गन्तुं श्राद्धं समाचरेत् ।
तत्पाथेयं हि भवति मृतस्य मनुजस्य तु ॥

अथ दशाहमध्ये दर्शपाते निर्णयः । भविष्ये—

प्रवृताशौचतन्त्रस्तु यदि दर्शं प्रपद्यते ।
समाप्य चोदकं पिण्डान् *स्नानमात्रं समाचरेत् ॥

ऋष्यशृङ्गः—

आशौचमन्तरा दर्शो यदि स्यात्सर्ववर्णिनाम् ।
समाप्तिं प्रेततन्त्रस्य कुर्यादित्याह गौतमः ॥

पैठीनसिः—

आद्येन्दावेव कर्तव्या प्रेतपिण्डोदकक्रिया ।
द्विरैन्दवे तु कुर्वाणः पुनः शावं समश्नुते ॥

इति गारुडात् । निधानभेदेन मन्त्रभेदमप्याह—*प्रेतात्रेति । *तस्मादिति ।

तस्मात्प्रेतपुरं प्रेतो द्वादशेऽहनि नीयते ।
गृहं पुत्रकलत्रं च द्वादशाहं स पश्यति ॥

मातापित्रोस्तु श्लोकगौतमः—

अन्तर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत् ।
पित्रोस्तु यावदाशौचं दद्यात्पिण्डान् जलाञ्जलीन् ॥

इदमपि त्र्यहमध्ये दर्शपाते । तदूर्ध्वं दर्शे तु पित्रोरपि तन्त्रं समाप्यमेव,

पित्रोराशौचमध्ये तु यदि दर्शः समापतेत् ।
तावदेवोत्तरं तन्त्रं पर्यवस्येत त्र्यहात्परम् ॥

इति गालवोक्तेः । अन्येषां तु त्र्यहमध्येपि समाप्तिरिति पराशरमाधवीये निर्णयामृते चोक्तम् । कालादर्शेपि—

दर्शो दशाहमध्ये स्यादूर्ध्वं तन्त्रं समापयेत् ।
त्रिरात्रादुत्तरं पित्रोर्मृताविति विनिश्चयः ॥

मदनपारिजाते तु गालवीयमा*पदनौरसपुत्रादिविषयम् । 'त्र्यहोर्ध्वमपि पित्रोर्न तन्त्रसमाप्तिः' इत्युक्तम् । मदनरत्नेप्येवम् । *मम तु देशाचाराद्व्यवस्थेति प्रतिभाति ।

अथास्थिसंचयः । तत्राश्वलायनेन च कृष्णपक्षे *एकादशीत्रयोदशीदर्शेषु *आषाढाफल्गुनीप्रोष्ठपदाभिन्नर्क्षे उक्तम्, तदाशौचमध्येऽसंभवे तदूर्ध्वं च प्राग-

---

इति पूर्वश्लोकः । *स्नानमात्रं प्राक्पादिकं । *आपादिति । अत्र गौतमीयस्यापदनौरसपुत्रादिपरतया च वैपरीत्यमपि सुवचमित्यस्वरसः । *मम त्विति । इदमापाततः, अत्रोर्ध्वपित्रोस्तन्त्रसमाप्तौ धार्मिकाणां माधवादिनां प्रामाण्यात् ।

"सञ्चयनमूर्ध्वं दशम्याः कृष्णपक्षस्यायुजास्वेके" इत्यस्य "नक्षत्रे" इत्यस्य कृष्णपक्षसम्बन्धिदशम्युत्तरास्वित्यर्थं दर्शयति—*एकादशीति । एकनक्षत्रे इत्यस्यार्थमाह—*आषाढेति ।

दा*त्करणे ज्ञेयम् । आशौचमध्ये तु मदनरत्ने संवर्तः—

*प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ।
अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह ॥

छन्दोगपरिशिष्टे तु—

अपरेद्युस्तृतीये वा अस्थिसंचयनं भवेत् ।

इति द्वितीयेप्युक्तम् । विष्णुकात्यायनौ-'संचयनं चतुर्थ्याम्' इति । माधवीये यमः—

भौमार्कमन्दवारेषु तिथियुग्मे विवर्जयेत् ।
वर्जयेदेकपादर्क्षे द्विपादर्क्षेऽस्थिसंचयम् ॥
प्रदातृजन्मनक्षत्रे त्रिपादर्क्षे विशेषतः ।

ब्राह्मे—

चतुर्थे ब्राह्मणानां तु पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात्परम् ॥

दशमेऽहनीति वा पाठः । शौनकः—

पलाशेष्वस्थिदाहे च सद्यःसंचयनं भवेत् ॥

---

*करणे । सपिण्डीकरणे । *प्रथमेन्हीति ।

अनग्निमत उत्क्राते साग्नेः संस्कारकर्मणः ॥
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथाविधि ।

इत्याङ्गिरसा दिनं गणितम् । वर्णविशेषेण कालव्यवस्थापक्षमाह ब्राह्मे—

कचित्तृतीये विप्रस्य चतुर्थे क्षत्रियस्य च ।
पञ्चमे वैश्यजातेश्च शूद्रस्य दशमेऽहनि ॥
अस्थ्नां च सञ्चयः प्रेते क्रियते देशगौरवात् ॥ इति ।

अत्र—

चतुर्थे ब्राह्मणां तु पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात् परम् ॥

काम्यमरणे तु—

तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः ।

इत्युक्तम् । अङ्गिराः—

*प्रेतीभूतं तथोद्दिश्य यः शुचिर्न करोति चेत् ।
देवतानां तु यजनं तं शपन्त्यथ *देवताः ॥

तद्विधिः स्वस्वसूत्रे भट्टकृतौ च ज्ञेयः ।

हेमाद्रौ नागरखण्डे—

त्रीणि सञ्चयनस्यार्थे तानि वै शृणु साम्प्रतम् ।
यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् ॥
एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ।
ततः संचयनस्यार्थे तृतीयं श्राद्धमिष्यते ॥

अपरार्के मदनरत्ने च ब्राह्मे—

सद्यःशौचे तथैकाहे सद्यःसंचयनं भवेत् ।
त्र्यहाशौचे तृतीयेऽह्नि कर्तव्यस्त्वस्थिसञ्चयः ॥

*तत्रैव—

*श्मशानदेवतायागं चतुर्थे दिवसे चरेत् ।
मृन्मयेषु च भाण्डेषु कुम्भेषु रुचकेषु वा ॥
सुपक्वैर्भक्ष्यभोज्यैश्च पायसैः पानकैस्तथा ।
फलैर्मूलैर्बलोत्थैश्च पूज्याः कव्याददेवताः ॥

इति तु प्रमादपाठ इत्यग्रे स्फुटम् । द्वादशाहे सपिण्डने आशौचमध्य एव सञ्चयनं, "तदुत्तरं श्राद्धं चास्मै दद्युः" इत्येकोद्दिष्टविधानात् सपिण्डनानन्तरं तन्निषेधात् । *प्रेतीभूतामिति ।

अस्थिसञ्चयने यागो देवानां परिकीर्तितः ।

इति पूर्वार्द्धम् । यागः पूजा । *देवता इति ।

श्मशानवासिनो देवाः शवानां परिकीर्तिताः ।

इत्युत्तरार्द्धम् । श्मशानदेवतापूजाप्रकारमाह—*तत्रैवेति । *श्मशानेति ।

धूपो दीपस्तथा माल्यमर्घ्यं देयं त्वरान्वितैः।
तत्र पात्राणि पूर्णानि श्मशानाग्नेः *समन्ततः॥
निवेदयद्भिर्वक्तव्यं तैः सर्वैरनहंकृतैः।
नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा॥
येऽत्र श्मशाने देवाः स्युर्भगवन्तः सनातनाः।
तेऽस्मत्सकाशाद्बलिमष्टाङ्गमक्षयम्॥
प्रेतस्यास्य शुभान् लोकान् प्रयच्छन्तु च शाश्वतान्।
अस्माकमायुरारोग्यं सुखं च ददतां चिरम्॥
एवं कृत्वा बलीन्सर्वान्क्षीरणाभ्युक्ष्य *वाग्यतैः।
एवं दत्वा बलिं चैव दद्यात्पिण्डत्रयं बुधः॥
एकं श्मशानवासिभ्यः प्रेतायैव तु मध्यमम्।
तृतीयं तत्सखिभ्यश्च दक्षिणासंस्थमादरात्।
ततो याज्ञियवृक्षोत्थां शाखामादाय *वाग्यतः।
प्रेतस्यास्थीनि गृह्णाति प्रधानाङ्गोद्भवानि च॥

स्नात्वा त्रिरात्रं कुर्वन्ति प्रेतायोदकतर्पणम्।
इति पूर्वार्द्धम्। *समन्तत इति।
कैश्चिद्देयानि सर्वाणि पानीयान्यक्षतानि च।
इत्युत्तरार्धम्। धूपैः इत्यारभ्य प्रत्येकं कैश्चिदित्यस्यान्वयादार्थक्रमेणार्थो युक्तः। पुष्पाणि मालाः धूपो दीपः तण्डुलादिपूर्णपात्राणि केषुचित्पात्रेषु प्रणीयानि यवाद्यक्षताश्चेति पूजाङ्गानि भिन्नभिन्नपुरुषैः खलेकपोतन्यायेन दातव्यानि। अत एव त्वरान्वितैः निवेदयद्भिरिति बहुत्वम्। भक्षभोज्यपायसपानकफलमूलात्मको बलिः, प्रधानभक्ष्यादीनां पूजाकरणत्वोक्तेः। *वाग्यतैरिति।
विसर्जनं च देवानां कर्तव्यं च समाहितैः।
इत्युत्तरार्धम्। *वाग्यत इति॥
अपसव्यं क्रमाद्वस्त्रं कृत्वा काश्चित्सगोत्रजः।

*शिरसो वक्षसः पाण्योः पार्श्वाभ्यां चैव पादतः ।
पञ्चगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च ॥
प्रक्षिप्य मृन्मये भाण्डे नवे साच्छादने शुभे ।
अरण्ये वृक्षमूले वा शुद्धे संस्थापयत्यपि ॥
गृहीत्वाऽस्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ।
ततः संमार्जनं भूमेः कर्तव्यं गोमयाम्बुभिः ।
पूजां च पुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमात् ॥ इति ।

अथ तीर्थेऽस्थिक्षेपविधिः । तत्रैव—

*तत्स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले ।
कश्चित्त्यजति सत्पुत्रो दौहित्रो वा सहोदरः ॥
मातृकुलं पितृकुलं वर्जयित्वा *नराधमः ।
अस्थीन्यन्यकुलस्थस्य नीत्वा चान्द्रायणं चरेत् ॥

तत्रैव ब्रह्माण्डपुराणे—

अस्थीनि मातापितृपूर्वजानां नयन्ति गङ्गामपि ये कथंचित् ।
सद्बान्धवस्यापि दयाभिभूतास्तेषां तु तीर्थानि फलप्रदानि ॥
*स्नात्वा ततः पञ्चगव्येन सिक्त्वा

इत्युत्तरार्धम् । प्रधानाङ्गान्याह—*शिरस इति ।

अप्रदक्षिणमस्थीनि गृह्णातीत्यादिगोभिलः ।

इत्युत्तरार्धम् । गर्ते इति पाठः । तोये इति पाठे वर्षाकालादन्यत्रेति बोध्यम् ।

भूमेराच्छादनार्थं च वृक्षः पुष्करकोऽपि वा ।
पादिको वा प्रकर्तव्यः तत्र सर्वैर्विधानतः ॥

इति ग्रन्थान्तरे । पुष्करः पुष्करिणी । पादिकः चत्वरः । संचितास्थिप्रतिपत्तिमाह—*तत्स्थानादिति । वैधनिखातस्थानादित्यर्थः । *नराधम इति । भ्रातृग्रहणे । अत एव सद्बान्धवस्यापीति अपिना तादितरस्यापि समुच्चयात् । सत्त्वं चेह स्वाचारशा-

हिरण्यमध्वाज्यतिलैश्च योज्य ।
ततस्तु मृत्पिण्डपुटे निधाय
पश्यन् दिशं प्रेतगणोपरूढाम् ॥
नमोस्तु धर्माय वदेत्प्रविश्य
जलं स मे प्रीत इति क्षिपेच्च ।
*उत्थाय भास्वन्तमवेक्ष्य सूर्यं
स दक्षिणां विप्रमुखाय दद्यात् ॥
एवं कृते प्रेतपुरःस्थितस्य ।
*स्वर्गे गतिः स्यात्तु महेन्द्रतुल्या ॥

यमः—

गङ्गातोयेषु यस्यास्थि क्षिप्यते शुभकर्मणः ।
न तस्य पुनरावृत्ति*र्ब्रह्मलोकात्सनातनात् ॥

तथा—

*अस्तं गते गुरौ शुक्रे तथा मासे मलिम्लुचे ।
गङ्गायामस्थिनिक्षेपं न कुर्यादिति गौतमः ॥

लित्वमबान्धवेऽपि । *स्नात्वेति । तीर्थपात्रप्रक्षेपे । *उत्थायेति ।

स्नात्वा तथोत्तीर्य दिवाकरं च दृष्ट्वा प्रदद्यादथ दक्षिणं तु ।

इति सेतुः । *स्वर्गे इति । अन्यत्रापि—

यस्मिन् काले नृणामास्थि गङ्गायां क्षिप्यते नृभिः ।
तं कालमादितः कृत्वा स्वर्गलोके भवेत् स्थितिः ॥ इति ॥

अत्रोत्तरावध्यसत्त्वात्कल्पांतोऽवधिः । *ब्रह्मेति । प्रयागादि-क्षेत्रविशेषे ब्रह्मलोकः अन्यथा स्वर्गः ।

भविष्ये—

कावेरी तुङ्गभद्रा च कृष्णवेणी च गौतमी ।
जान्हवी चेति विख्याताः पञ्च गङ्गाः प्रकीर्तिताः ॥

इत्युक्तम् । *अस्तं गते इति । प्रथमाद्ये न निषेध इति

*दशाहान्तर्न दोषः,

दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति ।
गङ्गायां मरणे यादृक् तादृक् फलमवाप्नुयात् ॥

इति मदनरत्ने वृद्धमनूक्तेः ।

शौनकः—

शौनकोऽहं प्रवक्ष्यामि अस्थिक्षेपविधिं क्रमात् ।
आदौ ग्रामाद्बहिर्गत्वा स्नानं कुर्यात्सचैलकम् ॥
प्रोक्षयेत्पञ्चगव्येन भुवं मन्त्रैर्विचक्षणः ।

*गायत्र्याद्यैः पञ्चगव्यमन्त्रैर्निखातास्थि भूमिं प्रोक्षेदित्यर्थः ।

उपसर्पादिभिर्मन्त्रैः प्रार्थनं खननं तथा ।
मृत्तिकोद्धरणं चास्थ्नां ग्रहणं च यथाक्रमम् ।

उपसर्पेति चतुर्भिर्मन्त्रैः क्रमेण प्रार्थनादि ज्ञेयम् ।

*स्नात्वाऽस्थिशुद्धिं कुर्वीत *एतोन्विन्द्रेति सूक्ततः ।
स्पृष्ट्वा स्पृष्ट्वा ततः स्नानं पञ्चगव्येन शुध्यति ॥
*दश स्नानानि कुर्वीत *तत्तन्मन्त्रैर्विचक्षणः ।

वक्ष्यति । *दशाहत इति गङ्गारहितग्राममृतस्य तु गङ्गातीरे दाहसम्भवे तत्र शवो नेयः । तदनयने तु पिण्डदानादिकमारभ्य प्रक्षेपः । दशाहमध्ये गङ्गाप्राप्त्यसंभवे तु सपिण्डनोत्तरमेव, आरब्धप्रेतकर्मणो देशैक्यनियमात् । द्वादशाहोत्तरसपिण्डने त्वेकादशाहोत्तरमपि । *गायत्र्याद्यैरिति । आदिना गन्धद्वाराम् आप्यायस्व दधिक्राव्णः घृतं मिमि इति ग्रहः । गोमूत्रगोमयपयोदधिसर्पींषि पञ्चगव्यम् । सेतौ तु पयोदधिगोमूत्रगोमयसर्पींषि तत्तन्मन्त्रैरुक्तानि । *स्नात्वेति । जलाशयेऽस्थिसहित इत्यादिः ।

ततो जलाशयं गत्वा स्नानं कुर्याद्यथाविधि ।

इति सेतौ वचनात् । *एतोन्विति । एतोन्विन्द्रेति सूक्तेन स्पृष्ट्वा पञ्चगव्येन स्पृष्ट्वा प्रक्षाल्य शुध्यति ततः शुद्धोदकेन स्नापयेदित्यर्थः । *दशेति । सास्थिरित्यादि । *तत्तन्मन्त्रैः । गा-

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
भस्म मृन्मधु वारीणि मन्त्रतस्तानि वै दश ॥
कुशैः संमार्जयेदस्थीन्यतोदेवेति मन्त्रतः ।
*एतोन्विन्द्रं शुचीवेति नतमंह इतीति च ॥
पावमानीर्ममाग्ने च रुद्रसूक्तं यथाक्रमम् ॥
*एतैः कुशैर्मार्जनम् ।
हेमश्राद्धं ततः कुर्या*त्पितॄनुद्दिश्य यत्नतः ।
पिण्डदानं प्रकुर्वीत ततश्च तिलतर्पणम् ॥
अस्थिचेपाङ्गं चेदम् ।
*अजिनं कम्बला दर्भा गोकेशाः शाण एव च ।

यद्या गोमूत्रम् , गन्धद्वारामिति गोमयम् , आप्यायस्वेति पयः दधिक्राव्ण इति दधि, घृतं मिमिक्षे इति घृतम्, आपोहिष्ठेति कुशोदकम् । देवस्य त्वेति केचित् । मानस्तोके इति भस्म, "बळित्था पर्वतानाम्" इति अश्वक्रांते इत्यादिभिर्वा मृत्, मधुवातेति मधु आपोहिष्ठेति कुशोदकम् । *एतोन्विन्द्रमिति । एतोन्विन्द्रमिति तृचं शुचीवोहव्येति तृचं नतमंह इति अष्टर्चम् "इति मे मन" इति त्रयोदशर्चं यदन्ति यश्चेति तृचं ममाग्ने वर्च इति नवर्चं कद्रुद्रायेति नवर्चं च सूक्तम् । मन्त्रत इति विशेषोक्त्याऽतोदेवेत्यत्रैव सूक्तसम्बन्धाभावात् । *एतैरिति । प्रतिमन्त्र इति यावत् । *पितॄनिति । यदस्थीनि तदैवत्यम् । कृते सापिण्डने पार्वणं पुरूरवार्द्रवौ विश्वेदेवाः । सक्तुभिः तण्डुलेन वाऽग्नौकरणं, सक्तुभिः पायसेन वा पिण्डदानम् । अकृते सपिण्डने त्वेकोद्दिष्टम् । नमो वः पितर इति मन्त्रे इषेपदस्थाने हेम्ने इत्यूहः । स्मृत्युक्तप्रकारे तु "उशन्तस्त्वा" इत्यादिमन्त्रेष्वपि ऊहः । श्राद्धांते यदैवत्यं श्राद्धं तदैवत्यं तिलतर्पणम् । यक्षकर्दमादिलेपः पुष्पैः पूजा च । *अजिनमिति ।

भूर्जपत्रं ताडपत्रं सप्तधा वेष्टनं स्मृतम् ॥
हेमं च मौक्तिकं रौप्यं प्रवालं नीलकं तथा ।
निक्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा ॥
ततो होमं प्रकुर्वीत तिलाज्येन विचक्षणः ।
*उदीरतेति सूक्तेन हुनेदष्टोत्तरं शतम् ॥
ततो गत्वा क्षिपेत्तीर्थे स्पर्शदोषो न विद्यते ।
मूत्रं पुरीषाचमनं कुर्वन्नास्थीनि धारयेत् ॥

अत्र दशदानं वैतरणीऋणमोक्षपापघेनुदानमुक्तम् । दिवोदासीये काशीखण्डे—

धनञ्जयोऽपि धर्मात्मा मातृभक्तिपरायणः ।
आदायास्थीन्यथो मातुर्गङ्गामार्गस्थितोऽभवत् ॥

अजिनं कम्बला दर्भा गोकेशा भूर्जपत्रकम् ।
ताडपत्रं च नेत्रं चेत्यस्थनां वेष्टनसप्तकम् ॥

इति पाठान्तरम् । *उदीरतेति । सूक्तग्रहणात्सूक्तस्याष्टोत्तरशतमावृत्तयः । एकमन्त्राणि कर्माणीति न्यायेन ऋगन्त एव होमः । होमसंख्याबाहुल्येऽपि यावद्वचनन्यायाददोष इत्येके । चतुर्दशऋगात्मकमुदीरतेति सूक्तं तस्य ऋगन्ते होमात्सप्तावृत्त्याऽष्टनवतिहोमान् संपाद्य पुनरुदितिमन्त्रैर्दशभिर्हुत्वाऽष्टोत्तरसंख्यापूर्तिः अवशिष्टमन्त्रचतुष्टयत्यागः । अत एवाग्निमुखं कृत्वा शताष्टकृत्व इति बौधायनसूत्रे शतंचाष्टचेति अष्टोत्तरशतं तत्पूरणाय षडर्चसूत्रस्याष्टादशावृत्तयः कार्याः । एवं चाग्निनं कपालमित्यादौ अतिदेशप्राप्तानां कपालोपधानमन्त्राणां बहुत्वेऽपि आद्यद्वितीयमन्त्राभ्यां कपाले उपधाय शेषमन्त्रलोपवदिति कौस्तुभे इत्यन्ये । होमशेषं समाप्य ताम्रसंपुटेऽस्थीनि निदध्यात् । ततः चण्डालपतितव्रात्योक्तशौचाचमने कृत्वा तानि गृह्णीयात् । ततस्तीर्थे साऽस्थि स्नात्वा पलाशपत्रपुटेऽस्थीनि निधाय अमुकगोत्रस्या-

पञ्चगव्येन संस्नाप्य तथा पञ्चामृतेन वै ।
यक्षकर्दमलेपेन लिप्त्वा पुष्पैः प्रपूज्य च ॥
आवेष्टय (१)तत्र वस्त्रेण ततः पट्टाम्बरेण च ।
ततः सुरसवस्त्रेण ततो माञ्जिष्ठवाससा ॥
नेपालकम्बलेनाथ मृदा चाथ विशुद्धया ।
ताम्रसंपुटके कृत्वा मातुरङ्कान्यथो वहत् ॥

व्यासः—

पट्टवस्त्रं च कौशेयं माञ्जिष्ठं श्वेतवस्त्रकम् ।
कम्बलं शाणपट्टं च अजिनं च तथोत्तरम् ॥

*एषां विकल्पः । अन्यश्चात्र विशेषस्त्रिस्थलीसेतौ दिवोदासीये च ज्ञेयः । संचयनोत्तरं श्राद्धमाहाश्वलायनः—'श्राद्धमस्मै दद्युः' इति । स्मृत्यर्थसा-

मुकशर्मणोऽपुनरावृत्तिब्रह्मलोकावाप्तये गङ्गायां मोक्षप्राप्तये तीर्थान्तरे अस्थिनिक्षेपं करिष्ये इति सङ्कल्प्यास्थीनि तूष्णीं पञ्चगव्येन प्रक्षाल्य शुद्धोदकेन स्नापयित्वा हिरण्यशकलमधुघृतातिलैर्मिश्रीकृत्य मृत्पेटिकायां संस्थाप्य दक्षिणतोऽवेक्ष्यमाणो नाभिमात्रजलस्थो नमोस्तु धर्मराजाय स मे प्रीतोस्त्विति मन्त्रेण निक्षिप्य जलाद्बहिरागत्य सूर्यं दृष्ट्वा नत्वा च हरिं स्मृत्वा यज्ञोपवीती अमुकगोत्रशर्मणः कृतास्थिनिक्षेपस्य साद्गुण्यायेदं रजतं पितृदैवत्यं चन्द्रदैवत्यं सम्प्रददे इति यथाशक्ति दक्षिणां ब्राह्मणाय दद्यात् । पितृकृत्यत्वाद्रजतम् । अस्थिग्रहणादि प्रक्षेपान्तं दक्षिणावर्तं प्राचीनावीती कुर्यात् । *एषामिति । वेष्टनसाधनानां वेष्टनक्रमाणां चेत्यर्थः । तीर्थमात्रेऽयं विधिः, प्रयागे तु अत्यावश्यकः । अस्थिक्षेपोत्तरमेव तीर्थविधिरिति दिवोदासः । अन्ये तु तीर्थकृत्यानन्तरमस्थिक्षेपः, तीर्थश्राद्धादौ विलम्बनिषेधात् 'आगन्तू-

(१) 'नेत्रवस्त्रेण' ग० ।

रे-'संचयने कृते म(१)नुष्यलोकात्प्रेतलोकं गच्छतः पाथेयश्राद्धमात्रेण कार्यमिति । अनुपनीतस्य न संचयनम्' ।

अथ नवश्राद्धम् । पृथ्वीचन्द्रोदयेऽङ्गिराः—

प्रथमेऽह्नि तृतीये च पञ्चमे सप्तमे तथा ।
नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥

शिवस्वामी—

नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः ।
आपस्तम्बाः षडित्याहु*र्विभाषा त्वितरेषु हि ॥

पञ्च एकादशाहिकं विना, *'मरणाद्विषमेषु दिनेष्वेकैकं नवश्राद्धं कुर्यादानवमात्, यदि नवमं विच्छिद्येतैकादशे तत्कुर्यात् ।' इति मदनरत्ने बौधायनोक्तेः । भविष्ये—

नव सप्त विशां राज्ञां नवश्राद्धान्यनुक्रमात् ।
आद्यन्तयोर्वर्णयोस्तु षडित्याहुर्महर्षयः ॥

हेमाद्रौ वृद्धवसिष्ठः-

*अलब्ध्वा तु नवश्राद्धं प्रेतत्वान्नैव मुच्यते ।

नामन्ते निवेशः' इति न्यायाच्चेत्याहुः । वस्तुतस्तु अस्थिप्रक्षेपफलोद्देशेन चेद्गतः तेनादौ स एव कार्यः, उद्देश्यकृतश्राद्धादिविलम्बस्य तच्छ्राद्धेनाभ्यनुज्ञातत्वात् । अत्र तीर्थनिमित्तकक्षौरादिकृत्यान्यपि पञ्चादेव । यस्तु तीर्थफलोद्देशेन गच्छन् अनुषङ्गादस्थीनि नयति स सकलतीर्थकृत्यानन्तरं तानि निक्षिपेदिति मयूखे । संक्षिप्तोऽस्थिनिक्षेपप्रयोगस्तत्रैव द्रष्टव्यः । *विभाषा त्वितरेषु हीति । विभाषामैतरेयिण इति रघुनाथपाठः । *मरणादिति नवश्राद्धानि पञ्च । नवमदिनकर्तव्यं तु तत्रासम्भवे एकादशे-

(१) 'मनुष्यलोकं गच्छतः' क० घ० ।

अर्वाक् तु द्वादशाहस्य लङ्घ्वा तरति दुष्कृतम् ॥
अतः षडेव। एतान्येव विषमश्राद्धानीत्युच्यन्ते। नागरखण्डे तु—

*पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा।
दशमैकादशे चैव नवश्राद्धानि तानि च ॥

इत्युक्तम्। कात्यायनस्तु—

चतुर्थे पञ्चमे चैव नवमैकादशे तथा।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥

प्रथमे सप्तमे चैवेत्याद्यपादे व्यासपाठः। बह्वृचानां तु—

*नवश्राद्धं दशाहानि नवमिश्रं तु षड्ऋतून्।

ऽन्हि कार्यमित्यर्थः। नवश्राद्धानां प्रेतत्वनिवर्तकतामाह-*अलब्ध्वेति। षट् पञ्च वा नवश्राद्धानि। अनयोः पक्षयोर्व्यवस्था च शिवस्वाम्युक्तैवेत्यन्ये। *पञ्चमे इति। त्रीणि सञ्चयनस्यार्थे इत्यादि प्रागुक्तश्राद्धत्रयसाहित्यमिह विवक्षितम्। तथाच नवत्वसंख्यालाभः। चतुर्थाहनवश्राद्धे त्वन्यदपि देयम्,

चतुर्थेऽहनि विप्रेभ्यो देयमन्नं हि बान्धवैः।
गावः सुवर्णं वित्तं च प्रेतमुद्दिश्य शक्तितः ॥
(?)यदीनृङ्नीवतश्चासीन्न दद्यात्तस्य यत्नतः।

इति बृहस्पत्युक्तेः। क्षत्रियादिभिस्तु पञ्चमादिषु,

चतुर्थे ब्राह्मणानां च पञ्चमेऽहनि भूभुजाम्।
नवमे वैश्यजातीनां शूद्राणां दशमात्परे।

इति ब्रह्माण्डात्। शय्यादिकं त्वेकादशाह एव। आत्रिणा त्वेकमेवोक्तम्—

नवश्राद्धानिमित्तं तु एकमेकादशेऽहनि। इति।

*नवश्राद्धमिति। नवश्राद्धं नवनवमिश्रपुराणभेदात्त्रिधा। प्रथमाद्येकादशाहान्तं नवम्। षड्ऋतूनमासिकानि न-

इत्युक्तं नारायणवृत्तौ । दीपिकायाम्-'अथ तनुयादाद्ये चतुर्थे दिने श्राद्धं पञ्चमसप्तमाष्टनवदिग्रुद्रेषु *युग्मद्विजैः' ।

*प्रथमेह्नि तृतीयेऽह्नि पञ्चसप्तनवस्वपि ।
द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषेष्वेकं तु विन्यसेत् ॥

एको विषमश्राद्धेऽवयवपिण्डश्चैक इति द्वाविंत्यर्थः ।

वामिश्रम् । 'षडुत्तरम्' इति पाठे नवश्राद्धानामुत्तरत्र उपरि कर्तव्यमित्यर्थः ।

अतः परं पुराणं च त्रिविधं श्राद्धमुच्यते ।

इत्युत्तरात्प्रत्याब्दिकात्तृतीयमित्यर्थः । संज्ञाकरणं "चान्द्रायणं नवश्राद्धे" इत्यादिप्रायश्चित्तविशेषविधानार्थम् । *युग्मद्विजैरिति । यद्यपि नवश्राद्धानाम्—

नव श्राद्धानि कुर्वीत प्रेतोद्देशेन यत्नतः ।
एकोद्दिष्टविधानेन नान्यथा तु कदाचन ॥

इति ब्रह्माण्डपुराणात्सपिण्डनप्राग्भावित्वाच्चैकोद्दिष्टत्वं, तथापि—

पञ्चमे नवमे चैव तथैवैकादशेऽहनि ।
युग्मांस्तु भोजयेद्विद्वान्नवश्राद्धं तु तद्विदुः ॥

इति कौर्मवचनाद्ब्राह्मणयुग्मं कार्यम् । अत्रानुक्तेष्वपि युग्मद्विजा एव, नवश्राद्धं तु तद्विदुरित्युक्तत्वात् । एतेन—

अयुग्मान् भोजयेद्विप्रांस्तन्नवश्राद्धमुच्यते ।

इति शूलपाणिः । *प्रथमेऽन्हीति । एतेन—

प्रथमेऽन्हि तृतीयेऽन्हि पञ्चमे सप्तमे तथा ।
द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषास्तु दशमेऽहनि ॥

इति व्याख्यातम् । द्वितीयाद्यवयवपिण्डाः क्रमेण दशमेऽन्हि समापनीया इति चतुर्थपादार्थात् । ननु नवश्राद्धे कः पक्ष आश्र-

*अत्र शाखाभेदाद्व्यवस्था ।

अपरार्के भविष्ये--

नवश्राद्धं त्रिपक्षं च षण्मासं मासिकानि च ।
न करोति सुतो यस्तु तस्याधः पितरो गताः ॥

वाराहे—

*गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात्पथः ।
मनसा वायुभूतेन विप्र त्वाहं नियोजये ॥
पूजयिष्यामि भोगैस्त्वामेवं विप्रं निमन्त्रयेत् ॥

आवाहनेऽपि तत्रैव—

इहलोकं परित्यज्य गतोसि परमां गतिम् ।
मनसा वायुभूतेन विप्रे त्वाहं नियोजये ॥ इति ।

तत्रैव बह्वृचपरिशिष्टे—

अनूदकमधूपं च गन्धमाल्यविवर्जितम् ।
नवश्राद्धममन्त्रं च पिण्डोदकविवर्जितम् ॥
उदकमर्घ्यः । पिण्डोदकं 'शुन्धन्तां पितरः' इत्य*वनेजनादिः ।

*एकोद्दिष्टेषु सर्वेषु न स्वधा नाभिरम्यताम् ।
नाग्नौकरण(१)मन्त्रश्च एकं वाथ तिलोदकम् ॥

णीय इत्यत आह—*अत्रेति । यहि गृह्येषु नवश्राद्धान्युक्तानि तदा एतान्येव कार्याणि, अन्यथाऽऽङ्गिरसोक्तानि, आचारात् । नागरखण्डाद्युक्तानि तु यत्र तदाचारस्तत्रैवेत्यर्थः । *गतोसीति । द्वयमेकादशाहिकश्राद्धे । *अवनेजनादीति । आदिना प्रत्यवनेजनग्रहः । *एकोद्दिष्टेषु सर्वेष्विति । यद्यपि याज्ञवल्क्यादिभिरेकोद्दिष्टसामान्ये 'अभिरम्यताम्' इति विसर्जनमन्त्र उक्तः गोभिलेनापि "अभिरम्यताम् इति विसर्जनमेतत्

---

(१) 'मन्त्राश्च एक चार्थ'क० ।

अनपत्येषु सर्वेषु न स्वधा नाभिरम्यताम् ।
स्वस्त्यस्तु विसृजेदेवं सकृत्प्रणववर्जितम् ॥
एकोद्दिष्टस्य पिण्डे तु *अत्रशब्दो न विद्यते ।
पितृशब्दं न कुर्वीत पितृहा चोपजायते ॥

सपिण्डनात्प्रागिति हेमाद्रिः । तेन—

न च स्वधां प्रयुञ्जीत प्रेतश्राद्धे दशाहिके ।

इति ऋष्यशृङ्गोक्तौ दशाहिकोक्तेरेकादशाहे स्वधाप्रयोग एवेति हारलता परास्ता ।

रत्नावल्याम्—

आशिषो द्विगुणा दर्भा जयाशीः स्वस्तिवाचनम् ।
पितृशब्दः (१)स्वसम्बद्धः शर्मशब्दस्तथैव च ॥
*पात्रालम्भो*ऽवगाहश्च उल्मुकोल्लेखनादिकम् ।
तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च ॥
प्रदक्षिणा विसर्गश्च सीमान्तगमनं तथा ।
अष्टादश पदार्थां*श्च प्रेतश्राद्धे विवर्जयेत् ॥

अत्र स्वधापितृनमः*शब्दानां "तिलोऽसि" इतिमन्त्रे *प्रेतशब्दोहेन तूष्णीं वा तिलावपनम् । *तूष्णीमर्घ-

---

प्रेतश्राद्धम्" इति विशेषतोऽपि तथापि आश्वलायनानां प्रेतश्राद्धे न भवति तत् परिशिष्टे तन्निषेधात् मन्त्रान्तरविधानाच्चेत्याशयः । *अत्रशब्दः अत्र 'पितरो मादयध्वम्' इति मन्त्रः । 'अनुशब्दो न विद्यते' इति पाठे 'ये च त्वामत्रानु' इतिमन्त्रः । *पात्रालम्भः समन्त्रः । *अवगाहः द्विजाङ्गुष्ठनिवेशनम् । महैकोद्दिष्टप्रयोगमाह—*चेति । *शब्दानामिति । इदमुपलक्षणं न धूर्यादयो नाभिश्रवणं न श्राद्धशेषभोजनमित्यपि बोध्यम् । *प्रेतशब्दोहेनप्रत्तः प्रेतमिमानित्यूहः—*तूष्णीमिति । अमुकगोत्रामुकप्रेत

---

(१) 'स्वसम्बन्धः' क० छ० ।

दानम्। अमुष्मै स्वाहेति प्रेतनाम्ना पाणिहोमः *नाम्ना एकः पिण्डः। निनयनमन्त्रे ऊहः। अनुमन्त्रणादि त्वमन्त्रकम्। अभिरम्यतामिति विसर्जनम्। एवं *नवश्राद्धवर्जैकोद्दिष्टेषु। 'नवश्राद्धे त्वमन्त्रकं सर्वम्' इति नारायणवृत्तिः। क्रियानिबन्धे--

उत्तानं स्थापये*त्पात्रमेकोद्दिष्टे सदा बुधः।
न्युब्जं तु पार्वणे कुर्यात्तस्योपरि कुशान्न्यसेत्॥
*नवश्राद्धं गृहे कुर्याद्भार्या यत्राग्नयोऽपि वा।
सपिण्डीकरणान्तानि प्रेतश्राद्धानि यानि वै॥
तानि स्युर्लौकिके वह्नावित्याह त्वाश्वलायनः॥

इदं सम्भवे*ऽन्नेन कार्यम्,

नवश्राद्धेषु य*च्छिष्टं *ग्रहपर्युषितं च यत्।
दंपत्योर्भुक्तशेषं च न तद्भुञ्जीत कर्हिचित्॥

इत्यङ्गिरोवचनलिङ्गात्।

द्वाभ्यां तदा तु कृच्छ्राभ्यां शुद्धिः स्यात्तु विवेकिनाम्।

इति ब्राह्मे उक्तम्। विघ्ने तु निर्णयामृते कण्वः-

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत्।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते॥

हेमाद्रौ गालवः—

शावे तु सूतकं चेत्स्यान्निशायां च मृतौ तथा।

महैकोद्दिष्टे इदमर्घ्यं तवोपतिष्ठतामिति सङ्कल्प्यापोशनादि दद्यात्। *नाम्नेति। अमुकगोत्रामुकप्रेताऽयं ते पिण्डमुपतिष्ठतामिति मन्त्रः। *नवश्राद्धवर्जेति। नवश्राद्धभिन्नेत्यर्थः। *पात्रम्। अर्घ्यस्य। *नवश्राद्धमिति। प्रयोगोन्त्येष्टिपद्धतौ बोध्यः। *अन्नेनेति। सक्तुशेषादिलक्षणेऽप्युक्तैव निष्कृतिः। *शिष्टं शेषः। *ग्रहः ग्रहणम्। निशायां मृतावित्यन्वयादाह--

नवश्राद्धानि देयानि यथाकालं यथाक्रमम् ॥
निशायामाशौचान्ते*द्यहवृद्धौ । अन्वारोहणे तु—
नवश्राद्धानि सर्वाणि सपिण्डीकरणं पृथक् ।
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥
आशौचान्त्यदिने कार्यमुक्तं ब्राह्मे—
यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः ।
स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि ॥
समाप्य दशमं पिण्डं प्रेतस्पृष्टे तु वाससी ।
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोत्यपि ॥
श्मश्रुलोमनखानां च यत्र्याज्यं तज्जहात्यपि ।
गौरसर्षपकल्केन तिलकल्केन संयुतम् ॥
शिरःस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः ।
वृषभं गां सुवर्णं च स्पृष्ट्वा शुद्धो भवेन्नरः ॥
क्रियानिबन्धे गृह्यकारिकायाम्—
*अत्र पिण्डत्रयं दद्युस्तत्सखिभ्यस्तथाऽऽदिमम् ।
प्रेताय मध्यमं तद्वत्तृतीयं च यमाय वै ॥
तथा—
कर्ताऽत्र प्रार्थिताः सन्तो ज्ञातिसंबन्धिबान्धवाः ।
ददुर्युरभ्यङ्गतः पूर्वं त्रींस्त्रीन्धर्मोदकाञ्जलीन् ॥
पूर्ववन्नामगोत्राभ्यां नियमो नेह कश्चन ॥
मदनरत्ने विष्णुहारीतौ—'आशौचान्ते कृतश्मश्रुकर्मा-
णस्तिलकल्कैः सर्षपकल्कैर्वा स्नाताः शुक्लवाससो गृहं

---

*द्यहवृद्धाविति । यद्यपि तत्र पुत्रस्याग्निदस्य च पूर्णमेवाशौचं तथाप्यन्यस्मिन् क्रियाकर्त्तरि तद् द्रष्टव्यम् । *अत्रेति । अत्र पञ्च कुम्भाः स्थाप्याः । तत्र मध्यमे प्रेताय पूर्वे प्रेतसखिभ्यः दक्षिणे यमाय पश्चिमे वायसायोत्तरे प्रेताधिपतये तद्वाजायेति पञ्च पिण्डा इति प्रका-

प्रविशेयुस्तत्र *शान्तिकं कृत्वा ब्राह्मणपूजनं कुर्युः।'इति ।

देवलः—

*दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥

अपरार्के बृहस्पतिः—

*नवमे वाससां त्यागो नखरोम्णां तथान्तिमे ।

तत्रैव व्यासः—

आशौचान्त्यदिने क्षौरं जनन्या च गुरौ मृते ।

एतत्प्रेतालपवयसामित्याहापस्तम्बः—*'अनुभाविनां च (१)परिवापनम्' इति । अनुभाविनः कनिष्ठा इति विज्ञानेश्वररत्नाकरादयः ।

आशौचमनुभवतां पुसां सर्वाशौचे तु मुण्डनम् ।
आज्ञया नरपतेर्द्विजन्मनां दारकर्मसुतसूतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोडुषु ॥

इति रत्नमालोक्तेर्जननाशौचेऽपीति शुद्धितत्त्वादयः । अत्र देशाचारतो व्यवस्था । परि शिखावर्जम्, 'केशश्मश्रुलोमनखानि वापयीत शिखावर्जम्' इति गोभिलोक्तेः । यत्त्वापस्तम्बः—'न समावृत्ता वपेयुरन्यत्र विहारादित्येके' । विहारो दर्शादियागः । तेन विना समावृत्ता गृहस्था न वपेयुरित्यर्थः । यच्च—

वृथा छिनत्ति यः केशांस्तमाहुर्ब्रह्मघातिनम् । इति,

रान्तरमन्त्येष्टौ । *शान्तिकं सपिण्डनोत्तरपाथेयश्राद्धानन्तरम् । *दशमेऽहनीति । अन्त्यदिने इत्यर्थः । उपान्त्यदिनं विकल्पयति—*नवमे इति । वाससां त्यागो निर्णेजकादौ निर्णेजनार्थः । *अनुभाविनां चेति । दशमेऽहनीति पूर्वोक्तदेवलवाक्यात्स्नानवत्सर्वेषां वपने प्राप्ते अनेन मृतकनीयःसपिण्डानां तन्नियम्यते । एवं च

(१) 'परिवपनम्' ग०

तत्—

केशश्मश्रु धारयतामग्र्या भवति संततिः ।

इति दानधर्मोक्तकाम्यपरम् । अनुभाविनः *पुत्रादय एवेत्येके,

*पुत्रः पत्नी च वपनं कुर्या(१)दन्ते यथाविधि ।
पिण्डदानोचितोऽन्योपि कुर्यादित्थं समाहितः ॥

इत्यपरार्के व्यासोक्तेः । यत्तु मिताक्षरायाम्—

द्वितीयेऽह्नि कर्तव्यं क्षुरकर्म प्रयत्नतः ।
तृतीये पञ्चमे वापि दशमे वाऽऽप्रदानतः ॥ इति ।

आप्रदानतः इति *चतुर्थादीनि । तत्प्रथमदिनेऽसंभवे ज्ञेयम्,

"कृतश्मश्रुकर्माणः" इति वाक्यान्तराण्यपि संकुचद्वृत्तीन्येव । श्मश्रुपदं तु तत्पूर्वकत्वलाभाय, तत्कल्पनस्यावश्यकत्वार्थं च तेन क्षणमपि न यवनाचारप्रसङ्गः । एवं च शिष्यस्यापि पुत्रधर्मातिदेशेन तत्सिद्धौ "गङ्गायां भास्करक्षेत्रे" इत्यादिवचनात् मातापित्राचार्यमरणे तदावश्यकम् अन्यत्र चानियतम् । अन्यथैतदानर्थक्यापत्तेः । गङ्गापदं च सर्वतीर्थोपलक्षणं, "सर्वतीर्थेष्वयं विधिः" इत्युक्तत्वात् । *पुत्रादय एवेत्येके इति । एकशब्दाभिधानं भ्रात्रादेर्निवृत्तावस्वारस्य सूचकम् , तेषामपि प्रेताभ्युदयकामनायां तत्प्राप्तेः । पत्न्यास्तु पुत्रवत्तन्नित्यमित्याह—*पुत्र इति । पत्न्याः प्रथमेऽह्नि दशमे वा यथाचारम् । यतिपत्न्यास्तु तदैव । यत्तु—

सूतके मृतके क्षौरं न कुर्याद्दशमेऽह्नि यः ।
तस्याशौचं भवेन्नित्यं पितरो नरके स्थिताः ॥ इति ।

तन्निर्मूलम् । समूलत्वे त्वनुभाविविषयतया संकुचितमिति मृतके सूतके इत्यस्य मृतिनिमित्तकाशौचे इत्यर्थः *चतुर्थादीनीति । प्रदा-

---

(१) 'अन्त्ये' क०

*अलुप्तकेशो यः पूर्वं सोऽत्र केशान्प्रवापयेत् ।
द्वितीयेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमेऽपि वा ॥
यावच्छ्राद्धं प्रदीयेत तावदित्यपरं मतम् ॥

इति माधवीये मदनरत्ने च बौधायनोक्तेः । मदनपारिजाते तु दशमे प्रथमे च समुच्चय उक्तः । यत्तु—

दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत् । इति, तदे*कादशाहश्राद्धाङ्गविप्रनिमन्त्रणार्थं ज्ञेयम् ॥

अथैकादशाहः । मनुः—

*विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधे ।
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृताक्रियः ॥

शुद्धितत्त्वे देवलः—

अघाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गलाः ।
आशौचाद्विप्रमुच्यन्ते ब्राह्मणान्स्वस्ति वाच्य च ॥

याज्ञवल्क्यः—

(मृ(१)तेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैव) आद्यमेकादशेहनि ॥

क्षत्रियादेरप्याशौचेऽप्येकादशेऽह्नि श्राद्धं कार्यम्,

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥

नमैकादशाहिकश्राद्धमिति स्वतन्त्रविधिः । *अलुप्तकेश इति । तथाच दग्धृपरं मिताक्षरावचनम्, दाहाङ्गभूतस्य वपनस्य प्रथमदिन उक्तेः । *एकादशाहेति । विज्ञानेश्वरमते महैकोद्दिष्टाहन्येव प्रातर्विप्रनिमन्त्रणं युक्तम् ।

*विप्र इति । कृताक्रियः कृतस्नान इति विप्रादीनां विशेषणम् । तथाच यस्य विप्रादेर्यावत्कालमाशौचमुक्तं स तत्काला-

---

(१) कंसान्तर्गतं नास्ति । क० छ०

इति हेमाद्रौ शङ्खोक्तेः । पैठीनसिः—

एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् ।
चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक् ॥

यत्तु मरीचिः—

आशौचान्ते ततः सम्यक् पिण्डदानं समाप्यते ।
ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः ॥ इति ।

तत्सर्ववर्णानां दशाहाशौचपरम् । यत्तु विष्णुः—'अथाशौचापगमे' इति । यच्च गौडग्रन्थे हारीतः—'ऊर्ध्वं भूते एकोद्दिष्टं कुर्यात्' । यच्च बैजवापः—'ऊर्ध्वं दशम्या अपरेद्युः' इति; तद्विप्रविषयम् । एतेन *दशमपिण्डो-

---

तिक्रमे सति स्नायात् । ततो विप्रो हस्तेनापः स्पृष्ट्वा शुद्ध्यति । एवं क्षत्रिय इति । स्पृष्ट्वेति स्पर्शक्रियैवोच्यते नतु स्नानमाचमनं वा, तस्यैवाग्रेऽनुषङ्गात् । अत्र कृतक्रियो यावदाशौचं कृतक्रियोदको विप्रादिक्रमेणोदकादिकं स्पृष्ट्वा विशुद्ध्यतीति आशौचकालानन्तरभाविस्नानप्रतिनिधिरुच्यते इति पक्षान्तरं शिष्टा नाचरन्ति । *दशमेति ।

ब्राह्मणे दश पिण्डाः स्युः क्षत्रिये द्वादश स्मृताः ।
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत् प्रकीर्तिताः ॥

इत्येको गात्रपूरकपिण्डपक्षः । अपरश्च—

सर्वेभ्यः प्रेतवर्णेभ्यः पिण्डान् दद्यादशैव तु ।

इतिपारस्करोक्तपक्षे—

राज्ञस्तु दशमः पिण्डो द्वादशेऽहनि दीयते ।
वैश्यस्य पञ्चदशमे ज्ञेयस्तु दशमस्तथा ॥
शूद्रस्य दशमः पिण्डो मासे पूर्णेऽह्नि दीयते ॥

इत्यादिपुराणोक्त इत्यर्थः । याज्ञवल्क्योक्तावयवपिण्डपक्षे पूर्वोक्तसर्ववर्णदशाहाशौचपक्षे च अवयवपिण्डसमाप्तिलाभादुक्तम्—

त्कर्ष*पक्षे अवयवपिण्डासमाप्तौ कथमेकादशाहे श्राद्धमिति मूर्खोक्तिः परास्ता, *वचनादाशौचमध्य इव तत्राप्यविरोधात्।

भविष्ये—

एकादशभ्यो विप्रेभ्यो दद्यादेकादशेऽहनि।
भोजनं तत्र वैकस्मै ब्राह्मणाय महात्मने॥

यत्तु मात्स्ये—

एकादशेऽहनि तथा विप्रानेकादशैव तु।
क्षत्रादिः सूतकान्ते तु भोजयेदयुजो द्विजान्॥ इति।

तद्रु*द्रगणश्राद्धपरमिति मदनपारिजातः। गौडास्त्व*स्माद्वचनात्क्षत्रियादीनामाशौचान्त एवेत्याहुः।

---

*पक्षे इति। *वचनादिति। तथाच वचनबलादेकादशाहश्राद्धं कृत्वा पिण्डसमाप्तौ न क्षतिः "नास्ति वचनस्यातिभारः" इति न्यायादित्यर्थः। अत एव शूद्रस्य मृताहावधिकद्वादशाहे षोडशश्राद्धपूर्वकं सपिण्डनं विज्ञानेश्वरसंमतमाचक्षते रघुनाथप्रभृतयः। *रुद्रगणेति। वस्तुतस्तु तस्याऽऽद्यश्राद्धपरत्वमेव, ब्राह्मण एकादशाहे आद्यश्राद्धे एकादश द्विजान् भोजयेदेव क्षत्रियादिस्तु तत्रैव तत्कुर्वन्नपि न पक्वेनान्नेन तदा ब्राह्मणान् भोजयेत्। किन्तु तदा त्यक्तेन तावद्ब्राह्मणभोजनपर्याप्तेनाऽऽमेन सूतकांते पक्त्वा भोजयेदिति तदर्थात्। अयं च विधिरावश्यकः विष्णुना सूतकान्तमात्राभिधानात्तस्य सर्ववर्णसाधारण्यापातात्। तस्य विप्रपरत्वोपगमे एकादशाहे क्षत्रियादेर्भोजनप्रसङ्गात्। *अस्मात् मात्स्यात्। एतन्मते च सपिण्डनमाद्यश्राद्धोत्तरदिन एवेति बोध्यम्। गौडास्त्वित्यस्वरसः। मात्स्यवचनस्य "एकादशेऽहनि" इत्युक्तस्य श्राद्धीयस्यामस्य सूतकान्ते पाकेन भोजनार्थकत्वेनोपपत्तेः सूतकान्तकर्त्तव्यत्वबोधकत्वाभावात्। नच—

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा।

रामायणेऽपि—

समतीते दशाहे तु कृतशौचो यथाविधि ।
चक्रे द्वादशिकं श्राद्धं त्रयोदशिकमेव च ॥

द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥
गलांसभुजवक्षांसि तृतीयेन तु सर्वदा ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
ऊरुजङ्घे तथा पादौ पञ्चमेन विधीयते ।
षष्ठेन सर्वमर्माणि सप्तमेन च नाडयः ॥
दन्तलोमाद्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥
दशाहप्रेतपिण्डेन ज्ञानं प्रेतेषु जायते ॥

इति ब्रह्मपुराणात् दशपिण्डदानस्य पूर्णप्रेतशरीरावयवनिष्पादकत्वम् ।

प्रेतलोके तु वसतिर्नृणां वर्ष प्रकीर्तिता ॥

इति वचनाच्च । तथाचोत्तरश्राद्धसहकारेण तद्विनाशफलकस्याद्यश्राद्धस्य तत्पूर्वकपितृत्वप्राप्तिफलकानां वा सपिण्डनान्तानां दशमपिण्डात् पूर्वकरणं विरुध्यते इति वाच्यम् । प्रेतशरीरस्य-

क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनन्दन ।

इति वचनात् दुःखैकहेतुत्वेन वैधकर्मफलत्वासम्भवात् । एतच्छरीरपातावशिष्टकर्मभिः शुक्रशोणिताहारपरिणामविशेषादिभिर्दृष्टैश्च तदारम्भोपपत्तेरेतत्पिण्डदानानपेक्षणात् । अन्यथा चण्डालतिर्यगादिशरीरपातानन्तरं न स्यात्, तत्र पिण्डदानाभावात् । तस्मात् पिण्डदानफलं नावयवनिष्पत्तिः किन्तु तदकरणनिमित्तकप्रेतनरकनिवृत्तिः । तथाच ब्राह्मे--

ग्रामाद्बहिश्च कर्तव्यं जलाशयसमीपतः ।
पिण्डदानं दशाहानि प्रेतायारण्यमाश्रितैः ॥

अरण्ये पिण्डदानं तु मोहान्न क्रियते यदि ।
तदा रौरवमायाति प्रमीतः प्रथमेऽहनि ॥
पुन्नामसंज्ञं त्वपरे महारावं तृतीयके ।
तामिस्राख्यं चतुर्थे तु प्रयात्यथ सुदारुणम् ॥
पञ्चमे चान्धतामिस्रं षष्ठे घोरं च सुप्रभम् ।
अमेध्यं कृमिसम्पूर्णं सप्तमेऽहनि घातकम् ॥
असिपत्रवनं घोरमष्टमेऽहनि सर्वथा ।
महारौरवसञ्ज्ञं तु नवमे याति मानवः ॥
अवीचिरिति विख्यातं दशमेऽहनि भीषणम् ॥ इति ।

नच पिण्डदानाकरणस्यारण्यसम्बन्धांशे एवेयं निन्दा, नानाविधविशेषणवत्तया पिण्डदानस्यैव प्रागवगमात् । नचैवं वाराणसीमरणादिनिमित्तकमुक्तौ नरकादर्शनफलकप्रवृत्तकर्मणा वा प्रेतगतानिष्टासत्त्वेन पिण्डदानं व्यर्थमिति वाच्यम्,

तण्डुलैः सक्तुभिः शाकैः फलैर्वा श्रद्धया ततः ।
देशकालानुसारेण कुर्यात् प्रेतस्य तर्पणम् ॥

इत्यादिशाकेङ्गुदीपिण्याकादिनिःसारद्रव्यविधानेन तदकरणे कर्त्तुरेव प्रत्यवायकल्पनात् । अथवा पिण्डदानस्य प्रेतत्वावस्थानिवृत्तिरेव फलं—

स्वगोत्रा वाऽन्यगोत्रा वा स्त्रियो वा पुरुषास्तथा ।
प्रेतास्तु पिण्डसम्बन्धान्मुच्यन्ते तेन कर्मणा ॥
वायुभूतास्तु तिष्ठन्तः कालापेक्षेण सर्वदा ॥

इत्यादित्यपुराणात् । एवं च प्रागुक्तवचनस्याधमारब्धं प्रेतशरीरं दुःखैकभोगहेतुस्तन्निवर्तकाभावे दुःखभोगार्थं तांस्तान् नरकान् गच्छेत् पिण्डदानेन तु तदारम्भकादृष्टनाशेन तच्छरीरनिवृत्तौ तदप्राप्तिरित्यत्र तात्पर्यम् । तस्मात् क्षत्रियादिभिर्दशमपिण्डदानात्प्राक् प्रेतत्वनिवर्तकस्यैकादशाहस्य शूद्रेण वा द्वादशाहे सपिण्डनान्तस्य करणे न कोपि विरोधः । प्रेतत्वनिवृत्तिस्तु दशमपि-

*द्वादशिकं (१)द्वादशाहेन निर्वर्त्य त्रयोदशाहश्राद्धम् । त्रयोदशिकं चतुर्दशाहविधेयं सपिण्डनपाथेयादि । क्षत्रियाणां द्वादशाहाशौचे त्रयोदशे महैकोद्दिष्टं चतुर्दशे सपिण्डनम् । *द्विविधवाक्यादेकादशाहाशौचान्तयोर्विकल्प इत्येके । *सद्यःशौचादौ युद्धहतादेरेकादशाहे *अन्येषामाशौचान्त इति वयम् । कौर्मे—

एकादशेऽह्नि कुर्वीत प्रेतमुद्दिश्य भावतः ।
द्वादशे वाऽह्नि कर्तव्यमनिन्द्येऽप्यथवाऽहनि ॥

ण्डोत्तरमेव । द्वादशाहादिसपिण्डने प्रेतत्वनिवृत्तेर्वत्सरोत्तरत्ववत्तदन्त एव सकलनिवर्तकसम्पत्तेः । समतीते इत्यादि रामायणवाक्यस्य चायमर्थः—सत्यपि द्वादशाहाशौचे दशाहोत्तरदिने एकादशाहिकं चक्रे, ततो द्वादशाहिकं श्राद्धं, ततस्त्रयोदशाहिकं पाथेयञ्च श्राद्धमिति । गौडमते दशाहपदस्याशौचकालद्वादशाहपरत्वाद् व्याचष्टे—*द्वादशिकमिति । मतान्तरमाह—*द्विविधेति । एकपक्षाङ्गीकारसम्भवाद्विकल्पोऽष्टदोषग्रस्तो नाङ्गीकार्य इत्यस्वरसः । सिद्धान्तमाह—*सद्य इति । आदिना त्र्यहैकाहग्रहः ।

तृतीये तूदकं दत्त्वा चतुर्थे श्राद्धमाचरेत् ।

इत्यादौ तु तद्बाधोऽनुसन्धेयः । *अन्येषामिति । अयं भावः—प्रायशः एकसंवत्सरस्थायी वायवीयः प्रेतदेहः, तदारम्भकश्च मनुष्यशरीरारम्भकाधर्मशेषः पितृत्वप्राप्तिप्रतिबन्धकः तद्देहभोग्यदुःखभोगैकनाश्यः, तदधर्मनाशार्थं दुःखभोगस्तदर्थं च प्रेतदेह आवश्यकः तदुत्पत्त्यर्थं च पिण्डदानमिति प्रेतदेहोत्पत्तिर्भवत्येव पिण्डदानफलम् । अत एवैकादशाहादिश्राद्धानां पूर्णप्रेतशरीरनिवृत्तिः फलं,

यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश ।

---

(१) 'द्वादशाहेऽतीते श्राद्धम्' क० छ० ।

निन्द्यं प्रेतक्रिया(१)काले उक्तम्। एकादशे तु न निषेध इत्युक्तं प्राक्। बृहस्पतिः—

वस्त्रालंकारशय्यादि पितुर्यद्दाहनादिकम्।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत्॥
श्रोत्रिया भोजनीयास्तु नव सप्त त्रयोदश।
(२)ज्ञातयो बान्धवा निःस्वास्तथा चातिथयोऽपरे॥

पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि॥

इति यमोक्तेः।

एकादशाहादिभिः श्राद्धैर्मृतस्याप्यायनं भवेत्।
सम्यक् संवत्सरे प्रेतः पितॄणां स्थानमृच्छति॥

इति देवलोक्तेश्च। आप्यायनं प्रेतत्वपरिहार इति हि शूलपाणिः। "सगोत्रा वाऽन्यगोत्रा वा" इति वचनं तु चिरकालमृताकृतौर्ध्वदेहिककेवलदुरितप्राप्तप्रेतदेहविषयं, "कालापेक्षेण तिष्ठन्तः" इति तत्रैवाभिधानात्। यत्तु त्रिरात्रं दशरात्रं वा प्रेतमुद्दिश्योदकं क्षीरं च स्नानपानार्थं दीयते तेन तदानीमेव प्रेतो न स्नानपाने कुरुते तयोः प्रत्यक्षतोऽदर्शनात् किन्तु तदा तज्जन्यापूर्वेण तदानीमेव तस्य स्नानपानयोग्यदेहलाभोऽनन्तरं तत्सजातीयनीरक्षीरान्तरोपस्थितिः। एवं दशाहमध्ये शालीनां सहभोजनादेः प्रेताप्यायकत्वेऽपि। अथवा यथा गर्भिण्युपभुक्तं दोहदान्नपानादि अपूर्णस्यैव गर्भस्याप्यायकं तथा क्षीरोदकदानादि अपूर्णद्वारेण प्रेतदेहपुष्टिकरम्। ततश्च मरणानन्तरमेव दत्तैर्गात्रपूरकैः पिण्डैः प्रेतभावाहाणामक्लेशेन क्षिप्रं प्रेतशरीरं भवति इति वा व्यवस्थायामवैधं बुद्धिपूर्वं वा मरणे दुर्मरणे च प्रायश्चित्तविशेषादिनाऽधिकारं सम्पाद्य दत्तैः पिण्डैस्तत्। अधिकारासम्पादने तु क्षिप्रमप्यतिमूढं पिण्डदानवत्त्वेऽप्यनर्हम्। सर्वथा पिण्डदाने तु विलम्बेन क्लेशेन च तदिति सिद्धम्। तथाच दशमपिण्डदानात् पूर्वं

(१) 'कालयुक्तम्' ग। (२) 'जातयो' ग०।

देवयाज्ञिकनिबन्धे—

एकादशसु विप्रेषु प्रेतमावाह्य भोजयेत् ।

प्रेतदेहस्यैवानिष्पन्नत्वात्तन्निवृत्त्यर्थानामेकादशाहादिश्राद्धानामाशौचमध्ये कथं करणमिति याज्ञवल्क्यादिवाक्ये पैठीनसिवचने चैकादशाहग्रहणमाशौचान्त्यादिनोत्तरदिनार्थकं विष्णुवचनैकवाक्यत्वात् । "ततः श्राद्धमशुद्धौ तु" इति शङ्खवचनपाठे श्राद्धं प्रथमादिदेनेष्वशुद्धौ कुर्यादित्यर्थः । अशुद्धौ कथं श्राद्धं स्यादित्यत्राह-कर्त्तुरिति । एकादशाहे अशौचोत्तरदिने च कुर्यादिति व्याख्येयम् ।अशुद्धोऽपीति पाठे सर्वेषामपि आशौचान्त्यदिनस्य महैकोद्दिष्टाङ्गविप्रनिमन्त्रणपरत्वम्।तत्सिद्धं सर्वैरपि दशमपिण्डे दत्ते स्वस्वशौचोत्तरेऽह्नि एकादशाहश्राद्धं कार्यं तदितरैकादशाहकृत्यं च तत्रैव, तयोरेकदिनकर्त्तव्यत्वात् । द्वादशाहाशौचकारिक्षात्रियाणां मासाशौचकारिशूद्राणां चाचारोऽप्येवमेव । तदुत्तरेऽह्नि च सपिण्डनम् । सर्वेषां दशाहाशौचपक्षे तु एकादशाहद्वादशाहयोरेव तत्कृत्यम् । शूद्राणां द्वादशे सपिण्डनविधानं तु न मरणाद्द्वादश इति वक्ष्यामः । एकादशभ्य इति । एकस्यैव प्रेतस्थाने एकादश ब्राह्मणा इति मुख्यः कल्पः । विष्णुना तु यथाशक्ति ब्राह्मणा उक्ताः । यथा—"आशौचव्यपगमे प्रातः सुप्रक्षालितपाणिपादः स्वाचान्तः ब्राह्मणान् यथाशक्ति उदङ्मुखान् गन्धमाल्यवस्त्रादिभिः पूजितान् भोजयेत्" इति । ग्रन्थेऽपि एतदभिप्रेत्यैव "नव सप्त त्रयोदश" इत्युक्तम् । एकैको वा, "गतोऽसि दिव्यलोकं त्वम्" इति प्रागुक्तवाराहात् ।

स्नापनाभ्यञ्जनं दद्याद्विप्राय विधिपूर्वकम् । इति,

ब्राह्मणं शीघ्रमेवानयेत् ।

आगतं च द्विजं दृष्ट्वा कर्तव्या स्वागतक्रिया । इति ।

आवरणार्थं छत्रं तद्ब्राह्मणाय प्रदीयते ।

तत्राऽऽद्याय च शय्यादि दद्यादाद्यामिति स्मृतम् ॥
विष्णुः—'एकवन्मन्त्रानूहेतैकोद्दिष्टे' बहुवचनान्तानेकवचनान्तान्वदोदित्यर्थः । एतत् *दृष्टार्थत्वे ।

पश्चादुपानहौ दद्यात् पादस्पर्शकरे शुभे ॥
सन्तप्तवालुकां भूमिं महीं कण्टकितां तथा ।
सन्तारयति दुर्गाणि प्रेतं दददुपानहौ ॥
तिलोपचारं कृत्वा तु विप्रस्य नियतात्मवान् ।

इत्यनेकवाक्येष्वेकवचनाच्च ।

नवश्राद्धनिमित्तं तु एकमेकादशेऽहनि ।

इत्यत्रिवचनाच्च । बहुपक्षेऽपि प्रेतोपभुक्तवस्त्रादिकं नवशय्या च तन्मध्ये एकस्मै गुणवते देया "तस्मात्तेषामेकस्मै गुणवत्ते शय्या देया" इति सत्यव्रतवचनात् । गुणवांश्चाऽऽद्यः कर्तव्य इत्याह—*आद्यायेति । एवं चेतरेभ्यो यथाशक्ति दक्षिणैव, एकस्मै वस्त्रादिदानमुक्त्वा—

प्रदद्याद्दक्षिणां तेषां सर्वेषामनुरूपतः ।

इति बृहस्पत्युक्तेः । अयं च सर्वैकोद्दिष्टप्रकृतिरिति मिताक्षरादर्शनान्मासिकसांवत्सरिकाद्येकोद्दिष्टेषु तद्धर्मातिदेशो बोध्यः । ननु वैष्णवं पुराणैकोद्दिष्टे एव प्रवर्तते न तु सपिण्डनप्राक्तने मासिके एकादशाहिके च प्रेतैकोद्दिष्टे । तदानीं पितृत्वाभावेन तद्वाच्यावस्थाविशेषात्मकपितृत्वाभावेन तद्वाचिबहुवचनान्तपितृपदोपेतमन्त्राणां तत्राप्रवृत्तेः।"पितृशब्दं न युञ्जीत"इति निषेधश्च न्यायप्राप्तानुवादप्रायत्वात् । अत एवान्वष्टक्ये पितृपदे न मातृपदोह इति वृत्तिकृतः । नच पवित्रच्छेदनमन्त्रे द्विवचनान्तः पवित्रशब्दस्तत्रैकवचनोह इति वाच्यं तथापि 'मन्त्रान्' इतिबहुत्वानुपपत्तेरिति चेत् ? न, वैष्णवस्य प्रेतैकोद्दिष्टमुपक्रम्याम्नानेन तत्साधारण्यस्यावश्यकत्वात् । *दृष्टार्थत्वे इति । दृष्टार्थत्वार्थम-

अस्य विन्ने गौणकालमाह हेमाद्रौ बौधायनः—

एकोद्दिष्टं श्व एव स्याद् द्वादशेऽहनि वा पुनः ।
अत ऊर्ध्वमयुग्मेषु कुर्वीताहःसु शक्तितः ॥
अर्धमासेऽथवा मासि ऋतौ संवत्सरेपि वा ॥ इति ।

तत्रैव लघुहारीतः—

एकोद्दिष्टं तु कुर्वीत पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहः समुपोषणम् ॥

गोभिलः—

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेदेकं द्विरावृत्तिर्भवेदिति ॥
एतदाद्यमासिकाद्याब्दिकयोः सिद्ध्यर्थमिति भट्टाः ।

(ते(१)न महैकोद्दिष्टं षोडशश्राद्धाद्भिन्नमेव । अत एवाद्यम् सर्वैकोद्दिष्टप्रकृतिभूतमेकादश इति विज्ञानेश्वरः । अन्ये त्वाद्यमासिकाब्दिकयोः 'आद्यमेकादशेऽहनि' इति नियमादभेदमाहुः । द्वयोस्तन्त्रत्वबाधार्थं गोभिलीयमित्यन्ये ।) युद्धहतादौ तु हेमाद्रौ पृथ्वीचन्द्रोदये पैठीनसिः—

सद्यःशौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि ।
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु ॥

एवमेकाहादौ । अतोऽत्र द्वितीयेऽह्येकादशाहं वदन् ढौण्ढुः शूलपाणिः स्मार्तगौडश्च परास्ताः । एतेन 'आद्यमेकादशेऽहनि' इत्याशौचानन्तरादिनपरामिति विष्णू-

---

वेतार्थतादिभिरूहः कार्यः तेन शुन्धनमन्त्रादौ जनकवाचिबहुवचनान्तपितृशब्दसत्त्वेऽपि नोहः, अवनेजनादिनिषेधात् । पुराणैकोद्दिष्टेऽपि "नमो वः पितरः" इत्यादौ समुदितापित्राद्यभिप्रायेण बहु-

---

(१)कंसान्तर्गतं नास्ति । क० छ० ।

क्तेः प्रागुक्तशङ्खादिवचनानां चानाकरत्वादिति वदन्तः कल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबन्धविरोधादुपेक्ष्याः । उशनाः—

त्र्यहाशौचेऽपि कर्तव्यमाद्यमेकादशेऽहनि ।
अतीतविषये सद्यस्त्र्यहोर्ध्वं वा तदिष्यते ॥

याज्ञवल्क्यः—

एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥
उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने ।

त्वस्य समवेतार्थतयोहः । न तु समवेतार्थत्वात् । नापि—

एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् ।

इति ब्रह्मपुराणोक्तपक्षे एतद्व इति मन्त्रे एतादिति यथाब्दिकस्यावश्यकत्वं तथा वक्ष्यामः। *एकार्घ्यैकपवित्रकमिति। एकोऽर्घ्यः एकं पवित्रमिति एकः पिण्डानिति अर्घ्यपिण्डकत्वश्रवणं न्यायप्राप्तानुवादः दैवतैक्यादेव तत्सिद्धेः । यच्चैकं पवित्रमित्यनुवादः । तथाहि, 'पवित्रान्तर्हितेष्वप आसिच्य' इत्युक्तेः पात्रद्वाराऽर्घोदकसंस्कारकं पवित्रम् । तच्च न "अस्त्री कुशं कुथोदर्भः पवित्रम्" इति कोशात्कुशसामान्यं, किन्त्वनन्तर्गर्भिणं साग्रमिति लक्षणात्कुशद्वयदलविशेषः, वाक्येन होमप्रकरणपाठबाधात् । तत्र पार्वणे पितृपात्रत्रये पवित्रमित्यनुवाद इति । तन्न, अप्राप्तदलैक्यविधायकत्वात् । पवित्रशब्दो हि "अथ पवित्रे करोति" इति वाजसनेयिब्राह्मणे "पवित्रे कृत्वा" इति पारस्करादिसूत्रे "बार्हिषः प्रादेशमात्रे पवित्रे कुरुते", "पवित्राभ्यामाज्यस्योत्पवनम्"इति गोभिलाश्वलायनादौ "पवित्रे स्थो वैष्णव्यम्" इति मन्त्रे च द्विवचनान्ततया एकदलवचन एव । एवं च क्वचित् पवित्रमित्येकवचनं समुदायाभिप्रायं नतु तद्दलादलद्वयसमुदाय एव

अभिरम्यतामिति वदेद् ब्रूयुस्तेभिरताः स्म *ह ॥
इत्यग्नौकरणनिषेधोऽन्यपरः । *बह्वृचानां सर्वैकोद्दिष्टेषु तद्भवत्येवेत्युक्तं *प्राक् । स्वादितामिति तृप्तिप्रश्न इति कात्यायनः । प्रथमे पात्रे संस्रवानित्यस्य तृतीयेनापिधानस्य च बाधान्न पात्रन्युब्जतेति शूलपाणिः । प्रचेताः—'नात्र पात्रालम्भो नाशिषः प्रार्थयेत्' ॥
अत्र विशेषो हेमाद्रौ वाराहे—

श्मश्रुकर्म तु कर्तव्यं नखच्छेदस्तथैव च ।
स्नपनाभ्यञ्जने दद्याद्द्विप्राय विधिपूर्वकम् ॥

तथा—

उपवेश्यासने भद्रे छत्रं तत्र प्रकल्पयेत् ।
पश्चादुपानहौ दद्यात्सर्वाण्याभरणानि च ॥

विष्णुः—'दक्षिणान्तं श्राद्धमुक्त्वा दत्ताक्षय्योदकेषु चतुरङ्गुलपृथ्वीस्तावदन्तरालास्तावदधःखाता वितस्त्या-

---

तद्वाच्यः । श्रुत्यादौ बहुषु लक्षणापातात् । न च होमाङ्गपवित्रादेरेकैकदलरूपादिदं न भिन्नमेव दलद्वयरूपं, तस्यैवान्यत्रापि विनियोगसम्भवेन भेदे मानाभावात् । ततश्च द्वित्वविशिष्टस्य दलरूपस्य पवित्रस्योत्पन्नत्वात्पार्वणे प्रतिपात्रं दलद्वयरूपमिव एकोद्दिष्टे एकपात्रे द्वयदले प्राप्ते इति एकत्वद्विधानार्थमेकं पवित्रम् । वस्तुतस्तु "तिस्रस्तिस्रः शलाकास्तु" इति वचनात् पार्वण इवात्रैकैकदलात्मकानि त्रीणि पवित्राणि प्राप्तानि, तत्र एकदलं विधीयते । तथाचोक्तम्—"एकोद्दिष्टे शलाकैकम्" इति । *हेति । प्रसिद्धौ । प्रसिद्धपार्वणसम्बन्धिशेषधर्मप्रापकम् । *बह्वृचानाम् । आश्वलायनसूत्रानुसारिणाम् । *प्रागिति । "अथातः पार्वणे श्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे च" इति चत्वारि श्राद्धानि प्रक्रम्याग्नौकरणादीनां समानविधानादित्यादि । *दत्तेति । अ-

यतास्तिस्रः कर्षूः कुर्यात । कर्षूणां समीपेऽग्नित्र(१)यमाधाय परिस्तीर्यैकैकस्मिन्नाहुतित्रयं जुहुयात् सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय यमायाङ्गिरस्वते इति ॥' स्थानत्रये प्राग्वत्पिण्डनिर्वपणं दधिमधुघृतमांसैः कर्षूत्रयं पूरयित्वैतत्त इति जपेत् । शेषं नवश्राद्धवत् । अत्र साग्नेरप्यन्ते वैश्वदेव इत्युक्तं प्राक् । इदं दशाहकर्त्रा पुत्रेण वा कार्यमित्युक्तम् । क्रियानिबन्धे गृह्यकारिकायाम—

तिलोसि प्रेतदेवत्यः प्रेतं लोकान्हिनोन्तकम् ।
मन्त्रमुक्त्वा तिलानेवं प्रक्षिपेदर्घ्यपात्रतः ॥
दक्षिणामुदकुम्भं च सान्नं दत्त्वा तथैव गाम् ।
तस्मै दद्याद् *भुक्तशेषं तद्भाण्डान्यपि भाजनम् ॥

विप्राभावेऽग्नावेकोद्दिष्टम्, 'अग्नौ पायसं अपयित्वाऽऽज्यभागान्ते तदग्रे श्राद्धप्रयोगं कृत्वाऽग्नौ प्रेतमावाह्य गन्धाद्यैः सम्पूज्य पृथिवी ते पात्रमित्यादिनाऽन्नं सङ्कल्प्योदीरतामवर इत्यष्टाभिश्चतुरावृत्ताभिर्द्वात्रिंशदाहुतीर्हुत्वा पिण्डदानादिश्राद्धं समापयेत' इति । याज्ञवल्क्यः—

एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि ॥

अथ वृषोत्सर्गः । स च नित्यः काम्यश्च,

थाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपाद आचान्तस्त्वेवंविधान् ब्राह्मणान् यथाशक्त्युदङ्मुखान् गन्धमाल्यवस्त्रालङ्कारादिभिः पूजितान् भोजयेदेकवन्मन्त्रानुहेतैकोद्दिष्टे उच्छिष्टसन्निधावेकमेव तन्नामगोत्राभ्यां पिण्डं निर्वपेत् । भुक्तवत्सु ब्राह्मणेषु दक्षिणयाऽभिपूजितेषु प्रेतनामगोत्राभ्याम्" इत्यादि । *भुक्तशेष-

---

(१) 'त्रय' नास्ति । ग० ।

न करोति वृषोत्सर्गं सुतीर्थे वा जलाञ्जलिम् ।
न ददाति सुतो यस्तु पितुरुच्चार एव सः ॥
उच्चारः पुरीषम् ।

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
इति मात्स्यकौर्मोक्तेः,

एकादशेऽहि प्रेतस्य यस्य नोत्सृज्यते वृषः ।
प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥
इति षट्त्रिंशन्मते निन्दाश्रुतेः,

एवं कृत्वा ह्यवाप्नोति फलं वाजिमखोदितम् ।
यमुद्दिश्योत्सृजेन्नीलं स लभेत परां गतिम् ॥
वृषोत्सृष्टः पुनात्येव दशातीतान्दशापरान् ।

इति देवीपुराणे भविष्यादौ फलश्रुतेश्च । अयं द्वादशाहे उक्तो भविष्ये—

*चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशेऽहि वा ।
इति ।

विष्णुधर्मे तु मृताहेप्युक्तः—

*विषुवद्द्वितये चैव मृताहे बान्धवस्य च । इति ।
अयं गृहे न कार्यः,

न गृहे मोचयेन्नीलं कामयन्पुष्कलं फलम् ।
इति कालिकापुराणात् । कामधेनौ—

वत्सराभ्यन्तरे पित्रोर्वृषस्योत्सर्गकर्मणि ।
वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत ॥

मिति । श्राद्धशेषभोजनाभावात् । *चैत्र्यामिति ।
कार्तिक्यामथवा माघ्यामयने वा युधिष्ठिर ।
इत्यादि । *विषुवदिति ।

तल्लक्षणं तु ब्राह्मे—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

श्वेतवर्णस्य मुखादीनि श्यामानि श्यामस्य वा श्वेतानि यस्य सोऽपि नीलवृष उक्तो मात्स्यादौ । देवीपुराणे—

*चतस्रो वत्सिका भद्रा द्वे वा संभवतोऽपि वा ।

यत्तु—पठन्ति—

वृषोत्सर्जनवेलायां (१)वृषाभावे कथंचन ।
मृद्भिः पिष्टैश्च दर्भैर्वा वृषं कृत्वा विमोचयेत् ॥
न शक्यते वृषोत्सर्गो होमं वा तत्र कारयेत् ॥ इति,

तन्निर्मूलम् । तद्विधिर्हेमाद्रौ भट्टकृतौ च ज्ञेयः । अत्र देवयाज्ञिकेन वृषोत्सर्गात्पूर्वं पुरुषसूक्तेन विष्णुरूपिप्रेतोद्देशेन विष्णुतर्पणमुक्तम् । तत्र मूलं चिन्त्यम् ।

पारस्करः—

सव्येन पाणिना पुच्छं समालम्ब्य वृषस्य तु ।
दक्षिणेनाप आदाय सतिलाः सकुशास्ततः ॥
प्रेतगोत्रं समुच्चार्य अमुकस्मै इति ब्रुवन् ।
वृष एष मया दत्तस्तं तारयतु सर्वदा ॥
सहेम सतिलं भूमावित्युच्चार्य विनिक्षिपेत् ॥

उत्सृजेन्नीलकण्ठं वै कौमुद्याः समयागमे ।

इति शेषार्थम् । कौमुदी आश्वयुजी पूर्णिमा ।

चरणाश्च मुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णं तु तं नीलमिति निर्दिशेत् ॥

इति लक्षणान्तरम् । *चतस्र इति ।

अयं हि गोपो मदतः सर्वासां पतिरुत्तमः ।
तुभ्यं च ता मया दत्ताः पत्न्यः सर्वा मनोरमाः ॥

---

(१) 'वृषाभावः' ग० ।

तथा—

विधारयेन्न तं कश्चिन्न च कश्चन वाहयेत् ।
न दोहयेच्च ता धेनूर्न च कश्चन बन्धयेत् ॥

स्त्रीषु विशेषः संग्रहे—

पतिपुत्रवती नारी भर्तुरग्रे मृता यदि ।
वृषोत्सर्गं न कुर्वीत गां दद्याच्च पयस्विनीम् ॥

पतिपुत्रयोः *साहित्यं विवक्षितम् । अन्वारोहणेऽपि गोदानमेवेत्युक्तं प्राक् । आशौचान्तरेऽपि वृषोत्सर्गाद्यमासिकश्राद्धादि दद्यादेवेत्युक्तम् । क्रियानिबन्धे स्मृत्यन्तरे—

सूतके मृतके चैव द्वितीयं मृतकं यदि ।
पिण्डदानं प्रकुर्वीत वृषोत्सर्गं तथैव च ॥
न हन्यात्सू(१)तकं कर्म द्वादशैकादशाहिकम् ।
शुद्धो वा यदि वाऽशुद्धः कुर्यादेवाविचारयन् ॥ इति ।

अत्र पददानमुक्तं देवजानीये गारुडे एकादशाहं प्रकृत्य—

तदाहि दीयते (२)सर्वं द्वादशाहे विशेषतः ।
पदानि सर्ववस्तूनि वरिष्ठानि त्रयोदश ॥
यो ददाति मृतस्येह जीवतोऽप्यात्महेतवे ।
सुखी भूत्वा महामार्गे वैनतेय स गच्छति ॥

इति मन्त्रो बहुगोपक्षे एकाद्यपक्षेऽनूह्य इत्येके । एकगोयुक्तप्रयोगस्य बहुगोयुक्तप्रयोगेन प्रकृतिविकृतित्वाभावात् । 'व्रीहीणां मेध' इत्यस्य यवप्रयोग इवास्यापि लोप इत्यन्ये । *साहित्यमिति । अत्राहुः-सत्यपि वृषोत्सर्गाधिकारिणि पुत्रे भर्तृसमक्षं मृतायां यदि न वृषोत्सर्गः, तदा सुतरां पुत्राभावे, भर्तृसमक्षमृतेरेव तदकरणप्रयोजकत्वात् "अपि पुत्रवती नारी" इति पाठान्तराच्च । तस्मात्सा-

---

(१) 'सूतके' ग० । (२) 'सर्वैः' ग० ।

तथा—

आसनोपानहौ छत्रं मुद्रिका च कमण्डलुः ।
(१)भाजनं भोजनाधारो वस्त्राण्यष्टविधं पदम् ॥

तथा—

भाजनासनदानेन मुद्रिकाभोजनेन च ।
महिषीरथगोदानात्सुखी भवति निश्चितम् ।
सर्वोपस्करयुक्तानि पदान्यत्र त्रयोदश ॥
यो ददाति मृतस्येह जीवन्नप्यात्महेतवे ।
स गच्छति परं स्थानं महाकष्टविवर्जितः(२) ॥
*त्रयोदश पदानीत्थं प्रेतायैकादशेऽहनि ।
दातव्यानि यथाशक्ति तेनासौ प्रीणितो भवेत् ॥
अन्नं चैवोदकं चैवोपानहौ च कमण्डलुः ।
छत्रं वस्त्रं तथा यष्टिं लोहदण्डं तथाष्टमम् ॥
अग्नीष्टिकां च दीपं च तिलांस्ताम्बूलमेव च ।
चन्दनं पुष्पदानं चोपदानानि चतुर्दश ॥
योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत् ।
स्वमहिम्नोऽनुसारेण तत्तत्सुखमवाप्नुयात् ॥ इति ।

अत्र मूलं चिन्त्यम् ॥

अथ शय्यादानम् । हेमाद्रौ भविष्ये—

तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ।
दन्तपत्रचितां रम्यां हेमपट्टैरलंकृताम् ॥
हंसतूलीप्रतिच्छन्नां शुभगण्डोपधानिकाम् ।

हित्यं न विवक्षितमिति । *त्रयोदशेति । अशक्तौ तु—

त्रयोदश तथा पञ्च तत्र त्रीणि यथाक्रमम् ।

---

(१) 'भोजनं' ग० ।

(२) चतुःषष्टिपदान्याद्ये द्वात्रिंशन्मध्यमे पदम् । षोडशापि कनिष्ठे स्युस्त्रयोदश त्वनाद्यके ॥ एवं निर्णयामृते इत्येकस्मिन्पुस्तकेऽधिकम् ।

प्रच्छादनपटीयुक्तां गन्धधू(१)पादिवासिताम् ।
तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितम् ॥
अत्र हरिस्थाने प्रेतम् ।
उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ।
ताम्बूलं कुङ्कुम(२)क्षोदं कर्पूरागरुचन्दनम् ॥
दीपिकोपानहच्छत्रं चामरासनभाजनम् ।
पार्श्वेषु स्थापयेद्भक्त्या सप्त धान्यानि चैव हि ॥
शयनस्थस्य भवति यदन्यदुपकारकम् ।
भृङ्गारकरकाद्यं तु पञ्चवर्णवितानकम् ॥
मन्त्रस्तु—
यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥
अर्घं तदेव ।
दत्त्वैवं तस्य सकलं प्रणिपत्य विसर्जयेत् ।
एकादशाहेपि तथा विधिरेष प्रकीर्तितः ॥
विशेषं चात्र राजेन्द्र कथ्यमानं निशामय ।
तेनोपभुक्तं यत्किंचिद्वस्त्रवाहनभाजनम् ॥
यद्यदिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् ।
तमेव पुरुषं हैमं तस्यां संस्थापयेत्तदा ॥
पूजयित्वा प्रदातव्या मृतशय्या यथोदिता ॥
पाद्मे—
मृतकान्ते द्वितीयेऽह्नि शय्यां दद्यात्सु(३)लक्षणाम् ।
काञ्चनं पुरुषं तद्वत्फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदांपत्यं नानाऽऽभ(४)रणभूषितम् ।

---

(१) 'धूपादि' क० । (२) 'क्षोदक' क० ।
(३) 'संलक्षणाम्' ग० । (४) 'मणिविभू' ग० ।

उपवेश्य तु शय्यायां मधुपर्कं ततो (१)ददेत् ॥
रजतस्य तु पात्रेण दधिदुग्धसमन्वितम् ।
*अस्थि लालाटिकं गृह्य सूक्ष्मं कृत्वा सपायसम् ॥
भोजयेद्द्विजदांपत्यं विधिरेष सनातनः ।
एष एव विधिर्दृष्टः पार्वतीयैर्द्विजोत्तमैः ॥

एतत्प्रतिग्रहे तत्रैवोक्तम्—

गृही(२)तायां तु तस्यां वै पुनः संस्कारमर्हति ।

शय्यादानफलं भविष्ये—

स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा ।
सुखं वसत्यसौ जन्तुः शय्यादानप्रभावतः ॥
आभूतसंप्लवं यावत्तिष्ठत्यातङ्कव(३)र्जितः ॥ इति ।

अथोदकुम्भः । हेमाद्रौ स्मृतिसमुच्चये—

*एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः ।
दिनेदिने प्रदातव्यो यावत्संवत्सरं सुतैः ॥

इति द्रष्टव्यम् । *अस्थीति । अयं पार्वतीयाचारोऽन्यदेशीयानां निन्द्यः । एतद्वचनानां निर्मूलत्वमिति धार्मिकाः । अन्तरितमुत्क्रान्तिधेनोर्वैतरण्याश्च दानम् एवमासनस्य ताम्रादिभाजनस्योदकुम्भस्य महिष्या गन्ध्या हिरण्यस्य कार्पासस्य सप्तधान्यानां भुवः गोर्घृतस्य शालग्रामस्य रुद्राक्षस्य वेदपुराणस्मृत्यादिपुस्तकस्य चैवज्ञातीयस्य प्रेतकल्पोक्तस्य दानमपि अमुकस्मै इत्येकोद्देशेन क्रियमाणे बहूनां नामभिः एकादशेऽन्हि कुर्वन्ति । *एकादशाहादिति । वर्षान्तसापिण्डनपक्षे ।

प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता ।
क्षुत्तृष्णे प्रत्यहं तत्र यतो हि भृगुनन्दन ॥

---

(१) 'वदेत्' ग०। (२) 'गृहीत्वा मृतशय्यां' इति पाठः।
(३) 'वर्जितम्' ग०।

लौगाक्षिः—

*यस्य संवत्सरादर्वाक् सपिण्डीकरणं भवेत् ।
मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम् ॥

उत्तरार्धे—

तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजे ।

इति याज्ञवल्क्यपाठः । सपिण्डनापकर्षेऽस्यापकर्षप्राप्तेर्बाधकमिदमिति शूलपाणिः । तन्न, प्रकृतिविकाराभावेन तदन्तन्यायाविषयत्वात् । मात्स्ये—

यावदब्दं च यो दद्यादुदकुम्भं विमत्सरः ।
प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् ॥

केचित्त्रयोदशाहमारभ्याहु*स्तन्निर्मूलम् ॥ अ(१)त्र देवयाज्ञिकः-'सपिण्डनापकर्षे संवत्सरं यावदुदकुम्भं अर्वागेव दद्यात नोर्ध्वम्'

प्रेतलोकगतस्यान्नं सोदकुम्भं प्रयच्छत ।

इति गोविन्दराजधृतविष्णूक्तेः ।

अन्नं चैव स्वशक्त्या तु संख्यां कृत्वाब्दिकावधि ।
दातव्यं ब्राह्मणे स्कन्द घटादौ निष्क्रयं तु वा ॥
अपि श्राद्धशतैर्दत्तैरुदकुम्भं विना नराः ।

तदर्थमिह दातव्यं जलान्नमभिवत्सरम् ।

इति च । द्वादशाहादौ सपिण्डनपक्षे ऽपि षोडशश्राद्धापकर्षवन्नास्यापकर्षः, "श्राद्धानि षोडशादत्वा" इतिवद्वचनाभावात् । प्रत्युतानपकर्षमेवाह—*यस्येति । पूर्वार्द्धे च—

अर्वाक् सपिण्डीकरणं यस्य संवसराद्भवेत् ।

इति पाठः । *तन्निर्मूलमिति । एकादशाहात्प्रभृति कर्तव्ये उदकुम्भश्राद्धे मासिकसपिण्डनयोः प्रेतस्य अनुमासिके अन-

---

(१) 'अत्र' नास्ति क० ग० ।

दरिद्रा दुःखिनस्तात भ्र(१)मन्ति च भवार्णवे ॥
तेनापकृष्य दातव्यं प्रेतस्याप्युदकुम्भकम् ॥

इति गोभिलभाष्ये स्कान्दाच्च सपिण्डनात्प्रागेव तस्य विधानादूर्ध्वं निषेधादित्याह । तन्न, उदकुम्भे पार्वणविधिनानुपपत्तेरेवं व्याख्यायां मानाभावान्मिताक्षरादिविरोधाच्च । वचनं यदि समूलं तदा *वृद्धावपकर्षं विधत्ते,

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा ।

इति हेमाद्रौ शाट्यायनोक्तेः । 'तस्याप्यन्नं सोदकुम्भम्' इति याज्ञवल्क्यविरोधाच्च ।

मदनरत्ने गौतमः—

अदैवं पार्वणं श्राद्धं सोदकुम्भमधर्मकम् ।
कुर्या*त्प्रत्याब्दिकाच्छ्राद्धात्संकल्पविधिनाऽन्वहम्॥

अधर्मकं *ब्रह्मचर्यादिनियमहीनम् । *एतन्मासिकवदे-

न्तरमृतस्य च ब्राह्मणायैवं उदकुम्भं दद्यात् न तु पृथगुदकुम्भश्राद्धमिति तु ध्येयम् । *वृद्धाविति । एतच्च न सपिण्डनानिमित्तापकर्षविधायकं, याज्ञवल्क्यवचनविरोधात् । किन्तु यदा कदापि सपिण्डने प्रत्यहं सोदकुम्भान्नदानाशक्तेः नैकस्मिन्नेव दिने आमेन तन्निष्क्रयेण वाऽपकृष्यापि तावत् कर्तव्यमित्येवमर्थमित्यन्ये । *प्रत्याब्दिकात् । आप्रत्याब्दिकात् । सङ्कल्पविधिश्च—

सङ्कल्पं तु यथा कुर्यान्न कुर्यात्पात्रपूरणम् ।
नावाहनाग्नौकरणे न पिण्डान् विकिरं नच ॥

इत्यादि । *ब्रह्मचर्यादीति । कर्तृभोक्त्रोरित्यादि । सपिण्डनात्प्राक् क्रियमाणस्य तस्यैकोद्दिष्टत्वात् तदुत्तरं क्रियमाणपार्वणत्वाह—*एतदिति । "पार्वणं वा" इति यथाश्रुतार्थं दूषयन्ने-

---

(१) 'भवन्ति' क० ।

कोद्दिष्टं पार्वणं वा कार्यम् । *अपरार्कस्तु—

सपिण्डीकरणे वृत्ते पृथक्त्वं नोपपद्यते ।
पृथक्त्वे तु कृते पश्चात्पुनः कार्या सपिण्डता ॥ इति ।

लघुहारीतोक्तावपि—

*तस्याप्यन्नं सोदकुम्भं देयं संवत्सरं द्विजे ।

इति याज्ञवल्कीये तस्येत्येकत्वोक्तेः सपिण्डनोत्तरमप्येकोद्दिष्टमेवेत्याह । अत्र पिण्डदानं कृताकृतम्, 'अहरहरन्नम*स्मै ब्राह्मणायोदकुम्भं च दद्यात्पिण्डमप्येके निपृणन्ति' इति हेमाद्रौ पारस्करोक्तेः । श्राद्धाशक्तौ पिण्डमात्रमिति गौडाः । तन्न, अपिशब्दबाधापत्तेः । हारीतः—

मृते पितरि वै पुत्रः पिण्डमब्दं समाचरेत् ।
अन्नं कुम्भं च विप्राय *प्रेतनिर्देशधर्मतः ॥

*प्रेतशब्दोच्चारणेनेति हलायुधः । यद्वा प्रेतस्य निर्देशो यत्र तदेकोद्दिष्टं तद्धर्मकमित्यर्थः । अन्नाशौचान्तदिनाब्दान्तं यावद्वत्सरपूर्तेः शौचं नाधिकारिविशेषणम् । तेन मृतिदिनमारभ्यैतत्कार्यमिति केचित् । तन्न, हेमाद्रिधृतवचोविरोधात् । मध्ये आशौचादिना बाधे तु लोप एव दार्शवत् ।

वाह—*अपरार्केत्यादि । *तस्यापीति । यथानन्तरमृतस्यैकमृतस्यैवोद्देश्यत्वं न्याय्यमिति भावः । *अस्माइति । एकवचनस्य विवक्षितत्वात्सपिण्डनात् प्राक् प्रेतशब्देन पश्चात्त्वनुमासिकवत् पितृशब्देन नतु प्रेतशब्देन । एवञ्च पूर्ववाक्ये पार्वणश्राद्धमित्यस्य पार्वणविधिना प्रेतशब्दं विहायेति यावत् श्राद्धमित्यर्थः । अत्रोत्तरत्र चान्नमुदकं चेत्यभिधानात्सोदकुम्भादिपदेन प्रधानगुणभावविवक्षा । तेनैष उदकुम्भः इदमन्नमिति पृथगेव त्यागः । *प्रेतनिर्देशधर्मत इति । प्रेतशब्देन प्रेतोद्देश्यत्वरूपधर्मेणेत्यर्थः ।

तथा प्रथमाब्दे दीपदानमुक्तम् देवजानीये गारुडे—

प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः ।
यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया ॥
प्राङ्मुखोदङ्मुखं दीपं देवागारे द्विजालये ।
कुर्याद्याम्यमुखं पित्र्ये आद्रिः संकल्प्य सुस्थि(१)रम् ॥

अथ मासिकानि । *तानि च कृत्वैव सपिण्डनं कार्यम् । तथा च गोभिललौगाक्षी—

श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिण्डनम् ।
श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ॥

तानि त्वाह जातूकर्ण्यः—

*द्वादश प्रतिमास्थानि आद्यषाण्मासिके तथा ।
त्रैपाक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश ॥

आद्यषाण्मासिकाब्दिकशब्दाः *ऊनमासिकोनषष्ठोनाब्दिकपराः । हेमाद्रौ तु—

सपिण्डीकरणं चैव इत्येतच्छ्राद्धषोडशम् ।

---

*प्रेतेति । धर्मपदवैयर्थ्यापत्तिरस्वरसः । *तानिचेति अकृतनवश्राद्धादिकस्य न मासिकेष्वधिकारः,

नवश्राद्धादिश्राद्धानि न कृतानि तु यस्य वै ।
नाधिकारी भवेत्तत्र मासषाण्मासिकाब्दिके ॥

इति वचनात् । *द्वादशप्रतिमास्थानीति । मासश्च मृततिथिं गृहीत्वा चान्द्रत्रिंशत्तिथिसमुदायः । अवयवपिण्डे जाते यदि नवश्राद्धमात्रमन्तरितं करोति तदा एकादशाहे तदीयगौणकाले वा तत्कार्यम् । तत्र च नाशौचं, कर्मणो वृत्तत्वात् । अन्यथा एकादशाहे अन्तरितनवश्राद्धकरणे तत्प्रसङ्गात् । इदानीन्तनाचारसंवादिपक्षमाह—*ऊनमासिके इति । द्वादशाहे इत्यर्थः,

---

(१) 'सुस्थितम्' ग० छ० ।

इत्युत्तरार्धे पाठः । तदा आद्यमूनमासिकं द्वादशाहे, षाण्मासिके उनषष्ठोनाब्दिके इत्यर्थः । कात्यायनस्त्वन्यथाह—

द्वादश प्रतिमास्यानि आद्यषण्मासिके तथा ।
सपिण्डीकरणं चैव इत्येतच्छ्राद्धषोडशम् ॥
एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः ।
न्यूनः संवत्सरश्चैव स्यातां षण्मासिके तदा ॥

द्विवचनादूनषष्ठोनाब्दिके इत्यर्थमाह पृथ्वीचन्द्रः । व्यासस्त्वन्यथाह—

द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके ।
श्राद्धान्येषोडशैतानि संस्मृतानि मनीषिभिः ॥

द्वादशाहपदमूनमासिकपरं तस्य द्वादशाहेप्युक्तेरिति कालादर्शः । मदनरत्ने ब्राह्मे त्वन्यथोक्तम्—

नृणां तु त्यक्तदेहानां श्राद्धाः षोडश सर्वदा ।
चतुर्थे पञ्चमे चैव नवमैकादशे तथा ॥
ततो द्वादशभिर्मासैः श्राद्धा द्वादशसंख्यया ॥ इति ।

चतुर्थादीनि दिनानि । भविष्ये त्वन्यथोक्तम्—

अस्थिसंचयनं श्राद्धं त्रिपक्षे मासिकानि तु ।
रिक्तयोश्च तथा तिथ्योः प्रेतश्राद्धानि षोडश ॥ इति ।

रिक्तयोस्तिथ्योरित्यूनषष्ठोनाब्दिकपरमिति हेमाद्रिः । अत्र देशकुलशाखाभेदाद्व्यवस्थेति सर्वनिबन्धाः।गालवः—

ऊनषाण्मासिकं षष्ठं मासे वाप्यूनमासिकम् ।
त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा ॥

ऊनमासिके तु गोभिलः—

मरणाद्द्वादशाहे स्यान्मास्यूने चोनमासिकम् ॥

मदनरत्ने कालादर्शे च श्लोकगौतमः—

एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा ।

आद्यान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः ॥

क्रियानिबन्धे क्रतुस्तु--

सार्धे एकादशे मासे सार्धे वै पञ्चमे तथा ।
ऊनाब्दमूनषण्मासं भवेतां श्राद्धकर्मणि ॥

इत्युक्तं, तत्र मूलं चिन्त्यम् ।

ऊनेषु वर्ज्यान्याह मरीचिः—

*द्विपुष्करे च नन्दासु सिनीवाल्यां भृगोर्दिने ।
चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे ॥

गालवः—

त्रिभिर्वा दिवसैरूने त्वेकेन द्वितयेन वा ।
आद्यादिषु च मासेषु कुर्यादूनाब्दिकादिकम् ॥

*एकन्यूनपक्षे पञ्चम्यां मृतस्य तृतीयायां त्रिभिर्न्यूने प्रतिपदि द्व्यूने द्वितीयायामिति केचित् । माधवस्तु—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा ॥

इति पैठीनसिवाक्ये *ऊनषाण्मासिकं सप्तममासगत

ऊने मासि द्वादशाहे वा तस्य कर्त्तव्यत्वात् । आद्यमैकादशाहिकं षण्मासे ऊने षष्ठे मासे मासिकाब्दे ऊनमासिकस्य ऊनाब्दे । मासिकैः सह द्वादशाहरूपकालो जातूकर्ण्यादिशेषः । रिक्तत्वमेकतिथिन्यूनत्वम् । *द्विपुष्करे चेति । गार्ग्योऽपि-

नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ।
ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥ इति ।

निषेधश्च द्वित्रिदिनन्यूनपक्षे । अत्र "एकाहेन तु षण्मासाः" इत्यादिवाक्यान्तरे चोनत्वोक्तेः फलितमाह-*एकेति । मासः आद्यमृताहं गृहीत्वोत्तरमृताहपूर्वतिथिपर्यन्तत्रिंशत्तिथिसमुदायः, तथैव लोकप्रसिद्धेः । तस्यैकाहन्यूनता उपान्त्यातिथावेव, अन्त्यायां पूर्तेः । एवं त्र्यहन्यूनताप्यन्तपूर्वचतुर्थ इति । *ऊनेति ।

*मृताहात्पूर्वेद्युः कार्यम्, ऊनाब्दिकं तु द्वितीयाब्दे मृताहदिनात्पूर्वेद्युः कार्यमित्यर्थमाह। पूर्वेद्युर्मृताहादित्यर्थः,'मासिकानि स्वकीये तु दिवसे' इत्युक्तेः। *इदमेव युक्तम्। मदनरत्नेप्येवम्। याज्ञवल्क्यः—

मृतेऽहनि तु कर्तव्यं प्रतिमासं तु *वत्सरम्।

षाण्मासिकाब्दिकशब्दयोरूनषाण्मासिकोनाब्दिकपरत्वात्। *मृताहादिति। मृताहपूर्वतिथीत्यर्थः। पूर्वमतेऽस्वरसं सूचयति—*इदमेवेति। एकाहन्यूनतापक्षेऽमान्ततन्मासान्त्यतिथावेव करणम्, अन्यथा पैठीनसिवचनविरोधात्। किञ्च अन्त्यतिथ्यन्त्यक्षण एव मासपूर्तेर्यदेकातिथ्यभावप्रयुक्ता मासस्यैकाहन्यूनता तस्यां तिथाविति एकाहन्यूनता लभ्यते उपान्त्यतिथौ तु तत्करणे द्व्यहन्यूनता स्यात्। यत्तिथित्रयाभावप्रयुक्ता त्र्यहन्यूनता तन्मध्ये प्रथमतिथाविति त्रिभिर्न्यून इत्यस्येति। अत्रोक्तं मयूखे—सत्यमन्त्यतिथ्यन्तक्षण एव मासपूर्तिः। परन्तु षष्ठ्यां मृतस्य पञ्चम्यां माससमाप्तिर्न तु षण्मासा इति जातूकर्ण्येनापि एकाहेन न्यूनइत्यनेनैकाहरहितमासस्यैव ऋतुतया प्रतिपादनात् दर्शितवक्रपरिष्कारस्याप्रामाणिकत्वात्।

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते।

इति पैठीनसिवाक्ये माससमाप्तेः पूर्वेद्युरित्यर्थो नतु मृताहात् पूर्वेद्युरिति, ऊनानां मृताहकर्त्तव्यताया अप्रसक्तत्वेन तदुक्तिवैयर्थ्यात्। एवं च "एकाहेन तु षण्मासाः" इत्यादौ "एकद्वित्रिदिनैरूने" इत्यादौ "पूर्वेद्युरेव ते" इत्यादौ च अहरादिपदस्य तिथिपरत्वे प्रमाणाभावाद्यथामासिकादीनामूनैरेकाहोव्यवधानं भवति तथा तत्कालो ग्राह्य इति। *वत्सरामिति। यावदिति शेषः। मासे भवं मासिकमित्येव मासिकाद्यमासिकादिशब्दव्युत्पत्तिः। नचैवं समुदायान्तर्गततया किञ्चित्तिथौ तत्करणे मासिकत्वं स्यात्

अत्रा*द्यमासिकमा*द्याब्दिकं *चैकादशेऽहीति निर्णयामृतादयः ।

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति ॥

इति गोभिलीयं च *तद्विषयमाहुः । *अन्ये तु 'मासपक्षतिथिस्पष्टे' इत्यादि *विरोधादाब्दिकं *वर्षान्ते एव । मासिकं तु मासादौ । द्विरावृत्तिस्तु एकादशाहिकाद्यमासिकपरा । देवयाज्ञिकोप्येवमाह । लौगाक्षिरपि—

मासादौ मासिकं कार्यमाब्दिकं वत्सरे गते ।

ज्योतिष्टोमादेर्वसन्तकालत्ववदापरपाक्षिकत्ववच्छाद्धस्येति वाच्यं, प्रथमातिक्रमे कारणाभावात् "मृतेहनि तु कर्तव्यम्" इति वचनाच्च तत्तन्मासाद्यतिथावेवाद्यमासिकादेः सिद्धेः । एवञ्च मृततिथावेवाद्यमासिकस्य कर्त्तव्यत्वे प्राप्ते तदुत्कर्षमाह—*आद्यमिति । *आद्याब्दिकं चेति । वर्षे भवं वार्षिकमिति व्युत्पत्तौ प्रथमातिक्रमे कारणाभावात् प्रतिसंवत्सरं चैवमित्यत्र मृताहनि इत्यनुवृत्तेश्च मरणोत्तरमेव प्राप्तमाद्यवार्षिकमाद्यमित्यनेनोत्कृष्यते तस्याप्याद्यत्वाद्विशेषानुक्तेश्चेयर्थः । *एकादशेऽहनि । आशौचोत्तरदिने । *तद्विषयमिति । आद्याब्दिकाद्यमासिके महैकोद्दिष्टेन सह तन्त्रेण कार्ये इति तु मयूखे । मलमासमृतस्याद्याब्दिकं तु तत्र प्रथमदिने प्राप्तमप्येकादशेऽह्नयेव, दाहादिसपिण्डनान्तकर्मणो मलमासे प्रतिप्रसूतत्वात् । द्वितीयाद्यदिनकर्तव्यतया विहितं शुद्धमास एव । इदानीन्तनाचारसंवादिमतमाह—*अन्ये त्विति । *विरोधादिति । तथाभूतमासादिना मृततिथिसाजात्यम् । तद्वत्येवोत्पन्नस्याब्दिकस्य तन्निरूपकमरणतिथौ करणे तद्विरोधः । वार्षिकत्वं तस्य दर्शयति—*वर्षान्ते इति । वर्षान्ते भवं वार्षिकं नतु वर्षे भवम्, सपिण्डनं विधाय "अत ऊर्ध्वं संवत्सरे वत्सरे प्रेता-

आद्यमेकादशे कार्यम*धिके त्वधिकं भवेत् ॥

दीपिकायां तु—'*आद्यं रुद्रमितेऽर्कसंमितदिने वा स्यात्' इत्युक्तम् । गौडास्तु मृततिथ्यवधिके एकदिनाधिके । *माससंवत्सरपदं गौणम् । *पूर्णेब्दे इति ईष-

---

द्यान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात्" इति गोभिलवचनात् । एवञ्च मरणतिथावप्राप्तस्य नैकादशेऽन्हि उत्कर्षः नापि एकस्यैवाब्दिकस्यैकादशेऽन्हि प्रेतदैवत्यं द्वितीयादितत्तिथौ पितृत्वप्राप्तेस्तदैवत्यमिति वैरूप्यम् । *अधिके इति । मलमासमृते तु मरणादेकादशेऽह्नि अधिकाद्यं कृत्वा स्वकाले ऊनं कुर्यात् । 'षष्ठ्या तु दिवसैर्मासे' इत्युक्तावपि "अधिके त्वधिकं भवेत्" इति दर्शनान्मासिकेषु त्रिंशत्तिथीनामेकमासत्वात् । ततः शुद्धमासादौ द्वितीयाद्यं कृत्वा त्रैपक्षिकं ततो द्वितीयमासिकम् । एवं सति—

मलमासमृताद्यां तु सौरं मासं समाश्रयेत् ।

इति वचोनुगृहीतमाब्दिकं सुकरम् । द्वितीये मलमासे तु एकादशेऽह्नि आद्यमासिकं स्वकाले चोनमासिकं कृत्वा मलेऽधिकमासिकं कृत्वा त्रैपक्षिकं, ततो द्वितीयमासिकम् । एवं च यत्र षष्ठ्यादशौ मलमासौ तत्र तयोराधिकमासिकं कृत्वा तदुत्तरयोः षष्ठ्यादशमासिके तत ऊनषाण्मासिकोनाब्दिके अधिकमासस्य पूरणप्रत्ययान्तेनाव्यवहारात् । *आद्यामिति । तन्मासादिस्पृष्टाहः तेन मरणतिथेरपि संग्रहो दुर्वारः, तथाभूतेत्यनेन तद्भेदालाभात् , "आब्दिकं वत्सरे गते" इति लौगाक्षिवाक्येऽप्यगते इति च्छेदाच्च । तस्माद्वर्षेभवमित्येव व्युत्पत्तिर्नतु वर्षान्तेभवमित्याशयः । *माससंवत्सरपदमिति । प्रथममासिकप्रथमसांवत्सरिकादिप्रकृतिभूतमाससंवत्सरादिपदं तादृशमासे तदुघटितवत्सरे च लाक्षणिकमित्यर्थः । द्वितीयादिमासवर्षयोस्तत्रानुपपत्तेरिति शेषः । मृततिथेर्मृततिथिं यावत्त्रिंशत्तिथ्यात्मको मास इति लक्षणेऽपि दर्शश्राद्धव-

दसमाप्तपरत्वमिति शूलपाणिः । *तेन द्वितीयमासादावाद्यमासिकादीति तन्मौर्ख्यकृतम् ।

अशक्तौ तु हारीतः—

मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति ।
द्वादशाहेन वा भोज्या एकाहे द्वादशापि वा ॥

*ऋतुं प्रति द्वेद्वे इत्यर्थः । *यदा पितुर्मरणात्त्रयोविंशतितमे दिने *दर्शो वृद्धिर्वा स्यात्तदा *द्वादशादिनेषु द्वादशमासिकानि कार्याणीत्यर्थः । त्रैपक्षिकं तु त्रिपक्षेऽतीते मृताहे कार्यम्,

---

दवधौ पञ्चमीतिवन्मृततिथेर्न मासान्तर्गतत्वम्, एवं त्रिपक्षशब्दोऽपि तादृशपञ्चचत्वारिंशत्तिथिरूपसार्धमासवाची । नन्वेवं द्वितीयवर्षाद्यदिने सापिण्डीकरणप्रसङ्ग इत्यत आह—*पूर्णे इति । *तेनेति । आदिना आद्याब्दिकं द्वितीयवर्षाद्यतिथौ कार्यमित्यस्य ग्रहः । अत्राद्याब्दिकस्य द्वितीयवर्षाद्यतिथौ कर्तव्यत्वेपि आद्यमासिकस्य द्वितीयमासाद्यतिथौ कथं करणं तत्राद्यमासत्वाव्यवहारात् आद्यमासो गत इति व्यवहाराच्चेत्यस्वरसः । अपर्याप्तौ प्रतिमासं श्राद्धकरणाशक्तौ ऋतुं प्रतीत्यस्यार्थमाह—*ऋतुमिति । मुख्यस्य चान्द्रस्य सौरस्य वा नेह ग्रहणम्, असम्भवात्; किन्तु मृततिथिमारभ्य त्रिंशत्तिथिरूपमासद्वयम् तथाचैकं मृताहमतिक्रम्य तदुत्तरमृताहेऽतिक्रान्तं प्राप्तकालं चेति श्राद्धद्वयं कार्यमित्यर्थः । एवं करणे क्वचित्त्रयमपि। यथा एकादशे आद्यं, स्वकाले ऊनं, द्वितीयमासिकत्रैपाक्षिकाभ्यां सह तृतीयं मासिकं, चतुर्थेन सह पञ्चमं, षष्ठेनषाण्मासिकाभ्यां सप्तमम्, अष्टमेन नवमं,दशमेनैकादशं,द्वादशेनोनाब्दिकमिति । सपिण्डनापकर्षपक्षे पक्षद्वयं द्वादशाहेन वेत्यनेनोक्तं, तत्राद्यपक्षविषयमाह—*यदेति । *दर्श इति । तत्राहिताग्नेः पितृयज्ञार्थं सपिण्डनस्यावश्यकत्वात् । *द्वादशादिनेषु

त्रैपक्षिकं भवेद्वृत्ते त्रिपक्षे तदनन्तरम् ।

इति भविष्योक्तेरिति मदनरत्ने उक्तम् । पृथ्वीचन्द्रकालादर्शनिर्णयामृतादयस्तु—

ऊनान्यूनेषु मासेषु विषमाहे समेपि वा ।

त्रैपक्षिकं त्रिपक्षे स्यान्मृताहे त्वितराणि तु ॥

इति कार्ष्णाजिनिस्मृतेः पूर्वत्र वृत्ते प्रवृत्ते इत्यर्थमाहुः । ते तदनन्तरशब्दविरोधात् त्रैपक्षिकद्वितीयमासिकयोः संकरापत्तेरेवं व्याख्यायां मानाभावाच्चोपेक्ष्याः । त्रिपक्षसपिण्डने त्वेवंशब्दाभावादधिकरणत्वमेव ज्ञेयम् । यत्तु क्रियानिबन्धे गारुडे—

त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते विषमे दिने ।

मासिकान्यपि चोनानि अष्टाविंशतिमे दिने ॥ इति, तन्निर्मूलम् । स्मृतिरत्नावल्याम्—

द्वादशाहे यदा कुर्यात्पितुः पुत्रः सपिण्डनम् ।

एकादशेऽह्नि कुर्वीत प्रेतश्राद्धानि षोडश ॥

पैठीनसिः—

सपिण्डीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश ।

एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥

द्वादशमासिकानीति । मध्यवर्तीनि ऊनमासिकादीन्यपि ग्राह्याणि । ततश्चैकादशाहे आद्यं, तदुत्तरदिने ऊनं द्वितीयं च, तदुत्तरदिने त्रैपक्षिकं तृतीयं च, तदुत्तरदिनेषु चतुर्थपञ्चमषष्ठानि, तदुत्तरदिने ऊनषाण्मासिकं सप्तमं च, तत्तदुत्तरदिनेष्वष्टमनवमदशमैकादशानि, तदुत्तरदिने द्वादशमूनाब्दिकं चेति मरणदिनाद्द्वाविंशतिदिनानि गतानि । ततस्त्रयोविंशतितमे दिने सापिण्डनं कृत्वा पितृपङ्क्तिं वृद्धिं वा कुर्यात् द्वादशाहे सापिण्डने तु एकादशाहे एकाहे इत्यर्थः । तत्र तु द्वादशाहे एव मासिकान्यपि क्रियन्ते । तत्राद्यस्य

सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः ।
प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि ॥

मदनरत्ने कात्यायनः—

आद्यम*ग्निमतः कार्यं दाहादेकादशेऽहनि ।
ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा ॥

ध्रुवाणि त्रैपक्षिकादूर्ध्वानि । क्रियानिबन्धे गारुडे—

*त्रिपक्षात्पूर्वतः साग्नेर्भवेत्संस्कारवासरे ।
ऊर्ध्वं मृतदिनेऽनग्नेः सर्वाण्येव मृताहनः ॥

*एतानि च *यदा सपिण्डनात्पूर्वं युगपत्कुर्यात्तदा देशकालकर्त्रैक्ये तन्त्रत्वादे*कः पाक इति केचित् । पाकभेद इति भट्टचरणाः । *अत्र केचिदाहुः—

पूर्वेऽह्नि जातत्वादूनमारभ्य पञ्चदशमासिकानि कार्याणि न षोडश । एवं यदा वृद्धिपूर्वादिनादौ सपिण्डनार्थं क्रियन्ते तदा स्वकालवाचिनौ न यदि तर्ह्यनर्थकौ तथात्वे सपिण्डनात्पूर्वं परस्ताद्वा सकृदेवानुष्ठानापत्तेः । *अग्निमत इति । आहिताग्नेरित्यर्थः ।

मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निभिः ।
दाहादूर्ध्वमशौचं स्याद्यस्य वैतानिको विधिः ॥

इति शाङ्खवचनात् एकादशपदं च नवश्राद्धादेरप्युपलक्षणम् । *त्रिपक्षादिति । त्रैपक्षिकान्तं पूर्वश्राद्धं दाहवासरमारभ्य भवेदित्यर्थः ।

ऊर्ध्वं त्रिपक्षाच्छ्राद्धं मृताहन्येव तद्भवेत् ।
अग्नस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः ॥

इति जातूकर्ण्यवचनात् । *एतानि चेति । षोडशश्राद्धानीति प्रकृतं । *यदेति । वृद्ध्यर्थं चोत्तराणि कुर्यादिति शेषः । *एकः पाक इति । एतच्च यावत्संन्निपाति आरादुपकारकं च तस्य तन्त्रत्वार्थम् । ये तु प्रधानयोर्विप्रभोजनपिण्डदानयोरपि तन्त्रं मन्यन्ते तन्मतं दर्शयति—*अत्र केचिदाहुरिति। प्रधा-

देशकालकर्तृदैवतैक्ये तन्त्रत्वात् श्राद्धकालातिक्रमापत्तेः,

*द्वादशाहेऽथ सर्वाणि संक्षेपेण समापयेत् ।
तान्येव तु पुनः कुर्यात्प्रेतशब्दं न कारयेत् ॥

इति कात्यायनोक्तेः,

नैकः श्राद्धद्वयं कुर्यात् समानेऽहनि कुत्रचित् ।

इत्यस्य दैवतैक्यपरत्वेऽप्यत्र तत्सत्त्वात्—

श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न कारयेत् ।

इति जाबाल्युक्तेः। *षोडशसंख्यायाश्च वाजपेये प्राजापत्ययागससदशत्ववत्सान्नाय्ययागाद्वित्ववच्च दर्शपातसंक्रान्तिश्राद्धवद्युगपदनुष्ठानेष्युपपत्तेः—'आद्यमासिकाद्यूनाब्दिकान्तेषु षोडशश्राद्धेषु क्षणः क्रियताम्' इत्येवं प्रयोगेणैको विप्रः पिण्डोऽर्घश्चेति । *विरुद्धविधिविध्वंसेप्येवम् । तन्मन्दम्,

द्वादशाहेन वा भोज्या*एकाहे द्वादशापि वा ।

इति हेमाद्रौ हारीतवचोविरोधात् । तेन विप्रभेदात् पिण्डार्घाद्यपि भिन्नमिति सिद्धम् ।

एतानि द्वादशाहादौ सपिण्डनात्पूर्वं कृतान्यपि वृद्धिं विनाऽपकर्षे पुनः स्वकाले कार्याणि,

---

नतन्त्रस्य वाचनिकत्वमप्याह—*द्वादशाहे इति । ननु प्रयोगैक्ये षोडशत्वव्याघात इत्यत आह—*षोडशेति। *विरुद्धविधीति । अथाहिताग्नेर्मरणादिनात् पञ्चमे मासि दाहः तदा षष्ठे मासि सपिण्डनं चेत् यानि सुकराणि तानि कृत्वा सापिण्डनमाग्दिने सर्वाणि कृत्वा सापिण्डनं तदा तस्मात्त्रैपक्षिकान्तं कृत्वा मृताहनि सप्तममासि तृतीयमासिकादि ऊनषाण्मासिकान्तानि । तत्रैकैकं, ततः शेषमप्यपकृष्य कुर्यात्, ततः सपिण्डनमित्याद्यूह्यम् । *एकाहे द्वा-

यस्य संवत्सरादर्वाक् सपिण्डीकरणं कृतम्।
मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम्॥

इति मदनरत्नेऽङ्गिरसोक्तेः। न चेदं मासिकानामपकर्षं *विधत्ते किंतु सपिण्डनोर्ध्वं स्वकालेऽनुष्ठानमेवेति वाच्यम्,

श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डताम्।

इति विरोधात्,

यस्य संवत्सरादर्वाग्विहिता तु सपिण्डता।
विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश॥

इति माधवीये गोभिलोक्तेश्च।

अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं कृतम्।
षोडशानां क्रियावृत्तिं कुर्यादित्याह गौतमः॥

इति तत्रैव गालवोक्तेः। षोडशत्वं चैकादशाहसपिण्डनपक्षे तत्राद्यमासिकस्य कालसत्त्वात्,अन्यपक्षे-

---

दर्शेति। अयं भावः—यत्र द्रव्यगता संख्या तत्र कर्मणस्तन्त्रत्वेऽपि न बाधः यथा "सप्तदश प्राजापत्यान्" इत्यादौ। यत्र तु कर्मगता संख्या तत्र कर्मणः तन्त्रत्वेऽपि संख्यायाः पृथक्त्वसन्निवेशित्वाद्बाधः यथा षोडशश्राद्धे। एकाहे द्वादश विप्रा भोज्या इति च भोजनरूपप्रधानपृथक्त्वे पर्यवसानादिति। एकाहश्चैकादशाहः उत्तरत्राद्यस्यैकादशे कृतत्वात्तं विनैवानुष्ठानं स्यात्। तदुत्तरदिने वा,

मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा।

इति वचनात्। यदातु तदुत्तरं वृद्ध्यादिवशादपकर्षः प्राप्तस्तदा मृताहे एव अवशिष्टानि कर्तव्यानि एकस्यापि तावत्स्वकालानुग्रहलाभात् इतरेषामपि मृताहसामान्यकालानुग्रहात्। मृताहालाभे तु सपिण्डनदिने एव, तन्निमित्तस्यापकर्षस्य तद्दिन एव कर्तुमुचितत्वात्। *विधत्ते इति। अन्यथोदकुम्भानामप्यपकर्षः

षु यथासंभवं ज्ञेयम् । यत्तु दीपिकायाम्—'अनुमासिकानि तु चरेत्तान्येव सापिण्ड्यतः पश्चात् द्वादश' इत्युक्तेरूनानां न पुनः कृतिरित्युक्तं, तदेतद्विरोधाच्चिन्त्यम्। यत्तु गौडाः—

सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधैः ।

इति शातातपोक्तेर्मासिकानां प्रेतत्वविमोक्षार्थत्वात्सपिण्डनापकर्षे तदन्तन्यायेन तेषामप्यपकर्षान्मासिकानां न पुनः कृतिः । यत्तु 'मासिकं चोदकुम्भं च' इति लौगाक्ष्यादिवचनं, तन्निर्मूलम् । समूलत्वेपि दार्शपरं चेत्याहुः । त उक्तवक्ष्यमाणवचोनिबन्धविरोधान्मूर्खा इत्युपेक्ष्याः । यत्तु मिताक्षरायां सपिण्डनोर्ध्वं स्वकाले एव कार्याणि अपकर्षस्त्वनुकल्प इत्युक्तम्, तदपि पूर्वविरोधाच्चिन्त्यम्। तेन वृद्धिं विनाऽपकर्षे पुनः *कृतिः।

अर्वाक्संवत्सराद्यस्य सपिण्डीकरणं भवेत् ।
प्रेतत्वमिह तस्यापि ज्ञेयं संवत्सरं नृप ॥

इत्यग्निपुराणात् । वृद्धिनिमित्तापकर्षे त्वस्त्येव तन्निवृत्तिः, अन्यथा वृद्ध्यसंभवादिति शूलपाणिः ।

काष्णाजिनिः—

*सपिण्डीकरणादर्वागपकृष्य कृतान्यपि ।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ॥

स्यात् । *कृतिरिति । प्रेतत्वपरिहारार्थमेव तत्करणादिति भावः । अत एवापकृष्य कृतानां स्वकाले पुनः क्रियमाणानां वृध्युपस्थितौ पुनरपकर्षमाह—*सपिण्डीति ।

सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम् ।
सांवत्सरविधानेन दद्यादित्याह शौनकः ॥

इति छन्दोगपरिशिष्टं तु येषामुत्तराक्रियाऽनावश्यिका ते-

निषेधं चाह कात्यायनः—

निर्वर्त्य वृद्धितन्त्रं तु मासिकानि न तन्त्रयेत्।
*अयातयामं मरणं न भवेत्पुनरस्य तु ॥ इति।

द्विरनुष्ठानं चोत्तरेषामेव, न पूर्वेषां स्वस्वकालकृतानाम्। तदाह माधवीये कार्ष्णाजिनिः—

अर्वाग्दग्धाद्यत्र यत्र सपिण्डीकरणं कृतम्।
तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिः ॥

हेमाद्रौ शाट्यायनिः—

प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणं तथा।
अपकृष्यापि कुर्वीत कर्तुं नान्दीमुखं द्विजः ॥

वृद्धिं विनापकर्षे दोषमाहोशनाः—

*वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्।
स श्राद्धी नरके घोरे पितृभिः सह मज्जति ॥ इति।

आधानेऽपकर्षमाह हेमाद्रावुशनाः—

पितुः सपिण्डीकरणं वार्षिके मृतिवासरे।
*आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् ॥

षां पुनःकरणं निषिध्यान्येषां तत्प्रापकम्। सांवत्सरं पार्वणम्। प्रागुक्तलघुहारीतं तु अशक्त्यारोपेणानावश्यकवृद्ध्यर्थं वा अपकर्षो न कार्य इति बोधयदेव वत्सरान्तान्यसपिण्डनकालानामनुकल्पत्वव्यञ्जकं। *अयातयामं नूतनम्। वृद्धिश्राद्धोत्तरं मासिकाकरणेऽस्य मरणं न नूतनं अन्यथा तु नूतनमिति परिग्रहः। *वृद्धिश्राद्धविहीनः तदुपस्थितिविहीनः। *आधानादीति। आदिना इष्टापूर्तिपरिग्रहः। यत्तु आधानाद्यङ्गभूतनान्दीश्राद्धाधिकारसिध्यर्थमयं सपिण्डनापकर्षः नान्दीश्राद्धस्य चापूर्वाधानेऽङ्गत्वं न पुनराधाने। तस्मात्पित्रादिमरणोत्तरं प्रथमाब्दे अपूर्वाधानसोमयागादि कार्यमिति। तदसत्, एतद्वाक्यस्यापूर्वाधाने प्रवृ-

विशेषस्तूक्तो विवाहनिर्णये। कण्वः—

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत्।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते॥

गारुडेऽपि—

आपदाद्यकृतं यत्तु कुर्यादूर्ध्वं मृतेऽहनि।

अथ सपिण्डीकरणम्। माधवीये हारीतः—

या तु पूर्वममावास्या मृताहादशमी भवेत्।
सपिण्डीकरणं तस्यां कुर्यादेव सुतोऽग्निमान्॥

त्तेरभावात् यथाचैतत्तथोक्तं—"पितुरब्दमशौचं स्यात्" इत्यत्र पुनराधाने च,

स्नानाधानविवाहेषु नान्दीश्राद्धं विधीयते।

इत्यविशेषेणैव पुनरुपनयनपुनर्विवाहयोरिव नान्दीश्राद्धस्याकृतया प्राप्तेः तत्रैवैतत्प्रवृत्तेरुपपत्तेः। इदं तु बोध्यं प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणादर्वाग् इति विध्योः "निर्वर्त्य वृद्धितन्त्रं तु" इति निषेधस्य च सामान्यरूपत्वेपि चौलोपनयनविवाहाधानेष्टापूर्तेष्वेव प्रवृत्तिः नतु गर्भाधानपुंसवनसीमन्तजातकर्मनामान्नप्राशनादिषु, दाक्षिणात्यानां तथैवाचारात्। जातकर्मादौ केषांचिदनुमासिकाद्यपकर्षाचारस्तु नादरणीयः, न्यायविरोधात्। यथा हि यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं विना क्षिपेत् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तस्मै भक्षं प्रयच्छेन्नसोममिति राजन्यवैश्यनिमित्तविहिते फलचमसे सोमाङ्गानां क्रयाभिषवादिविधीनां न प्रवृत्तिः नित्यानित्यसंयोगविरोधात्। नित्यस्य सोमधर्मस्य क्रयादेरनित्येन फलचमसेन संयोगः सर्वथा विरुद्धो नित्यक्रयादिभिर्ज्योतिष्टोमे उपकुर्यादनित्यफलचमसद्वारेति वाक्यार्थोपगमेन उपपन्न इति यावत्। तथात्रापि यतोऽनुमासिकापकर्षो मृताह एव कार्यः, एकस्यापि स्वकाललाभात्,

*मृताहादूर्ध्वं दशमी एकादशीत्यर्थः ।
सपिण्डीकरणं कुर्यात्पूर्ववच्चाग्निमान्सुतः ।
परतो (१)दशरात्राच्चेत्कुङ्कुरन्दोपरी*तरः ॥

इतरेषामपि मृताहरूपसामान्यकालानुग्रहात् नान्यतिथौ । तथाच जातकर्मादिष्वपि । अधिकृतस्यैवापकर्षेऽधिकारो नान्यस्य । नच जननात् प्राग् जातकर्माधिकारोऽस्ति येन सोऽपकर्षे स्यात् । जन्मोत्तरं जातकर्माधिकारे च सूतकेन प्रतिबन्धात्तन्निवृत्तावेकादशाहनियमेन मृताहासम्भवान्नित्यानित्यसंयोगविरोधः जातकर्मणि नित्यमपकर्षः कार्यः स चानियतमृताहप्राप्ताविति वाक्यार्थसम्भव इति यावत् । एवं गर्भाधाने षोडशादिनावधिऋतुकालेऽप्यनियत एव मृताहः । एवं नामकर्मणि । षष्ठे मास्यन्नप्राशनमित्यादौ प्रायशो मृताहसम्भवेऽपि यस्य मृताहो दर्शे तदुत्तरप्रतिपदि शिशोः षष्ठमासप्रवृत्तिः, तत्र मध्ये मृताहासम्भवादुत्तरे वर्षे मासस्यैव समासत्वान्न नियमेन मृताह इति न तत्रापकर्षः नापि वृध्युत्तरनिषेधप्रवृत्तिः । तृतीये वर्षे चौलमिति वर्षादिविहितचौलादिषु च नियमेन मृताहसम्भवात्तत्रैवापकर्षः । एवमनियतकालेष्विष्टापूर्तादिष्वपकर्षः नियमेन मृताहसम्भवात् । ननु वर्षाधिकारेऽप्युपनयनादौ अष्टमवर्षान्त्यकाले मुहूर्तो धृतः तन्मास एव कर्तुः पित्रादेर्मृतत्वात्सपिण्डनार्थमपक्वष्टानामपि मासिकानामुपनयने वृद्धिश्राद्धार्थमपकर्षे मृताहासम्भवात् पूर्वोक्तन्यायप्रवृत्तिर्दुर्वारेति चेत् ? ईदृशान्तिममुहूर्तनिश्चयस्य पुरुषापराधप्रभवत्वेन मृताहापकर्षकर्तव्यताविध्यविघातत्वात् । अतस्तत्र नवमवर्षे एवोपनयनं कार्यम् । तस्माच्चौलादिष्वेवापकर्षो न गर्भाधानादिषु । अत एव कालकाण्डहेमाद्रिप्रयोगपारिजातादिषु गर्भाधानाद्युल्लङ्घ्य चौलादिष्वेवापकर्षविधिवि-

(१) 'दशरात्रस्य पूर्णे त्वब्दे तथेतरे' क० २५० नि०

इति कार्ष्णाजिनिस्मृतेः । *आहिताग्नेस्तेन विना श्रौतपिण्डपितृयज्ञासिद्धेः । तदाह गालवः—

सपिण्डीकरणात्प्रेते पैतृकं पदमास्थिते ।
आहिताग्नेः सिनीवाल्यां (१)पितृयज्ञः प्रवर्तते ॥

मदनरत्ने प्रजापतिः—

*नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।

षयो दर्शित इति । आहिताग्नेः पुत्रस्य पित्रोः सपिण्डने कालत्रयं दर्शरूप एकादशाहः दशाहात् परं दर्शात् पूर्वं यत्किञ्चिद्दिनं द्वादशाहो वेति क्रमेण दर्शयति—*या त्वित्यादि । अत्र साग्निकपदान्याहिताग्निपराणि । तत्राग्निपदं विधुरान्याग्निपरं, विच्छिन्नाग्नेः पितृयज्ञस्याकर्तव्यत्वात् पार्वणश्राद्धस्यानावश्यकत्वाच्च । अनग्न्यादिपदान्यनाहिताग्निपराणि । *मृताहादिति । यदि तु मृताहादृशमी या रात्रिस्ततः परो दर्श इति व्याख्यायते तदा दशाहात् परो दर्शः कालो लभ्यते नान्यथा दर्शात्मकैकादशाहस्यानियतत्वात् । *इतरः अनाहिताग्निः । *आहिताग्नेरिति । औपासनाग्निमतस्तु दशाहान्तःपातिदर्शवत् पितृयज्ञलोपः नतु तस्य पितृयज्ञानुरोधादुक्तकाले सपिण्डनमपि । *नासपिण्ड्येति ।

पापी भवत्यकुर्वन् हि पितृहा चोपजायते ।

इत्युत्तरार्धेन स्मार्ताग्निमतः पितृयज्ञाकरणे पापाभावो ध्वन्यते । तस्योक्तकालाविधानात् । यथाऽनाहिताग्नेर्विहितो "यदहर्वा वृद्धिरापद्येत" इति कालः आहिताग्नेर्न प्रवर्तते एवमाहिताग्नेर्विहितकालोऽप्यनाहिताग्नेः, आहिताग्न्यधिकारिककालनियमाबाधवदनाहिताग्न्यधिकारिकतद्विषयमाबाधस्यैवौचित्यात् । अन्ये तु साग्निकेन पितृयज्ञाधिकारिणा सम्भवे आशौचोत्तरदिनमारभ्य द्वादशसु दिनेषु प्रोक्तरीत्या षोडशश्राद्धानि विधाय तदुत्तरादि-

---

(१) 'प्रेतयज्ञः' क०

अपरार्के कात्यायनः—

एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि ।
प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिण्डताम् ॥

आशौचान्तप्रथमदर्शयोर्मध्ये कस्मिंश्चिदह्नीत्यर्थः । पित्रादीनां सपत्नीकानां देवतात्वेन *मातुरपि तत्रानुप्रवेशान्मातुरपि प्राग्दर्शात्सपिण्डनं *युक्तमित्यपरार्कः ।

ने पितृपितामहप्रपितामहान्यतमस्य मात्रादीनां च सपिण्डनं कार्यम् । तदुत्तरदर्शे पितृयज्ञः दर्शात्पूर्वं तावत्कालासम्भवे "एकाहे द्वादशाथवा" इति पक्षेणाशौचोत्तरदिने तन्त्रेण षोडशश्राद्धानि विधाय तदुत्तरदिने दर्शादर्वाग् यत्र क्वापि दिने वा सपिण्डनं कृत्वा दर्शे पितृयज्ञः "एकादशाहान्तं निर्वर्त्य" इति वाक्यात् । द्वादशदिन एव दर्शपाते तत्रैव सपिण्डनं पितृयज्ञश्च । एकादशाहे तत्पाते तु तत्रैव षोडशश्राद्धानि सपिण्डनं पितृयज्ञश्च । "सपिण्डीकरणं कुर्यात् " इत्यत्र दशरात्रस्य परतः पूर्वे दर्शे इत्यन्वयेन "या तु पूर्वममावास्या" इत्यत्र मृताहावधिकदशमीत्वोक्त्या चाशौचान्त्यदिनानन्तरभाविदर्शविषयत्वात् । सपिण्डनं कृत्वा पितृयज्ञस्तु दुष्करः तथाचोक्तं "नासपिण्ड्याग्निमान्" इत्यादीनि वदन्ति।*मातुरपीति । पितामह्यादेरुपलक्षणमनुप्रवेशादिति ।

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।

इति वचनात् । *युक्तमिति । मातापित्रोरिति स्पष्टमुक्तमित्यर्थः । नचैवं श्राद्ध इव पिण्डपितृयज्ञेऽपि सपत्नीकत्वेन पित्रादिनिर्देशापत्तिः तं विनाप्यसम्भावित्वोपपत्तेः मातुर्मातामहेन सपिण्डने तत्पिण्ड इव एकमूर्तित्वमायातीतिवचनात् अन्यथा मातामहांशभागित्वार्थं तस्यापि सदुहितृकत्वेन निर्देशापत्तेः । अत्र सुतः पुत्रः मातापित्रोरितिपदवशात्साग्निकः पुत्र एव । अनग्निकोऽपि स एव तत्पतियोगित्वादिति मतं निराकर्तुमाह—

*एवं पितामहादेरपि सपिण्डनं प्राग्दर्शात्कार्यम् । *तेन विना *पार्वणायोगात् । द्वादशाहे वा कार्यम् ।

साग्निकस्तु यदा कर्ता प्रेतश्चानग्निमान्भवेत् ।
द्वादशाहे भवेत्कार्यं सपिण्डीकरणं सुतैः ॥

इति गोभिलोक्तेः । साग्नेः प्रेतस्य तु त्रिपक्षे,

प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत् ।
सपिण्डीकरणं तस्य कुर्यात्पक्षे तृतीयके ॥

इति सुमन्तूक्तेः । मदनरत्ने लघुहारीतोपि-

अनग्निस्तु यदा वीर भवेत्कुर्यात्तदा गृही ।
प्रेतश्चेदग्निमांस्तु स्यात्त्रिपक्षे वै सपिण्डनम् ॥

---

*एवमिति । पिण्डपितृयज्ञार्थं साग्निकस्य कर्तुः साग्नेर्निरग्नेर्वा प्रेतस्य सपिण्डने द्वादशाहादिविधिषु पितृग्रहणं पितामहप्रपितामहयोर्मातृग्रहणं पितामह्याश्चोपलक्षणं पुत्रग्रहणं च पौत्रप्रपौत्रयोः । अन्यथा तद्देवताकपितृयज्ञानिर्वाहात् । निरग्नेस्तु कर्तुः साग्निकस्य निरग्निकस्य वा प्रेतस्य त्रिपक्षद्वादशाहादिविधिषु पितृपुत्रग्रहणं नोपलक्षणं मानाभावादित्यर्थः । हेत्वन्तरमाह--*तेनेति । *पार्वणेति । मृतपितृकस्य साग्निकस्य पितृयज्ञवदर्शश्राद्धमप्यावश्यकम् ,

नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् ॥

इति प्रजापतिनाऽऽवश्यकाभ्युदयसाहचर्येण पार्वणोक्तेः त्रिपक्षे वै इति अधिकरणसप्तमीवशात्तृतीयपक्षः स कालः न तु तत्पूर्त्यनन्तरं मृतसजातीया तिथिः, तस्यास्तर्हि भूतत्वात् । एवं त्रिमासषण्मासादावपि । प्रेतश्राद्धनिषिद्धतिथिनक्षत्रादिकं तु तत्र त्याज्यम् । वैशब्दादाहिताग्नेस्त्रिपक्ष एवेति नियमः । न त्वस्यैव त्रिपक्ष इति अग्निमभविष्यविरोधात् । विरुद्धनियमोपगमे

द्वयोः साग्निकत्वे द्वादशाह एव,
साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान्भवेत् ।
द्वादशाहे तदा कार्यं सपिण्डीकरणं *पितुः ॥
इति तेनैवोक्तेः । द्वयोरनग्निमत्त्वे तु भविष्ये—
सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ।
अनाहिताग्नेः प्रेतस्य *पूर्णेऽब्दे भरतर्षभ ॥

त्रिपक्षेऽकृतसपिण्डनस्य नैव सपिण्डनं स्यादिति चेत् ? न, नियमेन एकादशाहद्वादशाहयोः पूर्वकालयोरेव निवृत्तिर्नतूत्तरभाविनां तृतीयमासादीनां, द्वादशाहादिकालेष्विति गोभिलवाक्यात् ।

स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः ।

इति मण्डनोक्तेश्च । अत्र विच्छिनाग्नेस्त्रिपक्ष एवात्मन्यग्निसत्त्वेन साग्नित्वात् । यत्र च दम्पत्योरन्यतरस्य पूर्वं मरणेनाग्नयो गतास्तत्रेतरस्य कालान्तरे मरणे साग्नित्वाभावान्न त्रिपक्षनियमः । उत्सृष्टाग्नेरप्येवम् । *पितुरिति । पितुरित्युक्तेः पित्रादिभिन्नस्य साग्निकस्यापि कर्तुर्न द्वादशाहनियमः । नच पितुरित्यविवक्षितम् , उभयोः साग्निकस्यापि कर्तृत्वापत्तेः । एवं साग्निकायाः पत्न्याः पुत्राभावात् पत्या सपिण्डने न द्वादशाहनियमः पुत्रग्रहणात् साग्निपदस्य विद्यमानाग्निपरत्वाच्च । नापि तस्या अनग्निकर्तृके साग्नेः सपिण्डने त्रिपक्षविधानात्त्रिपक्षनियमः,

प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनाग्निर्यदा भवेत् ।

इत्यत्राहिताग्निपदवशादनग्निनाऽनाहिताग्नेरेव ग्रहणात् । एवं साग्निकः पतिः पत्न्याः सपिण्डनं करोति तत्र न द्वादशाहत्रिपक्षयोर्नियमः । *पूर्णेऽब्दे इति । अतीते इत्यनेन व्यक्तम् । तत्राशक्तावेकादशो मासः, तत्राप्यशक्तौ नवमः, तत्राप्यशक्तौ आशौचान्त्यदिनोत्तरं दिनमारभ्य द्वादशसु अहःसु षोडशश्राद्धानि कृत्वा त्रयोदशेऽह्नि, तत्राप्यशक्तौ एकादशाहे द्वादशाहेऽप्येव वा

द्वादशेऽहनि षण्मासे त्रिपक्षे वा त्रिमासि वा ।
एकादशेऽपि वा मासि *मङ्गलस्याप्युपस्थितौ ॥

तानि कृत्वा मृतिदिनाद् द्वादशाहे इत्यर्थः षाण्मासादित्रिके पूरणप्रत्ययार्थविवक्षया षष्ठमासादावित्यर्थः । तेषां च षष्ठमासादीनां समस्तानामेवाङ्गत्वमधिकरणत्वात् । नतु तदुत्तरतिथेः 'पूर्णे' इत्यस्मरणात् । संवत्सरान्वयित्वेन श्रुतस्यानुषङ्गे प्रमाणाभावात्—"मासं दर्शपूर्णमासाभ्याम्" इत्यादिषु "उपसद्धिश्चरित्वा" इत्यस्येव । तेन षष्ठमासादिगते इति हेमाद्रिः प्रत्युक्तः । ननु आहिताग्नेः प्रेतस्याहिताग्निश्चेत् कर्ता तदा द्वादशाहनियमात् अनाहिताग्निश्चेत्कर्ता तदा त्रिपक्षनियमादेतौ कालौ अनाहिताग्नौ प्रेते अनाहिताग्नेः कर्तुः कथं स्याताम् ? नहि तयोरयमेव कालो नान्य इत्येवनियमो नान्यादृश इति मन्तव्यम् । "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्यादिषु एकवाक्योपादानाद्ब्राह्मणादयो वसन्तादिष्वेव वसन्तादिषु ब्राह्मणादय एवेति द्वयोरपि कर्तृकालयोर्मिथोनियमद्वयस्य दुर्वारत्वात् । मैवं, तत्र कर्तृकालविशेषयोरैककर्म्यादरुणैकहायनीवद्युक्तो मिथोनियमः । इह तु सापिण्डनस्य वाक्यान्तरेण विधानेनाविधेयत्वात्क्रियानुवादेन गुणद्वयविधेरसम्भवात्, यदा चेत्यादिशब्दैः कर्तृप्रेतसाग्निकत्वादेर्निमित्तत्वेन स्पष्टमुपादानाच्च तयोः स एव कालो नान्य इत्येक एव नियमः । अत एवाऽऽनन्त्यात्कुलधर्माणामिति व्याघ्रवचनमपि साग्निप्रेतकानग्नौ कर्तरि न प्रवर्तते । एवं हेमाद्रिमाधवादिसकलनवीनप्राचीनधार्मिकसंमते साग्नौ प्रेते अनग्नौ कर्तरि त्रिपक्ष एवेति नियमे स्थिते, ये—

आहिताग्निः पिता चाथ पुत्रश्चानग्निमान् भवेत् ।
त्रिपक्षादौ द्वादशेऽह्नि त्रयोदशादिनेऽथवा ॥
सापिण्डीकरणं तस्य कुर्यादिति पितामहः ॥

कात्यायनगोभिलौ–'यदहर्वा वृद्धिरापद्येत' इति। तच्च वृद्धिदिन एवेति वाचस्पतिः। तन्न, 'प्रातर्वृद्धिनिमित्तकम्' इति नियमात्सपिण्डनस्य चा*पराह्णकालीनत्वेन पूर्वत्वबाधापत्तेः। *वृद्धिदिने तत्पूर्वदिने वेति श्रीदत्तः। *स्मार्तगौडस्तु 'वृद्धिपूर्वो वर्षान्त्यश्च क्षणः सपिण्डनस्य प्रेतत्वनाशे सहकारी। तेन परेद्युर्विघ्नाद्वृद्ध्यभा-

---

इति पद्यं वृद्धगार्ग्यनाम्ना—

उभयोः साग्निकत्वेऽपि निरग्नित्वेऽपि वै सुतः।
पितुः सपिण्डनं कुर्याद् द्वादशेऽह्नयेव नित्यशः॥

इति पद्यमाङ्गिरोनाम्ना—

कर्ताऽनग्निर्यदा प्रेतः साग्निकस्तु भवेत्तदा।
त्रिपक्षादौ च सापिण्ड्यं द्वादशेऽह्नयथवा भवेत्॥

इति पद्यं लघुहारीतनाम्ना च मुक्तकण्ठाः पठन्ति तत्र "यवमयश्चरुर्भवति" इत्यादौ यथा दीर्घशुकेषु यवशब्दप्रसिद्धिरार्याणां कंगौ तत्प्रसिद्धिर्म्लेच्छानाम्। अतो म्लेच्छप्रसिद्धिं विहायार्यप्रसिद्धेरुपग्रह आर्यम्लेच्छन्याये दर्शितस्तथा त्रिपक्षादिरेवानाहिताग्नौ कर्तरि साग्नेः प्रेतस्य सपिण्डीकरणकालः हेमाद्रिमाधवप्रभृतिसमस्तानामार्याणां संमतः द्वादशाहस्तु तादितरेषामिति इतरमतं कालं विहायार्यमतः काल एवोपादेयः। किञ्च प्रेतत्वनिवृत्तिसहितपितृत्वप्राप्तिमुद्दिश्य सपिण्डनं विहितं, तच्च कथं धार्मिकाननुमते द्वादशाहे तस्य तत्कर्तृकसपिण्डनाद् वृथा चेष्टारुपालभ्येत, तत्र तथाचेष्टां कुर्वन वा पितृद्रोग्धा न स्यादिति? वृद्धिनिमित्तं सपिण्डनापकर्षमाह–*मङ्गलस्यापीति। *अपराह्णकालीनत्वेनेति। मध्याह्नकालीनत्वेन वेति शेषः। *वृद्धिदिने इति। यत्र नान्दीश्राद्धमपराह्णे तत्र वृद्धिदिने, यत्र तत्र प्रातस्तत्र पूर्वदिने इत्यर्थः। वृद्धिपूर्वदिनस्य सपिण्डनकालत्वं दूषयतां मतमाह–*स्मार्तगौड-

वेऽपि तत्कर्तव्यतानिश्चयसहितमेव कालान्तरक्रियमाणवृद्धिपूर्वक्षणसहकृतं प्रेतत्वनाशकम्' इत्याह । तन्न, *अकाले कृतस्य फलाजनकत्वात् । एतेन निमित्तनिश्चयवत एवाधिकाराद्वृद्ध्यभावेऽपि न क्षतिरिति मिश्रोक्तिः परास्ता । वृद्धिपूर्वदिनस्य *वर्षान्तस्य च कालस्याङ्गत्वेन निमित्तत्वाभावात् । तेन पुनः कार्यमित्यन्ये । मदनरत्ने पुलस्त्यः—

निरग्निकः सपिण्डत्वं पितु*र्मातुश्च धर्मतः ।
पूर्णे संवत्सरे कुर्याद्वृद्धिर्वा यदहर्भवेत् ॥

चतुर्विंशतिमते—

सपिण्डीकरणं चाब्दे संपूर्णेऽभ्युदयेपि वा ।
द्वादशाहे *तु केषांचिन्मतं चैकादशे तथा ॥

स्त्विति । *अकाले इति । मासानन्तरं वृद्धिः कर्तव्येति निश्चयवतोऽप्यधिकारापातादिति भावः । *वर्षान्तस्येति मृताहस्य वर्षान्तस्य पक्षेण स्मृत्यर्थसारमतेन च । वस्तुतस्तु आपद्येतेति गोभिलस्य सन्निधीयेतेत्यर्थाद् वृद्धिसन्निहिते दिने इत्यर्थः ॥

पितुः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम् ।
वृद्धिरागामिनी चैत्स्यात्तदाऽर्वागपि कारयेत् ॥

इति नागरखण्डात् । सन्निहितादिनं च पूर्वं तत्रासम्भवे तत्पूर्वादिकम् । सम्भवति च मृताहे मासिकानि कृत्वा सपिण्डनं ततो वृद्धिरिति । *मातुश्चेति । चकारो मातामहादिसङ्ग्रहार्थः यतो वृद्धिनिमित्तकः सपिण्डनापकर्षो वृद्धिश्राद्धार्थः, सपिण्डनं ना पितृत्वप्राप्त्यभावेन श्राद्धस्यैव दुष्करत्वात् । *तु केषांचिदिति । द्वयोर्निरग्निकयोरेकादशाहोपि सपिण्डीकरणकाल इत्यर्थः। चायं दर्शात्मक एकादशाहः पिण्डपितृयज्ञाधिकारिकसाग्निकर्तृविषय एवास्तीति वाच्यं, वर्षान्तरूपसपिण्डनकालान्तरानुरो-

पृथ्वीचन्द्रोदये बौधायनः—*'अथ सपिण्डीकरणं, त्रिपक्षे वा तृतीये वा मासि, षष्ठे वैकादशे वा द्वादशे वा द्वादशाहे वैकादशाहे वा' इति । एतत्प्रक्रमे विष्णुः—'मासिकार्थं द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यात् । मन्त्रवर्ज्यं हि शूद्राणाम् । द्वादशेऽह्नि संवत्सराभ्यन्तरे यद्यधिमासो भवेत्तदा मासिकार्थं दिनमेकं वर्धयेत्' इति । आशौचोत्तरं द्वादशस्वहस्सु मासिकानि । तेष्वेवाद्यषष्ठद्वादशादिनेषूनम*मासिकादीनि कृत्वा त्रयोदशेऽह्नि सपिण्डनं कुर्यात् । अधिमासे तु चतुर्दशेऽह्नि कुर्यात् । *शूद्रस्त्रयोदशे "द्वादशेऽह्नि' इत्यस्य मासिकान्त्यदिनपरत्वादिति पृथ्वीचन्द्रः । पैठीनसिः—'संवत्सरान्ते सपि(१)ण्डनं नवमे मासीत्येके ।' अत्र*साग्रेरनग्रेर्वोक्तकालाभावे त्रिपक्षादिसंवत्सरान्ता अनुकल्पा ज्ञेयाः । कल्पतरुस्त्वग्रे वृद्धिनिश्चय एव सर्वेऽपकर्षप्रकारा इत्याह । तन्न, 'यदहर्वा' इति स्वातन्त्र्यश्रुतेः । यद्यपि

धेनैतद्वाक्यस्य द्वयोरनाग्निविषयत्वात् । एकादशाहद्वादशाहशब्दौ तु आशौचान्त्यादिनोत्तरादिनतदुत्तरदिनपराविति स्मर्तव्यम् ।

*अथ सपिण्डीकरणमिति । द्वादशेवेत्यत्रातीते इति शेषः । अथ संवत्सरे पूर्णे सपिण्डीकरणमिति पाठे द्वादशे वेति न पाठः, मयूखादौ तदलेखात् । मासिकानामर्थः प्रयोजनं प्रेतत्वनिवृत्तिस्तद्वत् ।*ऊनमासिकादीनि । आदिना त्रैपक्षिकोनषष्ठोनाद्वपरिग्रहः । श्राद्धशब्दस्य षोडशश्राद्धपरत्वात् । *शूद्र इति । अधिमासे इति वर्तते । अयमर्थः—द्विजातीनामाशौचापगमोत्तरं त्रयोदशे अधिमासपाते चतुर्दशेऽह्नि अपकर्षं विधाय शूद्राणां न तत्राह्नि किन्तु द्वादशदिन एव अधिकपाते त्रयोदशदिन एव तत्र कर्त-

(१) 'संसर्जनं' ग० ।

वृद्धिनिमित्तोपकर्षो निरग्नेरेवोक्तस्तथापि साग्नावपि ज्ञेयः। उक्तकालासंभवे वर्षान्तादिगौणकालवद्वृद्धेरपि प्राप्तेः, वक्ष्यमाणगोभिलवचनात्;

अयातयामं मरणं न भवेत्पुनरस्य तु।

इति दोषश्रुत्यविशेषाच्च। अपरार्कपृथ्वीचन्द्रादिस्वरसोऽप्येवम्। अत्र वृद्धिपदं चूडोपनयनविवाहमात्रपरम्। सीमन्तादौ तु वृद्धिश्राद्धलोप एवेत्याचार्यचूडामणिः। पुंसवनाद्यन्नप्राशनान्तेष्वावश्यकेष्वपकर्ष इति श्राद्धविवेकः। स्मृ(१)तिसागरेऽपि बृहस्पतिः—

प्रत्यवायो भवेद्यस्मिन्नकृते वृद्धिकर्मणि।
तन्निमित्तं समाकृष्य पित्रोः कुर्यात्सपिण्डनम्॥

गर्भाधानस्य ऋत्वन्तरेऽपि संभवात्।

अन्यश्राद्धं परान्नं च गन्धमाल्यं च मैथुनम्।

इति देवलेन प्रथमाब्दे मैथुननिषेधाच्च न तत्रापकर्ष इति श्राद्धकौमुद्यादयः। तन्न, 'ऋतुस्नातां तु यो भार्याम्' इति निषेधात्, 'ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत्' इति मैथुने दोषाभावाच्च। पितामहमरणे पौत्रस्य वृद्धौ नापकर्षः तस्य *महागुरुत्वाभावात्। तत्र तदूर्ध्वेभ्यो वृद्धिश्राद्धमिति श्राद्धचन्द्रिका। तन्न, 'भ्रातव्यं मासिकं कृत्वा सपिण्डनापकर्षः कार्यः। मासिकार्थवदिति पूर्वभागैकवाक्यत्वादिति। *साग्नेरिति। साग्नेर्द्विविधस्यापि कर्तुर्दाहशाहः निरग्नेस्तु साग्निप्रेतस्य त्रिपक्षः निरग्निप्रेतस्याब्दान्तः वृद्ध्युपस्थितिमांश्च कालो मुख्यः, तदभावे इत्यर्थः। अत्रेत्यादिमतत्रये वक्ष्यमाणदाक्षिणात्याचाराविरोधोऽस्वरसः। *महेति।

महागुरौ प्रेतभूते वृद्धिकर्म न चाचरेत्।

(१) 'श्रुतिसागरे ग०।

च' इत्यादौ तदभावेऽप्यपकर्षोक्तेः । तेन *निर्देशोऽप्युपलक्षणम् ।

व्याघ्रः—

*आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते ॥

*एतदाशौचान्तोपलक्षणम्—

इति निषेधात् । *निर्देशः महागुरोः ।

*आनन्त्यादिति कुलधर्माणां सपिण्डीकरणाभावेऽनुष्ठातुमशक्यानां तृतीयपञ्चमवर्षादौ चूडाकरणादीनां प्रतिकुलं व्यवस्थितानां मङ्गल्यानां च । एतेन सपिण्डनाधिकारिणा तदनुष्ठानं यावद् वृद्धिश्राद्धानङ्गकमपि कुलाचारादिप्राप्तं मङ्गल्यं कर्म न कर्तव्यमिति ध्वन्यते । शरीरस्यास्थितिः परचक्राक्रमणादिनिमित्तकपलायनादिना सपिण्डनसामग्रीमदेशानवस्थानं रोगादिना कर्मकरणसामर्थ्यरूपस्थित्यभावो वा । एतच्च वचनमायुःक्षयादिसम्भावनानिमित्तं सपिण्डनापकर्षं विदधन्निरग्न्युभयमात्रविषयं, साग्निककर्तृसपिण्डनापकर्षस्य पितृयज्ञादिनिमित्तत्वात् । एवं सति द्वादशाहस्य प्रशस्तत्वं भवति । संवत्सरान्त एव वस्तुतोऽनुष्ठेयस्य सपिण्डनस्योक्तत्रयान्यतमसम्भावनयाऽर्वाक्त्रिपक्षादावप्यनुष्ठानं चेदनन्तरद्वादशाहे एव तदस्थितिः । एतच्च द्वयोर्निरग्निप्रकरणस्थमिति स्वयमत्रोपनिबद्धमयुक्तं चान्यत्र । साग्निककर्तृकसपिण्डने द्वादशाहेतरकालस्य गौणतया तदभावे स्वत एव प्रशस्ते द्वादशाहे तद्बोधानुपयोगात् । साग्निप्रेतमात्रे द्वादशाहस्य विधातुमनीशतया तद्बोधे बाधाच्च । केचित्तु एतद्यत्र द्वादशाहः प्राप्तः तत्र तस्य प्राशस्त्यबोधकम् । तथाच प्रेतमात्रस्य साग्नित्वे तस्यापाप्तत्वान्न द्वादशाहः किन्तु त्रिपक्ष एवेत्याहुः । द्वादशं च तदहश्चेति विग्रहः ततः मृतिदिनाद्

सर्वेषामेव वर्णानामाशौचान्ते सपिण्डनम् ।

इति निर्णयामृते कात्यायनोक्तेः । सर्वेषामिति त्रैवर्णिकपरम् । शूद्राणां त्वाशौचमध्ये,—

मन्त्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्तितम् ।

इति विष्णूक्तेः । एतदर्शश्राद्धकारिशूद्रविषयमित्यपरार्के कल्पतरौ च । वृद्धमनुः—

*द्वादशेऽहनि विप्राणामाशौचान्ते तु भूभुजाम् ।

वैश्यानां तु त्रिपक्षादावथ वा स्यात्सपिण्डनम् ॥

निर्णयामृते गोभिलः—

द्वादशाहादिकालेषु प्रमादादननुष्ठितम् ।

सपिण्डीकरणं कुर्यात्कालेषूत्तरभाविषु ।

इदं *साग्नेरुक्तकालासम्भवे गौणकालविधानार्थमिति मदनपारिजातः । मदनरत्नेऽप्येवम् । ऋष्यशृङ्गः—

*सपिण्डीकरणं श्राद्ध*मुक्तकाले न चेत्कृतम् ।

रौद्रे हस्ते च रोहिण्यां मैत्रभे वा समाचरेत् ।

द्वादशे त्वस्य विप्रमात्रपरत्वं स्यादत आह—*एतदिति । दशमपिण्डदानस्याजातत्वादिति । सच्छूद्रस्य दशाहाशौचस्य ज्ञापितत्वात् । ततश्च तस्य दर्शश्राद्धार्थतया साग्निकविप्रवदयं सपिण्डनापकर्षः । अत्र मासाद्याशौचिशूद्राणामपि द्वादशाहे सपिण्डने कथं विरोधः ? प्रेतत्वानिवृत्तेः सत्त्वात् । दशमपिण्डानन्तर्यस्य वचनवशेन त्यागादिस्वरसः । दर्शितनिष्कर्षमालोच्य त्रैवार्णिककालं व्यवस्थाप्याह—*द्वादशेऽहनीति । *साग्नेरिति । साग्निमेतमात्रस्येत्यपि द्रष्टव्यम् । तेन द्वयोरनग्नित्वे वचनवैयर्थ्यं न शङ्क्यम् । साग्निनिरग्निसाधारण्येन संवत्सरान्तेऽपि यदि सपिण्डनं जातं तदा कथमित्यत्राह—*सपिण्डीति । *उक्तकाले वत्सरान्ते । प्रोक्ताः सपिण्डनकाला लाघवात्तदधिकारा अन्यैर-

कालादर्शेपि—

*एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा ।
षष्ठे चैकादशे वाब्दे संपूर्णे वा शुभागमे ॥
सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्तिताः ।
साग्नौ कर्तर्युभावाद्यौ प्रेते साग्नौ तृतीयकः ॥
अनग्नेस्तु *द्वितीयाद्याः सप्त कालाः मुनीरिताः ।
*रोहिणीरौद्रहस्तेषु मैत्रभे वापि तच्चरेत् ॥

नारदसंहितायां तु—

सपिण्डीकरणं कार्यं वत्सरे वा*र्धवत्सरे ।
त्रिमासे वा त्रिपक्षे वा*मासि वा द्वादशेऽह्नि वा ॥

इत्युक्तं, *तच्च वत्सरेऽतीते ज्ञेयम्,

ततः सपिण्डीकरणं वत्सरात्परतः स्थितम् ।

पि संगृहीता इत्याह-*एकादशे इति । *द्वितीयाद्या इति । एकादशाहं नवममासं च कालं कालादर्शकृतो न लिखन्ति । *रोहिणीति नक्षत्रम् । सपिण्डनं यावद्वार्षिकपार्वणानुष्ठातृणामपि वार्षिकमेकोद्दिष्टं श्राद्धं पितृत्वप्राप्त्यभावात् । *अर्धवत्सरे इत्यधिकरणसप्तमी । *मासि वेति । मृताहात्त्रयोविंशतितमे दिनेऽधिकपाते विंशतिमे दिने इति पक्षे । ननु प्राक् पूर्णेऽब्दे इत्यत्र न सतिसप्तमी कारकसप्तम्या बलीयस्या बाधात् । नच पूर्णत्वं न पूर्तिक्षणस्य सपिण्डनाधारत्वासम्भवादिति वाच्यं, लक्षणया पूर्तितिथिमत्त्वसम्भवात् । अत एवात्र वत्सरस्यैवाधिकरणत्वमुक्तमित्यत्राह—*तच्च वत्सरेऽतीते इति । शूलपाण्यादयस्तु आद्यमृताहावधिकषष्ठ्यधिकशतत्रयतिथ्यात्मकः संवत्सरः, तदन्यमृताहे सपिण्डनम् "ततः संवत्सरे पूर्णे" "समाप्ते संवत्सरे" इत्यादिष्वधिकरणसप्तमी । पूर्तिसमाप्ती च नान्त्यकलारूपे तत्र श्राद्धासम्भवात्, किन्त्वन्त्यदिनरूपे—

इति भविष्योक्तेः,

पितुः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम् ।

इति नागरखण्डोक्तेः ।

पितुः सपिण्डीकरणं वार्षिके मृतिवासरे ॥

इत्युशनसोक्तेश्च ।

*पूर्णे संवत्सरे पिण्डः षोडशः परिकीर्तितः ।

तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥

इति हेमाद्रौ वचनाच्च । अस्यानाकरत्वोक्ति*मूर्खोक्तिरेव । यत्तु—

पूर्णे संवत्सरे कुर्यात् सपिंडीकरणं सुतः ।

*एकोद्दिष्टं च तत्रैव (१)मृतेऽहनि समापयेत् ॥

सम्पूर्णे तु ततो मासे पिण्डशेषं समापयेत् ।

शूद्रस्य दशमः पिण्डो मासे पूर्णेऽन्हि दीयते ॥

इत्यादिवत् । यद्वा, संवत्सरपदमेकादिनाधिकवत्सरपरम् । "संवत्सरान्ते प्रेताय" इत्यादिवैष्णवेऽधिकैकादिनकवर्षस्यान्तो मृताह इत्यर्थ इति । तत्र वस्तुतः सपिण्डनकालस्याभेदेऽपि मृताहं गृहीत्वैव वत्सरो निर्वाच्यः । तथा सति 'वत्सरात् परतः' इत्यादिप्रागुक्तसङ्गतिः । अत एव नैकदिनांतभावेनार्थ इत्यभिप्रायः । पूर्णशब्दसहिताब्दादिपदात् वचनवशाद् वत्सरोत्तरदिनमेव ग्राह्यमितिस्थितेऽपि पूर्णसंवत्सरपदस्य तत् लक्षकत्वे स्फुटं वचनमप्याह—*पूर्ण इति । सपिण्डनाब्दिकयोरेकदिनकर्तव्यत्वोक्तेस्तल्लाभः । तत्र सतिसप्तमीप्रकृतेर्लक्षणयाऽधिकरणसप्तमी उत्तरदिने इति शेषो वा वाच्यः । स एव "संवत्सरान्ते प्रेताय" इत्यादावप्यालम्ब्यः । *मूर्खेति । तथाच सपिण्डनमात्रेणैवाब्दिकनिर्वाह इति ग्रन्थकृत्सम्मतोऽर्थः । *एकोद्दिष्टम् मासिकम् ।

---

(१) 'मृताहनि' ग० छ०

इति धवलनिबन्धे जाबाल्युक्तेः

पुत्रः सपिण्डनं कृत्वा कुर्यात्स्नानं सचैलकम् ।
एकोद्दिष्टं ततः कुर्यात् कुतपं न विचारयेत् ॥

अत्र वदन्ति सपिण्डीकरणं कृत्वा प्रथमसांवत्सरिकमनुष्ठेयम् । यतः हेमाद्रिवचने षोडशेत्यस्य कोऽर्थः । न तावद् द्वादशमासिकम्, तेन सापिण्डनादिकार्यानिर्वाहात् । नापि सपिण्डीकरणं पितृत्वापन्नतृप्तिरूपस्याब्दिककार्यस्य तेनासम्भवात्। किन्तु ऊनाब्दिकपिण्डः,

पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्तितम् ।

इति पाठात् । तेनैवेत्यस्य च—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।

इत्यत्र मृताहात् पूर्वेद्युरित्यर्थे तदनन्तरं मृताहे नेति फलितार्थः । अर्थान्तरे तु तेनैव संदृब्धमिति पूरणेन तदधिकरणदिनोत्तरमृताहे नेत्यर्थः । अथ संदृब्धार्थकसांवत्सरिकं दुष्करं यतः मुख्यकालः सपिण्डनेनावरुद्धः । नच गौणकालः सम्भवति श्राद्धशेषभोजनरूपोत्तराङ्गं विना सपिण्डीकरणप्रयोगासमाप्तेः । न च—

एकोद्दिष्टस्य शेषं तु ब्राह्मणेभ्यः समुत्सृजेत् ।
ततः स्वयं तु भुञ्जीत पुनर्मङ्गलभोजनम् ॥

इति मते श्राद्धभोजनमिति प्रेतश्राद्धशेषभोजनमिति प्रेतश्राद्धशेषभोजनं निषिद्धमेवेति वाच्यम्, पार्वणैकोद्दिष्टयोः पाकस्य भिन्नत्वादेकोद्दिष्टांशशेषस्याभोजनेऽपि पार्वणांशशेषभोजनस्यावश्यकत्वात् । वृद्धिश्राद्धिनसपिण्डने त्वगत्या शेषभोजनलोपे नैव तत्समाप्तिः—

मलमासेऽपि कर्तव्यमाब्दिकं प्रथमं सुतैः ।

इत्याब्दिकं तु द्वादशाहात्तु सपिण्डनपक्ष एवेति चेत् ? मैवम्, विसर्जनेन समाप्ते श्राद्धप्रयोगे पश्चादनियमेन प्राप्तस्य भोजनस्य नियमः श्राद्धशेषप्रतिपत्त्यर्थः । तद्दिनरात्रिगतब्रह्मचर्यादिनियम-

इति स्वल्पमात्स्योक्तेश्चाब्दिकं तद्दिने पुनः कार्यमिति कोचित् । ते निर्मूलत्वाद्धेमाद्रिविरोधाच्चोपेक्ष्याः । षोडशत्वं च सपिण्डनस्य षोडशश्राद्धान्तर्भावपक्षे । स्मृत्यर्थसारे तु वर्षान्त्यदिने संवत्सरविमोक्षश्राद्धं सपिण्डनं च कृत्वा परेद्युर्मृताहे वार्षिकं कार्यमित्युक्तम् । गौडा अप्येवमाहुः । तत्पूर्वविरोधाच्चिन्त्यम् ।

वत्प्रयोगबहिर्भूत एव श्राद्धाङ्गव्यवधानबीजाभावात्तु प्रायशोऽव्यवधानम् । एवं च सपिण्डनवत्यां तिथौ अवश्यं प्राप्तं वार्षिकमनुष्ठाय तन्त्रेण श्राद्धद्वयाङ्गतया तत्करणे न क्षतिः,

पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः ।

इति वचनादेकदिने क्रियमाणेषु सांवत्सरिकश्राद्धेष्विव । नित्यत्वाच्च गौणकालेऽप्यनुष्ठानमदोषः । वस्तुतस्तु सपिण्डीकरणस्य मध्याह्नः कालः वार्षिकस्यापराह्ण इति पार्वणविधिनाऽनुष्ठाने क्व गौणकालः । नच सपिण्डनस्यैकोद्दिष्टांशेन मध्याह्नप्राप्तावपि पार्वणांशेनापराह्ण एवेति वाच्यम् , एकोद्दिष्टस्य मुख्यतया मध्याह्नस्य तद्धर्मस्यैव युक्तत्वात् । मुख्यत्वं च प्रेतदेवत्वात् । पार्वणांशस्य तु तदभावे संयोजनस्य दुष्करतया तदुपकारितयाऽनुष्ठानात् एकोद्दिष्टस्य प्रथमानुष्ठेयत्वाच्च । चत्वार्युदकपात्राणि एकं प्रेतस्य त्रीणीतरेषां प्रथमं प्रेतपात्रं पितृपात्रेषु नियोजयेत् । एवमेव प्रथमं पिण्डं त्रिषु पिण्डेषु नियोजयेदित्याश्वलायनादिगृह्यात् । त्रीणि पितृणामेकं प्रेतस्येति गोभिलीयं यदि छन्दोगानां क्रमस्यापि कल्पकं तदोपजीव्यत्वादेकोद्दिष्टकाल एव ग्राह्यः । नच पार्वणे यागत्रयसत्त्वाज्जघन्यस्यापि तस्य मुख्यस्य धर्मत्वेन काल इति ग्राह्य इति वाच्यम् , कर्मण एकत्वादेव समुच्चितदेवतानुरोधेनाभ्यासमात्रभेदात्तेषां कालादिधर्मानन्वयात् कालस्य देवताधर्मत्वाभावाच्च । तस्मात्कुतपप्रभृतिमध्याह्ने सपिण्डीक-

तच्च पुत्रे सति नान्यः कुर्यात्,
आद्धानि षोडशादत्त्वा नतु कुर्यात्सपिण्डताम् ।
*प्रोषितावसिते पुत्रः कालादतिचिरादपि ॥
इति वायवीयोक्तेः । *षोडशश्राद्धानां वर्षादूर्ध्वं कालाभावेपि तान्यदत्त्वा न कुर्यात्, किंतु *दत्त्वैव । *ता-

---

रणकमनुष्ठायापराह्णमध्य एव पार्वणविधिना सांवत्सरिकमुपक्रमितुं शक्यते न तत्र गौणकालतापसङ्गः । एकोद्दिष्टविधिना सांवत्सरिकमनुतिष्ठतां तु नित्यत्वाद्गौणकाले तदनुष्ठाने न कश्चिद्दोषः । यत्तु पूर्णे संवत्सरे सपिण्डनमभिधायात ऊर्ध्वं संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादिति गोभिलसूत्रात् प्रथमाब्दे वार्षिकं न कार्यमिति । तदशुद्धम्, प्रथमाब्दे सर्वथा वार्षिकासत्त्वे मलमासीयप्रथमवार्षिकनिर्णयवैयर्थ्यापत्तेः, अत ऊर्ध्वं गोभिलीये सपिण्डनोर्ध्वमित्यर्थेन प्रथमवत्सरेऽपि तस्य प्राप्तेः । एवञ्च—

पूर्णे संवत्सरे वृत्ते मृताहे पुनराब्दिकम् ।
सपिण्डीकरणं कृत्वा कुर्यात् पुत्रस्तु नेतरः ॥

इत्यत्र ग्रन्थोक्तजाबालस्वल्पमात्स्ययोश्च पुत्रपदमुत्तरक्रियाधिकारिपरम् । सपिण्डनानन्तरं स्वल्पमात्स्यात् सचैलस्नानं कृत्वा वार्षिकमिति कृतं पल्लवितेन । *प्रोषितेति । प्रोषितेन सता पितृमरणे ज्ञाते चिरादपि कालात् वर्षान्तरूपचरमकालातिक्रमेऽपि सपिण्डनं पुत्र एव कुर्यान्नान्य इत्यर्थः । *षोडशेति । यथाऽशक्त्यादिना वर्षान्तरूपस्य सपिण्डनकालत्वं तथा प्रवासादिना तदुत्तरस्य पूर्वोक्तवचनान्नाक्षत्रस्य । एवञ्च तत्र नियमवशात् षोडशश्राद्धे प्रसक्ते शास्त्रीयं कालं विना कृतस्य शास्त्रीयकर्मणः फलाजनकत्वात्सपिण्डनस्य शास्त्रीययत्किञ्चित्काललाभेनानुष्ठानेऽपि तेषां कालालाभादननुष्ठाने प्राप्ते श्राद्धानीति विधिद्वारा कालं विधत्ते इति भावः । *दत्त्वैवेति । एतद्वाक्यस्य सपिण्डनविषये "पुत्राभावे

नि यदि कनिष्ठभ्रात्रादिना कृतानि तदा सपिण्डनमेव कुर्यादित्यपरार्कः। सपिण्डने तु कनिष्ठानां नैवाधिकार इत्यर्थः। तत्रैव—

अज्ञानादथवा मोहान्न कृता चेत्सपिण्डता।
तत्रापि विधिवत्कार्या कालादतिचिरादपि॥

तेष्वपि ज्येष्ठस्यैवाधिकारः,

ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः।

इति मनूक्तेः। अपरार्के प्रचेता अपि—

*एकादशाद्याः क्रमशो ज्येष्ठस्तु विधिवत्क्रियाः।
कुर्यान्नैकैकशः श्राद्धमाब्दिकं तु पृथक्पृथक्॥

मरीचिः—

*सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम्।
द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥

यत्तु वाचस्पतिशूलपाणिभ्यामुक्तं द्रव्यदानानुमत्यभावे कनिष्ठैः पृथक्कार्यमिति। तन्न, एवकारस्य तदभा-

---

तु पत्नी स्यात्" इत्यादिसामान्यविध्यपवादकतया पुत्रासन्निधाने तद्भिन्नकृतम् 'अनधिकारिणा कृतमप्यकृतमेव' इति पुत्रेण सपिण्डनमावर्तनीयम्। मासिकापकर्षोऽप्यावर्तनीयः। तत्र सपिण्डनाधिकृतस्यैवाधिकारादित्यर्थः। अपरार्कमतमाह—*तानीति। अत्र—

श्राद्धानि षोडशापाद्य विदधीत सपिण्डताम्।
श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डताम्॥

इति समानकर्तृकत्वभङ्गापत्तेरित्यस्वरसः। *एकादशाद्या इति। एकादशपदं षोडशश्राद्धार्थकं श्राद्धानीत्येकवाक्यत्वात्, न तु महैकोद्दिष्टादिपरम्। तेन तस्य पत्न्यादिना करणेऽपि नानुपपत्तिः। ननु "कुर्यान्नैकैकशः श्राद्धम्" इत्यनेन सपिण्डनान्तश्राद्धस्य विभक्तपुत्रेषु पृथक्त्वनिषेधे कनीयः पुत्रादेस्तत्फलानुपपत्तिरित्यत्राह—*सर्वेषां त्विति। तस्य द्रव्यदानानुमतिद्वारा फल-

वेऽपि पृथक्करणाभावार्थत्वात्*अन्धादेरिव ज्येष्ठे सति कनिष्ठानामनधिकाराच्च। *अतस्तेषां प्रत्यवायमात्रम्। आहिताग्निः कनिष्ठस्तु *कुर्यादेव। अन्यथा *पितृयज्ञासिद्धेः। *एवमावश्यकवृद्धावपि कनिष्ठोऽन्यः सपिण्डो

लाभ इति भावः। *अन्धादेरिति। अग्न्याधाने इति विशेषः। *अत इति। ज्येष्ठे सति तदन्यः पितुः सपिण्डनं न कुर्यादित्येवकारवशनिषेधविध्युल्लङ्घनादिति भावः। *कुर्यादेवेति। एवकार आवृत्तिव्यवच्छेदार्थः। अयं चाधिकारः ज्येष्ठस्यासन्निधाने सूतकादिबन्धे वा। *पितृयज्ञेति।

एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि।
अकुर्वीताग्निमान् पुत्रो मातापित्रोः सपिण्डनम्॥
नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत्।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम्॥
प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।
आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते॥

इत्यादिवचनात्। नचेमानि पितृयज्ञस्य प्रमाणान्तरप्राप्तसपिण्डनप्रयोजकत्वबोधनेनैवार्थवन्ति एतदुपात्तार्थान्तरस्य प्रमाणान्तरप्राप्तत्वात्। परन्तु क्लृप्ताधिकारं ज्येष्ठं प्रति चरितार्थानि नाक्लृप्तं कनीयसोऽधिकारमपि कल्पयन्ति गौरवादिति वाच्यम्, आरब्धपिण्डपितृयज्ञस्यानिर्वाहापत्त्या कनिष्ठेऽपि प्रवृत्त्यनङ्गीकारात्। यद्वा,

पितुः पुत्रेण कर्तव्याः पिण्डदानादिकाः क्रियाः।

इत्यादिभिः पुत्रमात्रस्य सर्वक्रियाधिकारे प्राप्ते "एकादशाहाद्याः क्रमशः" इत्यादिना एकादशाहादिषु कनिष्ठं प्रत्यपवादे जाते उक्तवाक्यं प्रतिप्रसवविधित्वेन लाघवात्कनिष्ठं प्रत्येव प्रवर्तते, न ज्येष्ठं प्रति; अपूर्वविधित्वे गौरवादनुवादत्वेन वैयर्थ्यात्। शेषं क्रमाधिकारिप्रकरणे। *एवमिति। तथाचेहापि ज्येष्ठस्य

वा कुर्यात् ।

*भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव च ।
सहपिण्डक्रियां कृत्वा कुर्यादभ्युदयं ततः ॥
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति मदनरत्ने लघुहारीतवचनात् । *वृद्ध्यनन्तरं प्रथमाब्दमध्येऽपि काम्यं कुर्यात् । वृद्ध्यभावे तु प्रथमाब्दादूर्ध्वमेवेत्यर्थः । काम्योक्ते*रनावश्यकेष्टापूर्तादौ *नापकर्षः । *एतद्*भ्रातृपुत्रादिसंस्कारे प्राप्ताधिकारस्य *ना-

---

पुत्रस्य वा न सपिण्डनिवृत्तिरितिभावः । *भ्राता वेति । "अर्धमन्तर्वेदि" इत्यादिन्यायेन भ्रात्रादिपदैराभ्युदायिककर्तृमात्रं ग्राह्यमित्याहुः । काम्यमनावश्यकमपि कर्म वत्सराद् प्रथमादृते तदुत्तरसपिण्डनं कृत्वैव कुर्यात् नतु प्रथमवर्षे तदर्थं सपिण्डनमपकृष्य काम्यस्यापकर्षनिमित्तत्वाभावादित्यर्थे फलितमाह—*वृद्धीति । श्राद्धाङ्गकयोरभ्युदयकाम्ययोरत्र ग्रहणात्तदुत्तरं सपिण्डनापकर्षेऽपि प्रथमाब्दे न कार्यमित्यपि केचित् । *अनावश्यकत्वं सगतिकत्वम् । *नापकर्ष इति । षोडशश्राद्धपूर्वकसपिण्डनस्येति शेषः । अत्र यस्य कस्यापि सपिण्डस्य गृहे वृद्ध्युपस्थितौ येन केनापि सपिण्डेन स्वपित्रादेः सपिण्डनं कार्यमिति दाक्षिणात्यमूर्धन्यतमाचारं प्रदर्शयितुमाह—*एतदिति । अशक्त्यादिनाऽनुकल्पकाले तदनुष्ठाने तु अनुमासिकापकर्षो भवत्येवेत्युक्तं—*भ्रात्रिति । "पितैवोपनयेत्पुत्रम्" इत्यादि । "पिता पितामहो भ्राता" इत्यादिना क्रमेण योऽधिकारस्तद्वत इत्यर्थः । *नान्दीति ।

स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥

इति कात्यीये तस्याभावे तत्क्रमात् "पितैवोपनयेत् पुत्रम्" इत्यादिः "पिता पितामहो भ्राता" इत्यादिश्च यत्क्रमोऽधिकारिक्रमस्तेन

न्दीश्राद्धाधिकारार्थम् । *अभ्युदयपदं च नान्दीश्राद्धनिमित्तकर्ममात्रपरमिति हेमाद्रिः । तेन ज्येष्ठे देशान्तरस्थे कनिष्ठः सपिण्डनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः परास्ता । *भ्रातृशिष्याद्युक्ते*नान्दीश्राद्धेऽग्यदेवतामात्रपरोऽपकर्ष इ*त्यपास्तम् । अस्य क्रममात्रपरत्वाद्वृद्धिकर्तैव सपिण्डनं कुर्यादिति न नियम इति

क्रमेण स्वपितृभ्य एव दद्यान्न संस्कार्यपितृभ्य इत्यर्थादिति भावः । अभ्युदयक्रियापदे नान्दीश्राद्धकर्मणो लाभं वारयति—*अभ्युदयेति । तेन नान्दीश्राद्धस्य सपिण्डननियमत्वपूर्वेण नियमेन । दर्शिताचारनिर्वाहार्थं जेष्ठापेक्षां निरस्यति—*भ्रात्रिति । *नान्दीति । येषां नान्दीश्राद्धे देवतात्वं तेषामेव पितृत्वासिद्ध्यर्थं । लघुहारीतेन सपिण्डनं कर्तव्यतयोक्तम्, आकाङ्क्षितविधानस्य न्याय्यत्वात् । *अपास्तामिति । अत्र भ्रातृशिष्याद्युक्तेरिति हेतुः । न च "स्वपितृभ्यः पिता दद्यात्" इत्यादौ चतुर्थपादस्य भ्रात्राद्यपत्यसंस्कारे संस्कार्यपितृभ्य एव नान्दीश्राद्धोक्तेः भ्रातावेत्यादेर्भ्रात्राद्यपत्यसंस्कारविषयत्वेनैवोपपत्तेर्न तद्विरोधः । एवमनाकाङ्क्षितविधानोपगमे सपिण्डान्यगुरोरसपिण्डनापात्तिरिति वाच्यम्, सुतसंस्कारकर्मसु स्वपितृभ्यो दद्यादिति तावत् सामान्यतो विशेषतश्च प्राप्तं नान्दीश्राद्धमनूद्य—

नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेत् ।

इति वचनादन्यसंस्कारे कथमित्यपेक्षायां चतुर्थचरणस्य विधायकत्वमुपेयम् । अन्यथा वैयर्थ्यापत्तेः । तथा च तत्र स्वपितृभ्य इत्यस्यैव सम्बन्धो नतु संस्कार्यपितृभ्य इत्यस्य "सिद्धमन्त्रम्" इति न्यायात् । नहीदं सपिण्डनं नान्दीश्राद्धे देवतात्वासिध्यर्थं किन्तु कर्तुरधिकारासिध्यर्थम् । समानकर्तृकत्वं तु काचित्कत्वेनाप्युपपद्यते । अत एव—

गौडाः । अत एव कन्याया मातृमरणे भ्रात्रा सपिण्डने कृते पितुर्दानाधिकारः ।

*शूलपाणिस्तु—

*महागुरौ प्रेतभूते वृद्धिकर्म न युज्यते ।

इति निषेधात्*मृतस्य भ्रात्रादिः सपिण्डनं कृत्वा तत्पुत्रकन्यादेरभ्युदयं कुर्यान्न तु स्वपुत्रसंस्कारे संस्कार्यपितुः सपिण्डनं विना वृद्धौ देवतात्वाभावादित्याह । तन्न, देवताप्रयुक्तापकर्षस्य निरस्तत्वात् । वृद्धिं विना क-

---

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ।

इत्येतत्समानकर्तृकत्वस्यापि मायिकत्वाद्यदा कनिष्ठेन षोडशश्राद्धानि कृतानि तदा ज्येष्ठेन सपिण्डनमेव कार्यमित्यपरार्केऽप्युक्तम् । तथाच भ्राता चेत्यादिवाक्येनाभ्युदयिकश्राद्धदेवताभिन्नस्यापि सपिण्डनस्य सपिण्डनं कार्यमिति दाक्षिणात्याचारः सुस्थ एव । तस्याभावे तु तत्क्रमादित्यस्य भ्रात्राद्यपत्यसंस्कारे संस्कार्यापितृभ्य एव दद्यादित्यर्थमनुसृत्य भ्रात्रेत्यादि वाक्यं व्याचक्षाणस्य मतमाह—*शूलपाणिस्त्विति । तत्र संस्कार्यपित्रादेः सपिण्डनं तत्संस्कारोपस्थितौ तदधिकारिणा तदङ्गनान्दीश्राद्धार्थमपकृष्य कार्यमिति प्रथमतः साधयति—*महागुरावितिं । नहि भ्रात्रादेर्भ्रात्रादिर्महागुरुर्भवति स्वापत्यस्येति । तदनुसृत्य भ्राता वेत्यस्यार्थमाह—*मृतस्येति । भ्रात्रादयश्च सन्निहिताधिकार्यन्तराभावान्मृतस्य सपिण्डनाधिकारिणः सन्तस्तदपत्यसंस्काराधिकारिणः क्त्वाप्रत्ययात् । पुत्रस्याग्रहणं च पित्रादेः सपिण्डनं कृत्वैव स्वापत्यस्य भगिन्यादेश्च संस्कारं कुर्यादित्यस्य वचनान्तरासिद्धत्वात् । अथ मातापितृमृतिवत्सरे तदपत्यानां कथं संस्कारः?

पितरौ तु मृतौ यस्य देहस्तस्याशुचिर्भवेत् ।

न दैवं नापि पित्र्यं वा यावत्पूर्णो न वत्सरः ॥

निष्ठेन कृते तु विदेशस्थेन ज्येष्ठेन पुनः कार्यम्,
यवीयसा कृतं कर्म *प्रेतशब्दं विहाय तु ।
तज्ज्यायसापि कर्तव्यं सपिण्डीकरणं पुनः ॥
इति स्मृतेः ।

ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते ।
आद्यपादे 'मातापित्रोः कनिष्ठेन' इति वा पाठः ।
देशान्तरगतानां च पुत्राणां तु कथं भवेत ।
श्रुत्वा तु वपनं कार्यं दशाहान्तं तिलोदकम् ॥
ततः सपिण्डीकरणं कुर्यादेकादशेऽहनि ।
द्वादशाहे न कर्तव्यमिति शातातपोऽब्रवीत् ॥
इति वचनाच्चेति भट्टाः । सिद्धान्तभट्टीयेऽप्येवम् । *पूर्ववचनेऽत्र च मूलं चिन्त्यम् । स्मृत्यर्थसारे तु-'*विभ-

---

इति निषेधादिति चेत् ? न, अशुचित्वोक्तेरनावश्यककर्मपरत्वात् । अपकर्षस्यावश्यकवृद्धिविषयत्वात् । "आधानाद्युपसंप्राप्तौ" इत्यभिधानात् "तथैव काम्यं यत्कर्म" इति लघुहारीताच्च । *प्रेतशब्दमिति । न च सपिण्डनस्य ज्येष्ठमात्राधिकारित्वेऽनधिकारिकनिष्ठकृतसपिण्डनेन प्रेतत्वानिवृत्त्या कथं प्रेतशब्दत्यागेन पुनरावृत्तिरिति वाच्यं दशाहोत्तरदर्शे कनिष्ठस्य पितृयज्ञार्थं सपिण्डनेऽधिकारात् । तत्र प्रेतशब्दं विनाऽर्घ्यसंयोजनादिरूपं सपिण्डनमन्यत्र तु प्रेतशब्दसहितं तत्कार्यम् । अत एव कनिष्ठाधिकारस्येवार्घ्यसंयोजनादित्यागस्याप्रामाणिकतामनुपदं द्रढयति । यत्र कनिष्ठेन पुत्रातिरिक्तेन वाऽभ्युदयार्थं सपिण्डनं कृतं तत्र ज्येष्ठेन पुत्रेण वा नावर्तनीयमित्यावेदनाय वृद्धिं विनेत्युक्तम् । *पूर्ववचने यवीयसेति वचने । तथाच पितृयज्ञार्थं कनीयसा सपिण्डने कृतेऽपि ज्येष्ठस्य सपिण्डनावृत्तिः प्रेतशब्दसहितैव । तेन वृद्ध्यर्थमपकृष्टे तु तत्र न ज्येष्ठस्यावृत्तिरिति नव्यमतमित्यर्थः । *वि-

क्ता ऋद्धिकामाश्चेत्पुत्राः पृथक्सपिण्डीकरणं कुर्युः' इत्युक्तम् । अत्र दत्तकस्य तत्पुत्रादीनां विशेषः प्रागुक्तः । केचित्तु वृद्धिं विनाऽपि कनिष्ठस्य सपिण्डनमाहुः—

मातापित्रोर्मृतेः काले ज्येष्ठे देशान्तरस्थिते ।
कनिष्ठेन प्रकर्तव्यं सपिण्डीकरणं तथा ॥

इति काष्णाजिनिस्मृतेः ।

गते वा रोधिते ज्येष्ठे पित्रा वा प्रेषिते सति ।
षण्मासान्न निवर्तेत तदा कार्यं कनीयसा ॥

संवर्तः—

पुनः सपिण्डीकरणं श्राद्धं पार्वणवच्चरेत् ।
अर्घ्यसंयोजनं नैव पिण्डसंयोजनं न च ॥ इति ।

ते *वचसां निर्मूलत्वात्—'प्रोषितावसिते पुत्रे' इत्यादिविरोधाच्चोपेक्ष्याः ।

व्युत्क्रममृतौ तु हेमाद्रौ ब्राह्मे—

मृते पितरि यस्याथ विद्यते च पितामहः ।
तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः ॥
तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यस्तु पूर्ववत् ।
मातर्यथ मृतायां च विद्यते च पितामही ॥

भक्ता इति ।

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश ।
एकैनैव तु कार्याणि संविभक्तधनेष्वपि ॥

इत्यस्यात्रापवादः । वृद्धिकामनया प्राप्ताधिकारेण कनीयसा कृते तु ज्येष्ठेन प्रेतशब्दरहितमेवावर्तनीयम् । *वचसामिति । अत एव—

काश्यादिषु गयायां च प्रेतकार्यं तु यत्कृतम् ।
सपिण्डैरसपिण्डैर्वा पुत्रैरेव कृतं भवेत् ॥

प्रपितामहीपूर्वस्तु कार्यस्तत्राप्ययं विधिः ॥

एवं प्रपितामहजीवने तत्पित्रादिभिर्ज्ञेयम् । तदाह सुमन्तुः—

त्रयाणामपि पिण्डानामेकेनापि सपिण्डने ।
पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥

यत्तु—

*व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिण्डता । इति, तन्मातापितृभर्तृभिन्नाविषयम्,

व्युत्क्रमेण मृतानां न सपिण्डीकृतिरिष्यते ।
यदि माता यदि पिता भर्ता नै*ष विधिः स्मृतः ॥

इति माधवीये स्कान्दोक्तेः । मदनरत्नादौ चैवम् । अत्र 'प्रपितामहादिभिः पितुः सपिण्डने कृते पितामहे मृते तत्सपिण्डने सति पुन*स्तेन सह पितुः सपिण्डनं कार्यम्' इति हेमाद्रिमतमाह । अन्ये *नैतन्मन्यन्ते । तत्त्वं तु पितुः सपिण्डनाभावे पितामहेन सह पुनः कार्यं, न तत्सत्त्वे,

त्रयाणामपि पिण्डानामेकेनापि सपिण्डने ।
पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥

इति विष्णुधर्मोक्तेः । पितामहे प्रपितामहे वा पुत्रान्तरै*रसंस्कृतेष्वसंस्कृताभ्यामेव पितुः सपिण्डनं-

इत्यादीन्यपि निर्मूलानि तीर्थप्रशंसापराणि वा । एवमिदं तीर्थे प्रशस्तं यदशाहान्तप्रेतकार्ये पुत्रेतरकृतेऽपि पुत्रकरणप्रयुक्तफलवदिति, नतु ज्येष्ठेतरेण येन केनापि सपिण्डनं कार्यमित्यर्थपराणि तथापदाभावात् । तत्र ज्येष्ठस्यैवाधिकारादिति माधवः । *व्युत्क्रमादिति । गोब्राह्मणादिहतोपलक्षणम् । *एष निषेधरूपो विधिः । * तेन पितामहेन । *नैतादिति । पितुः पुनः सपिण्डनवचनासत्त्वादिति शेषः । *असंस्कृते अकृतसपिण्डने ।

कुर्यात् ,

असंस्कृतौ न संस्कार्यौ *पूर्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्यादिति कात्यायनोऽब्रवीत् ॥

इति छन्दोगपरिशिष्टात् । असंस्कृतौ दाहाद्यैरिति कोचित् । असपिण्डीकृताविति तु तत्त्वम् । अत एवोक्तं तत्रैव—

पापिष्ठमपि शुद्धेन *शुद्धं पापकृतापि वा ।
पितामहेन पितरं संस्कुर्यादिति निश्चयः ॥

पापिष्ठमकृतसपिण्डनं न तु पतितादि, 'अभिशस्तपतितभ्रूणघ्नाः स्त्रियश्चातिचारिणीर्न संसृजेत्' इति बैजवापोक्तेः 'पापकर्मिणो न संसृजेरन्' इति गौतमोक्तेश्चेत्युक्तं निर्णयामृते ॥

पूर्वयोः पुत्राभावे तु पौत्रः कुर्यादेव,

पितामहः *पितुः पश्चात्पञ्चत्वं यदि गच्छति ।

एतच्चान्तिमकाले एव । पूर्वकाले तु पितामहप्रपितामहयोः तत्पुत्रादिना तदभावे स्वयं वा सपिण्डनं संपाद्यैव पितुः सपिण्डनसम्भवात् । न चैवं वर्षान्तपर्यन्तातिक्रमेऽपि तयोः सपिण्डनं कृत्वैव पितुः सपिण्डनं नक्षत्रेषु सुकरमिति वाच्यं, वचनवैयर्थ्यापत्त्या कृतसपिण्डनाभ्यां ताभ्यां वर्षान्तकाले पितुः सपिण्डनस्य वाचनिकत्वोपगमात् । तावता वचनसार्थक्यात् तत्पूर्वकालेषु पितामहादिपितृभावानपेक्षपितृसपिण्डनाबोधनात् । *पूर्वौ पितामहप्रपितामहौ । *शुद्धमिति । पितामहेनेति प्रपितामहेनेत्यपि बोध्यम् । अकृतसपिण्डनेन पितामहादिना सह सम्यक् शुद्धं कुर्यादिति भावः । मातामहादित्रयाणां सपिण्डनासत्त्वे तु चतुर्थेन सपिण्डनस्यैवासम्भवात् । वर्षान्तकालेपि पितुः सपिण्डनं न सम्भवति । किन्तु शुद्धैरशुद्धसपिण्डनानन्तरं पितामहेनैवेति । *पितु-

पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम् ॥
नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः ।
पितुः सपिण्डतां कृत्वा कुर्यान्मासानुमासिकम् ॥

इति कात्यायनोक्तेः । अपरार्के शूलपाणौ चैवम् । तेन सपिण्डनस्यानित्यत्वादकृतसपिण्डनयोरेव पार्वणानुप्रवेश इति *मूर्खोक्तिः परास्ता ।

*कृते सपिण्डीकरणे प्रेतः पार्वणभाग्भवेत् ।

इति हारीतविरोधाच्च । केचित्पुत्रान्तराभावे पितामहवार्षिकमप्याहुः । तन्न, श्राद्धषोडशमिति नियमात् । इच्छया भवत्येव ।

पितामहस्य चेद्द्यादेकोद्दिष्टं न पार्वणम् ।

इति वाचस्पतिधृतगर्गोक्तेः । *त्रयाणां यौगपद्ये तु प्राधान्यात्पितुः सपिण्डनं कृत्वा पूर्वयोः कुर्यात् । *पितामहे मृते दशाहान्तः पितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमावर्तयेत् । वृत्ते दशाहे नैवम् ।

रिति । तत्र दर्शश्राद्धमप्यकृतसपिण्डनाभ्यां ताभ्यां सह कार्यं नतु तदर्थं तयोः सपिण्डनप्रतीक्षेत्यर्थः । *मूर्खोक्तिरिति । सामान्यतोऽकृतसपिण्डनयोरित्युक्तिरित्यर्थः । वर्षान्तान्यकाले कृतसपिण्डनयोः पार्वणानुप्रवेशापत्तेरिति भावः । नच वर्षान्ते तादृशाभ्यां ताभ्यां सपिण्डने तयोः पार्वणानुप्रवेशो मास्त्विति वाच्यं, तथा सति "पापिष्ठमपि शुद्धेन" इति वचनोत्तरं "पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम्" इति वचनविरोधात् । *कृते इति । निरग्निकस्य प्रायिकं साग्निकस्य तु दर्शादर्वाक् सपिण्डनं दर्शश्राद्धार्थमुक्तम् । *त्रयाणामिति । एतदपि पितुः वर्षान्तकाल एव । *पितामहे मृते इति । क्रियाकर्तुर्नाशे क्रियावृत्तिर्नास्तीतिप्रागुक्तशुद्धितत्त्वमतं तु हेयम् । अग्निसंस्कारा-

*अशक्त्या पित्रानुज्ञातेन पौत्रेण पितामहश्राद्धे प्रक्रान्ते पितृमृतौ तदाशौचं वहन्नेव पौत्रः पितामहकर्म कुर्यात्प्रक्रान्तत्वादिति मदनपारिजातपृथ्वीचन्द्रौ । यत्तु—

उत्तराश्रितयरौद्ररोहिणी
याम्यसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म सकलं च वर्जये
त्प्रेतकार्यमपि बुद्धिमान्नरः ॥

इति सपिण्डनप्रकरणे पाठा*न्मुख्यकाले निषिद्धर्क्षे सपिण्डनापकर्षः । सर्वकालेषु तद्वत्त्वे तद्वर्ज्यान्येव । पूर्वोक्तब्रह्मोक्तानि षोडशश्राद्धानि कार्याणीति वाचस्पतिमिश्राः । तन्न, अस्य परिभाषात्वेन वाक्यात्सावकाशकर्मपरत्वात्, अस्य प्रेतमात्रदैवत्याभावाच्च ॥

अथ स्त्रीषूच्यते । हेमाद्रौ बृहस्पतिः—

भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिण्डनम् ।

यत्तु भविष्ये—

पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः । इति,

तदा*सुरादिविवाहोढापरम्,

आसुरादिविवाहेषु पितृगोत्रेण धर्मवित् ।

इति वृद्धशातातपोक्तेः । तच्चानेकवचनेषु पितामह्याः पत्या मातामहेन वा सहोक्तम् । तत्र व्यस्थोक्ता भविष्ये—

जीवत्पिता पितामह्याः मातुः कुर्यात्सपिण्डनम् ।

वृत्तिर्केचिन्मते । *अशक्त्येति । इदं तु बोध्यम्—अशौचान्तरमध्ये क्रिया एकादशाहान्तैव सपिण्डनस्य शुद्धकालसम्भवात् । *मुख्यकाले वर्षान्ते ।

*आसुरादीति । आदिना गान्धर्वराक्षसपैशाचा ग्राह्याः ।

प्रमीतपितृकः पित्रा तत्पित्रा पुत्रिकासुतः ॥

तत्पित्रा मातुः पित्रा । लौगाक्षिः—

पितामह्यादिभिः सार्धं मातरं तु सपिण्डयेत् ।
पितरि म्रियमाणे तु *तेनैवोपरते सति ॥

शङ्खः—

मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतः ।
पितामह्यादिभिः सार्धं सपिण्डीकरणं स्मृतम् ॥

येन केनापि मातुः सापिण्ड्ये यत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तं तत्र पितामह्या सह कार्यम् ।

नान्दीमुखेऽष्टकाश्राद्धे गयायां च मृतेऽहनि ।
पितामह्यादिभिः सार्धं मातुः श्राद्धं समाचरेत् ॥

इति शातातपोक्तेः । अपुत्रायां तु पैठीनसिः—

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डनम् ।
श्वश्रूश्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत् ॥

यत्तु लघुहारीतः—

पुत्रेणैव तु कर्तव्यं सपिण्डीकरणं स्त्रियाः ।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये ॥ इति ।

यच्च मार्कण्डेयपुराणे—

सपिण्डीकरणं स्त्रीणां पुत्राभावे न विद्यते । इति, तत्पुत्रपत्यभावे ज्ञेयम् । अत्र सपत्नीपुत्रोऽपि ज्ञेयः,

बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥

इति मनूक्तेरेतत्परत्वात् । यत्तु शातातपः—

मृते पितरि मातुस्तु न कार्या सहपिण्डता ।

तथा च भर्तृगोत्रेणेति वचनं ब्राह्मदैवार्षप्राजापत्यान्यतमविवाहोढापरम् । *तेनैवेति । यत्र सहगमनेनान्यथा वा स्त्रियाः सपिण्डनं

पितुरेव *सपिण्डत्वे तस्या अपि कृतं भवेत् ॥ इति, तदशक्तपरम्, केषाञ्चिद्वा मतमिति हेमाद्रिः ।

अन्वारोहणे तु भर्त्रैव सापिण्ड्यम्,

मृता यानुगता नाथं सा तेन सहपिण्डताम् ।
अर्हति स्वर्गवासं च यावदाभूतसंप्लवम् ॥

इति शातातपोक्तेः ।

पत्या चैकेन कर्तव्यं सापिण्डीकरणं स्त्रियाः ।
सा मृतापि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥

इति यमोक्तेश्च । अत्रैकशब्दः पितामह्यादिपक्षनिवृत्त्यर्थः । पतिपदं वर्गपरम् । सपिण्डनस्य पार्वणैकोद्दिष्टरूपत्वादिति माधवकल्पतरुमदनरत्नादयः । अन्ये तु भर्त्रैवैकेनाहुः—

*स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं भवेत् ।

इत्येवकारश्रवणात् । पृथ्वीचन्द्रोदयेऽपि विकल्प उक्तः । इदं तु तत्त्वम्—यदा हेमाद्र्यादिमते द्वयोरेकः पिण्डस्तदा वर्गेण सह । यदा माधवपृथ्वीचन्द्रादिमते पृथक्पिण्डस्तदैकेन पत्यैकवचनाच्चैकेनापि । अतो *मातृपिण्डमसापिण्डीकृतेनैव पतिपिण्डेन संयोज्यैकीकृतं पि-

---

पत्या सह तत्र भर्तरि अकृतसापिण्डनेऽपि प्रेतीभूते "पापिष्ठमपि शुद्धेन" इति न्यायेनेति । *सपिण्डत्वे सपत्नीकत्वे ।

पूर्वमतेऽस्वरसमाह—*स्वेनेति । *मातृपिण्डमिति । पितृभावापन्नेनैव सपिण्डनं न प्रेतेनेति नियमे मानाभावात् । अत्र पितृमातृपितामहादित्रयाणां पञ्चार्घ्यपात्राणि तत्र मातृपात्रदत्तार्घ्यशेषं पितृपात्रे आसिच्य दत्तार्घ्यजलशेषं पितृपात्रं पितामहादिपात्रत्रये सिञ्चेदित्यर्घ्यप्रकारो बोध्यः । विवेचनकृतस्तु पत्युः सपिण्डनं कृत्वा तदिन एव कालान्तरे वा भिन्नप्रयोगं स्त्रियाः

ण्डद्वयं तत्पित्रादिभिः संयोजयेत्। *अन्त्यपक्ष एव-युक्तः। स्मृत्यर्थसारे तु-'अन्वारोहणेनैकादिनमरणे स्त्रियाः पृथक्सपिण्डनं नास्ति। भर्तुः कृते स्त्रिया अपि कृतं भवति इत्युक्तम्, तन्मतान्तरमस्तु। इदं ब्राह्मादिविवाहेषु ज्ञेयम्।

आसुरादिषु तु शातातपः—

तन्मात्रा तत्पितामह्या तच्छवश्वा वा सपिण्डनम्।
आसुरादिविवाहेषु विन्नानां योषितां भवेत्।

माताम्ह्या मातुःपितामह्या तत्प्रपितामह्या चेत्यर्थः। सुमन्तुः—

पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः।
माता मातामहे तद्वदित्याह भगवाञ्छिवः॥

इदमासुरादिपरं पुत्रिकापुत्रपरं चोक्तं प्राक्। हेमाद्रिस्तु *ब्राह्मादिष्वपि सर्वत्र देशभेदाद्विकल्पमाह।

सपिण्डनं कार्यम्, आहत्य प्रयोगैक्यस्य प्रेतीभूतभर्तृपिण्डसंयोजनस्य च विध्यदर्शनात्। तत्रापि पत्नीपिण्डसंयोजनमेकेनैव भर्तृपिण्डेन। "पत्या चैकेन" इति वचनादिति प्राहुः। वस्तुतस्तु आहत्यैकप्रयोगविध्यभावेऽपि एकदेशकालकर्तृत्वादेकप्रयोगत्वं भविष्यति, "पत्या चैकेन" इति सामान्यवचनादेव च प्रेतपिण्डसंयोजनम्। नच सपिण्डनजन्यपितृभावापन्नैरेव सपिण्डनं "पितृत्वजनकपितृपात्रेषु प्रेतपात्रमासिञ्चति एतेन पिण्डो व्याख्यातः" इति कात्यायनोक्तेरिति वाच्यम्, "शुद्धं पापकृताऽपि वा" इत्यादिवशेन सम्भवन्त्याः पितृत्वापत्तेरत्याग इत्येतावन्मात्रबोधनात् भिन्नप्रयोगस्यावाचनिकत्वात् तत्कल्पनस्याचारविरोधेन दुर्घटत्वाच्चेत्याशयेनाह—*अन्त्यपक्ष एवेति। एवकारो भिन्नप्रयोगपक्षव्यावृत्त्यर्थः। आचारमपि तत्र दर्शयति—*ब्राह्मेति।

अत्र (१)च गुर्जरेषु कोकिलमतानुसारिणां मातृमातामहप्रमातामहा इति श्राद्धप्रयोगः *सपिण्डनं च दृश्यते । हेमाद्रावापस्तम्बेपि—

कोकिलस्य यथा पुत्रा अन्यसंचयजीविनः ।
पुष्टास्ते स्वकुलं यान्ति एवं नारी मृता सती ॥

यदपि विज्ञानेश्वरो मातामहेन मातुः सापिण्ड्ये पितृश्राद्धवन्मातृश्राद्धं *नित्यमित्याह, यच्च वृद्धिश्राद्धे छन्दोगपरिशिष्टम्—

षड्भ्यः पितृभ्य*स्तदनु श्राद्धदानमुपक्रमेत् । इति,

तदेतद्विषयमेव, *मातुः पृथक् श्राद्धाभावात् । अत एव हेमाद्रौ भविष्ये मातुः सपिण्डनं प्रक्रम्य—

उदितेऽनुदिते चैव होमभेदो यथा भवेत् ।
तथा कुलक्रमायातमाचारं च चरेद्बुधः ॥

इत्युक्तम् । अस्य वृद्धावपवादमाह तत्रैव व्याघ्रपात्—

कुर्यान्मातामहश्राद्धं सर्वदा मातृपूर्वकम् ।
विधिज्ञो विधिमास्थाय वृद्धौ मातामहादिवत् ॥

केचिदेतत्पुत्रिकापुत्रपरमाहुः ।

पत्युः सापिण्ड्यमाह लौगाक्षिः—

सर्वाभावे स्वयं पत्न्यः स्वभर्तृणाममन्त्रकम् ।
सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च ॥ इति ।

यत्तु वचनम्—

अपुत्रस्य परेतस्य नैव कुर्यात्सपिण्डताम् । इति,

यच्चापस्तम्बः—

अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा ।

---

*सपिण्डनं चेति । मातामहेन सहेत्यादिः । *नित्यमिति । पृथगित्यर्थः । *तदनु सपिण्डनानन्तरम् । *मातुरिति । अ-

---

(१) 'एव' नास्ति ग०

तेषां सपिण्डनाभावादेकोद्दिष्टं न पार्वणम् ॥ इति, तत्पुत्रोत्पादनविधिप्रशंसार्थमिति माधवः ।

सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं विधीयते ।
अपुत्राणां तु सर्वेषामपत्नीनां तथैव च ॥

इति हेमाद्रौ प्रचेतसोक्तेश्च । अन्ये तु द्विविधवाक्यदर्शनाद्विकल्पमाहुः । स्मृत्यर्थसारेपि–'ब्रह्मचारिणामनपत्यानां च सपिण्डनं नास्ति, तेषां सदैकोद्दिष्टमेव *व्युत्क्रममृतानां सापिण्ड्यं कार्यं न वा । केचि*त्सर्वत्र

न्यथेत्यादिः । अन्यत्र "पतिना सह" इत्युक्तेः । *व्युत्क्रमेति ।

पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्तयेत् प्रपितामहम् ॥

इति मनूक्तौ पितुर्नाम संकीर्त्य पितरं देवतात्वेनोद्दिश्य प्रपितामहं तदादित्रीनुद्दिशेदित्यर्थात् "यस्य पिता प्रेतः स्यात्स पित्रे पिण्डं निधाय पितामहात्पराभ्यां दद्यात्" इति विध्युक्तौ "पित्रे पिण्डं निधाय पितामहात् पराभ्यां दूवाभ्याम्" इत्यत्र तृतीयस्याप्युपलक्षणादितिव्याख्यापक्षे कार्यम् अन्यव्याख्यायां तु न कार्यम् । सा चेत्थम्, व्युत्क्रममृतपुत्रेण दर्शादौ पितामहादीनामेव पार्वणं कार्यम्,

ब्राह्मणादिहते ताते पतिते संगवर्जिते ।
व्युत्क्रमाच्च मृते देयमेभ्य एव ददात्यसौ ॥

इति कात्यायनोक्तेः । एवञ्चोक्तमानवं पितुः पितामहप्रपितामहवृद्धप्रपितामहेभ्य इति प्रयोगनियमार्थम् । पितृप्रपितामहवृद्धप्रपितामहोद्देश्यकपार्वणविध्यर्थत्वासम्भवेन पितुर्नाम सङ्कीर्त्येत्यादेः तत्सम्बन्धित्वेन स्वप्रपितामहादिबुद्धिरेवेत्यर्थात् । ईदृशपार्वणेन सदा पितुरेकोद्दिष्टं च कार्यं, प्रोक्तविष्णुना "पित्रे पिण्डं निधाय" इत्युक्तेः । एवञ्च तद्वाक्ये पितामहादित्यादेः

सपिण्डनमाहुरिति । अपुत्रे व्युत्क्रममृते विशेषो रेणुकारिकायाम्—

*भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सर्वबन्धुविहीनस्य पत्नी कुर्यात्सपिण्डताम् ।
ऋत्विजं कारयेद्वापि पुरोहितमथापि वा ॥
वसुरुद्रादितिसुतैः कार्या तेषां सपिण्डता ।
व्युत्क्रमाच्च प्रमीता *ये*तद्विना प्रेतता ध्रुवम् ॥
पुनः सपिण्डनं तेषां कुर्यात्प्रेते पितामहे । इति ।

*अत्र मूलं मृग्यम् । यतीनां सपिण्डनं नास्ति किन्त्वेकादशेह्नि पार्वणं कार्यम् । तदपि त्रिदण्डिनः । एकदण्ड्यादीनां तदपि नेत्युक्तं प्राक् । दण्डग्रहणात्पूर्वं मृते तु दाहादिसपिण्डनान्तं सर्वं कार्यमिति भट्टचरणाः ।

सपिण्डनविधिमाह बैजवापः-'समासे संवत्सरे चत्वार्युदपात्राणि प्रयुनक्ति एकं प्रेताय, त्रीणि पितृभ्यः प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्या*मेवं पिण्डोऽथाभिमृशति—

एष वोऽनुगतः प्रेतः पितरस्तं ददामि वः ।

पितुर्यः पितामहस्तत्पराभ्यां दूवाभ्यां दद्यादित्यर्थः । पितामहस्त्वात्मनः प्रपितामहः सम्प्रदानभूतः स्थित एवेति पितुः पितामहादित्रयलाभः । *सर्वत्रेति । इदानींतनाः शिष्टाः परिगृह्णन्ति । *भ्राता वेति । एकादशाहान्तश्राद्धकर्ता स तदन्यो वेत्यत्र न विशेषः । *ये इति । तेषां सपिण्डतां कुर्यादित्यनुवर्तते । हेतुमाह—*तद्विनेति । सपिण्डनं विनेत्यर्थः । *अत्रेति । पुनः सपिण्डनांशे इत्यर्थः । यदि च व्युत्क्रममृतस्य सपिण्डनमकृतं तदा पितामहे मृते तेन कुर्यादिति व्याख्या तेषां पुनरिति योजनयोचितेति बोध्यम् । *एवंपिण्ड इति । पिण्डोत्थानपर्यन्तं पिण्डदा-

शिवं भवतु शेषाणां जायन्तां चिरजीविनः ॥

"समानी वः" "संगच्छध्वं संवदध्वम्" इति (१)द्वाभ्याम्' इति । यद्यपि—

तच्चापि देवरहितमेकाघ्र्यैकपवित्रकम् ।
नैवाग्नौकरणं तत्र तच्चावाहनवर्जितम् ॥

इति मार्कण्डेयेनोक्तम्, तथापि—

सपिण्डीकरणं श्राद्धं दैवपूर्वं नियोजयेत् ।

इत्यादिविरोधाद्विकल्पः, प्रेतांशे वा ज्ञेयम् ।

अत्र कामकालौ विश्वेदेवावपीत्युक्तं प्राक् । मैत्रायणीयपरिशिष्टे—

पित्र्यविप्रकरे होमः साग्नेरपि भवेदिह ।

यत्तु गोभिलः—

अनुक्तकालेष्वपि तु व्युत्क्रमेण मृतावपि ।
आमेन वापि सापिण्ड्यं हेम्ना वापि प्रकल्पयेत्॥इति,

तदापदि मातापितृभिन्नपरम्,

आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ।

इति तेनैवोक्तेः । शुद्धितत्त्वे कामधेनौ च लघुहारीतः—

सपिण्डीकरणं यावत्प्रेतश्राद्धं तु षोडशम् ।
पक्वान्नेनैव कर्तव्यं सामिषेण द्विजातिभिः ॥

विश्वप्रकाशे—

प्रेतः सपिण्डनादूर्ध्वं पितृलोकेऽनुगच्छति ।
कुर्यात्तस्य तु पाथेयं द्वितीयेऽह्नि सपिण्डनात् ॥

नमयोगं कृत्वा पिण्डसंयोजनं कार्यं, "दत्त्वा पिण्डान्" "निरूप्य चतुरः पिण्डान्" इत्यादिपिण्डदानभावनोत्तरं तद्विधानात् । विष्णुना तु विसर्जनोत्तरमुक्तम् "उच्छिष्टसंनिधौ पिण्डत्रयं कुर्यात्

(१) 'द्वाभ्याम् इति यद्यपि' नास्ति ग० ।

स्मृत्यर्थसारेऽप्येवम् । ततो वृद्धिश्राद्धं कुर्यात् । एतन्मलमासेपि कार्यम्,

अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा ।
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति हेमाद्रौ हारीतोक्तेः ॥

इति भट्टकमलाकरकृते निर्णयसिन्धौ सपिण्डीकरणम् ॥

अथ प्रथमाब्दे निषिद्धानि । हेमाद्रौ—

*स्नानं चैव महादानं *स्वाध्यायं चा*ग्नितर्पणम् ।
प्रथमाब्दे न कुर्वीत महागुरुनिपातने ॥

अन्यतर्पणामिति शुद्धितत्त्वे पाठः ।

अग्नितर्पणं लक्षहोमादि नत्वा*धानम् ।

तत्तु प्रथमाब्दे भवत्येव । तदाह हेमाद्रावुशनाः—

पितुः सपिण्डीकरणं वार्षिके मृतवासरे ।
आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् ॥

आदिपदं *वृद्धिनिमित्तानित्यकर्मपरम् । दिवोदासीये—

महातीर्थस्य गमनमुपवासव्रतानिच ।
संवत्सरं न कुर्वीत महागुरुनिपातने ॥

देवपूर्वान् ब्राह्मणानाचान्तानदत्तदक्षिणांश्चानुव्रज्य विसर्जयेत् । ततः प्रेतपिण्डमर्घ्यपात्रोदकवत् पिण्डत्रये निदध्यादिति" । केचित्तु संयोजितान् त्रीन् पिण्डान् इदानीन्तनमृतमारभ्य पुरुषत्रयपर्यन्तं पुनरपि पार्वणवन्नामगोत्राण्युच्चार्य दद्यादित्याहुः । तत्तु न ग्रन्थकृत्संमतम् , तथावचनानुपलम्भात् । अक्षय्यादौ तु प्रेतशब्द एव । पिण्डमात्रेण पितृत्वाप्राप्तेः सङ्गस्य जनकत्वात् ।

*स्नानं समावर्तनं काम्यस्नानं वा । *स्वाध्यायं काम्याध्ययनम् । *अग्नितर्पणामिति पितृतर्पणमिति पाठान्तरम् । *आधानं पुनराधानम् । *वृद्धीति । आवश्यकेषु वि-

इदं श्राद्धकौमुद्यां देवीपुराणस्थमुक्तम् ।

गौडनिबन्धे मात्स्ये—

सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।
वृद्धीष्टापूर्तयोग्यश्च गृहस्थश्च सदा भवेत् ॥

वर्षान्तसपिण्डनाभावे नाधिकारीत्यर्थः । गृहस्थः सपिण्डोऽपीत्यर्थः । अत एव—

*प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् ।
आचतुर्थं, ततः पुंसि पञ्चमे शुभदं भवेत् ॥

इति ज्योतिषे उक्तम् । माधवीये देवलः—

प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।
न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः ॥

इदं वर्षान्तसपिण्डनपरम्,

तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ।

इति लघुहारीताद्येकवाक्यत्वात् । वृद्धिनिमित्तापकर्षे तु वर्ष(१)मध्येऽपि काम्यादि भवत्येवेति गौडाः । पित्र्यं सपिण्डनम् । अत एव लौगाक्षिः—

अन्येषां प्रेतकार्याणि महागुरुनिपातने ।
कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत् ॥

वाहचौलोपनयनेष्टापूर्तेषु वर्षमध्येऽधिकार इत्यर्थः । *प्रेतकर्माणीति । येषां करिष्यमाणवृद्धिश्राद्धे देवतात्वं तेषामेवापकर्षो नान्येषां प्रमाणाभावादिति मते आत्मानमारभ्य चतुर्थः प्रपितामहः तत्पर्यन्तसपिण्डनमावश्यकम् । स्वकर्तृकाभ्युदयिकश्राद्धे पितृपितामहप्रपितामहानां देवतात्वात्सपिण्डीकरणाभावे वृद्धिश्राद्धाभावात् । पञ्चमस्य वृद्धप्रपितामहस्य पौत्रपुत्रकर्तृकाभ्युदये देवतात्वाभावात् सपिण्डीकरणान्तश्राद्धाभावेऽपि तत्कर्तृकाभ्युद-

(१) 'वर्षमध्येऽपि' नास्ति ग० ।

दाहाद्येकादशाहान्तं कार्यम् । तत्राशौचान्तरस्याप्रतिबन्धकत्वात् ।

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेहनि ।

इत्युक्तेश्च । एकं सपिण्डनम् ।

पत्न्यादौ त्वपवादमाह माधवीये ऋष्यशृङ्गः—

पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य च ।
स्नुषास्वस्रोश्च पित्रोश्च संघातमरणं यदि ॥
अर्वागब्दान्मातृपितृपूर्वं सापिण्ड्यमाचरेत् ॥

लौगाक्षिः—

पत्नी पुत्रस्तथा पौत्रो भ्राता तत्पुत्रका अपि ।
पितरौ च यदैकस्मिन् (१)म्रियेरन्वासरे तदा ॥
आद्यमेकादशे कुर्यात्त्रिपक्षे तु सपिण्डनम् ॥

धवलनिबन्धे—

महागुरुनिपाते तु प्रेतकार्यं यथाविधि ।
कुर्यात्संवत्सरादर्वागेकोद्दिष्टं न पार्वणम् ॥

भृगुः—

माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा ।
एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पितुः ॥

एतदपि सपिण्डनपरम् । पितुर्मृतावन्यस्य श्राद्धं न चरेदित्यर्थः । शुद्धितत्त्वे श्रा(२)द्धकौमुद्यां च देवलः—

अन्यश्राद्धं परान्नं च गन्धमाल्यं च मैथुनम् ।

यिकं शुद्धमित्यर्थः । यस्यकस्यापि सपिण्डस्य गृहे वृध्युपस्थितौ येन केनापि सपिण्डेन स्वपित्रादेः सपिण्डनं कार्यमिति दाक्षिणात्यरीतौ च वर्षमध्ये सपिण्डनेऽप्यनधिकारश्चतुर्थान्तः । अत एव गृहस्थः सपिण्डोऽपि इत्युक्तम् । पञ्चमादौ तु उक्तदाक्षिणा-

---

(१) 'म्रियेताम्' । (२) 'श्राद्धकौमुद्यां च' नास्ति ग० ।

वर्जयेद् गुरुपाते तु यावत्पूर्णो न वत्सरः ॥

पारस्करभाष्ये बृहस्पतिः—

पितर्युपरते पुत्रो *मातुः श्राद्धान्निवर्तते।
मातर्यपि च वृत्तायां पितृश्राद्धादृते समम् ॥

समं पितरं विनाऽन्यश्राद्धं नेत्यर्थः। शुद्धितत्त्वे देवलः—

महागुरुनिपाते तु काम्यं किंचिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं देवक्रियां तथा ॥

एतत्सपिण्डनात्प्रागिति केचित्। तदुत्तरमपीत्यन्ये। श्राद्धकौमुद्यां कालिकापुराणे पू(१)र्वार्धे—

विशेषतः शिवपूजां प्रमीतपितृको नरः।
यावद्वत्सरपर्यन्तं *मनसापि न चाचरेत् ॥

केचित्तु—

पित्रोरब्दमशौचं स्यात्षण्मासं मातुरेव च।
त्रैमासिकं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥

इति स्मृतेः सापत्नमातु*रब्दार्धमाहुः। श्राद्धकौमुदीकारस्तु—

द्वयोरेव महागुर्वोरब्दमेकमशौचकम्।
नान्येषामधिकाशौचं स्वजातिविहितात्किल ॥

त्याचाराद् वर्षमध्ये सपिण्डने इष्टापूर्तादिकमपि शुभदमिति। *मातुः श्राद्धादिति। यत्र मातृमरणानन्तरं पिता मृतस्तत्र मातुः सपिण्डनस्यावश्यकतया स्वपुत्रादिना तत्कारणीयम्। अथवा यत्र मातुः सपिण्डनमपि न कार्यं तत्रान्यसपिण्डने किं वक्तव्यमित्यन्यसपिण्डननिन्दायां तात्पर्यम्। *मनसापीति। अपिः संक्षेपपूजाविशेषलाभार्थः *अब्दार्धमिति। पूजाऽनाचरणार्थ-

(१) 'पूर्वार्धे' नास्ति क० ख०।

इति समूलजातूकर्ण्यविरोधान्निर्मूलमाह । हेमाद्रौ भविष्ये—

गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते ।

त्रिस्थलीसेतौ गारुडे—

तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकम् ।
अ(१)ब्दमध्ये न कुर्वीत महागुरुविपत्तिषु ॥

इदं वृद्ध्यर्थसपिण्डनाभावे । वृद्धौ सपिण्डनापकर्षेऽब्दमध्येपि दर्शादि कार्यमेव,

पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम् ।

इति छन्दोगपरिशिष्टात्;

सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।

इति मात्स्यात्;

ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते ।
विन्दते पितृलोकं च ततः श्राद्धं प्रवर्तते ॥

इति हारीताच्चेति शूलपाणिः । यत्तु कातीयम्—

सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम् ।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः ॥ इति ।

तत्रैकोद्दिष्टविधिना न दद्यादित्यन्वयः । *तुर्यपादेन पार्वणे विकल्प उक्तः ।

(ब्रह्म(२)वैवर्ते—

उद्वाहश्चोपनयनं प्रथमेऽब्दे महीपते ।
कृते सपिण्डनेऽप्यूर्ध्वमस्थनां चोद्धरणं त्यजेत् ॥
तथापि कर्तुमिच्छन्ति त्रीणि चैतानि वै सुताः ।

मिति शेषः । ननु पुनर्दद्यादित्यधिकं स्यादित्यत आह—*तुर्येति ।

प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि ।

---

(१) 'प्रथमाब्दे' क० (२) कंसान्तर्गतं नास्ति । क० छ०

मासिकान्यवशिष्टानि चापकृष्य चरेत्पुनः ॥)

अत्रेदं तत्त्वम् । वृद्धिं विनाऽर्वागपि सपिण्डनापकर्षे पितृत्वप्राप्तिर्वर्षान्त एव,

कृते सपिण्डीकरणे नरः संवत्सरात्परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥

इति विष्णुधर्मोक्तेः—

अर्वाक्संवत्सराच्चस्य सपिण्डीकरणं भवेत् ।
प्रेतत्वमिह तस्यापि विज्ञेयं वत्सरं नृप ॥

इत्यग्निपुराणाच्च । तेन तत्सत्त्वेऽपि वृद्धिदैवपित्र्येष्वनधिकारः । वृद्धिनिमित्ते त्व*नन्तरमेव,

अर्वाक्संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा ।
ये सपिण्डीकृताः प्रेता न तेषां तु*पृथक् क्रिया ॥

इति शातातपोक्तेः । तथैव काम्यमिति हेमाद्रिधृतहारीतादिवशाच्चैवमिति । तथा—

अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
प्रथमेऽब्दे न कुर्वीत *(१)कृतेऽपि तु सपिण्डने ॥

अस्यापवादः—

अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
प्रथमेऽब्देऽपि कुर्वीत*यदि स्याद्भक्तिमान्सुतः ॥

*भक्त्याख्यं श्राद्धं तद्वानिति मदनपारिजातादयः । अन्ये यथाश्रुतमाहुः । तत्त्वं तु यदीदं समूलं तदा वृद्धिं

इति प्रागुक्तत्वादिति भावः । *अनन्तरमेवेति । पितृत्वप्राप्तिरिति वर्तते । *पृथक्क्रियेति । आभ्युदयिकश्राद्धदेवतात्वात् पृथक्कार्येत्यर्थः । एवञ्च पितृत्वावाप्तिरर्थसिद्धैवेति । *कृतेपि त्विति । यदि न स्यात्सापिण्डनमिति अन्यत्र पाठः । *यदि स्यादिति । कृतं यस्यौर्ध्वदेहिकमिति केचित् । *भ-

(१) 'कृते पितुः' ग०

विनापकर्षे पूर्वं,*वृद्ध्यर्थं तु परामिति योज्यम् । पतितानां गयायां विशेषो ब्राह्मे—

क्रियते पतितानां च गते संवत्सरे क्वचित् ।
देशधर्मप्रमाणत्वाद्गयाश्राद्धं स्वबन्धुभिः ॥

अथ विधानानि । तत्र पञ्चकमृते मदनरत्ने गारुडे—

आदौ कृत्वा *धनिष्ठार्धमेतन्नक्षत्रपञ्चकम् ।
रेवत्यन्तं सदा दृष्यमशुभं दाहकर्मणि ॥
शवस्य च समीपे तु क्षेप्तव्याः पुत्तलास्तदा ।
दर्भमयास्तु*चत्वार ऋक्षमन्त्राभिमन्त्रिताः ॥
ततो दाहः प्रकर्तव्यस्तैश्च पुत्तलकैः सह ।
सूतकान्ते ततः पुत्रैः कार्यं शान्तिकपौष्टिकम् ॥
*पञ्चकेषु मृतो यो वै न गतिं लभते नरः ।
तिलांश्चैव हिरण्यं च तमुद्दिश्य घृतं ददेत् ॥

क्रियानिबन्धे—

भाजनोपानहौ छत्रं हैममुद्रां च वाससी ।

त्याख्यामिति । देवतात्वसंपादकं चेदम् । *वृद्ध्यर्थं तु इति । अपकर्षे इति वर्तते । एवञ्च भक्तिमानिति यथाश्रुतमेव सिद्धाया भक्तेरनुवादः ।

यतिधर्मे—

नाश्नन्ति पितरो देवा मृते वै गृहमेधिनि ।
भिक्षुर्भिक्षां न गृह्णाति यावत्कुर्यात्सापिण्डनम् ॥

अत्र वर्षान्ते वृद्ध्यर्थं वा सपिण्डनमवधिः । पितुरब्दमशौचं स्यादिति वचनानुसारिणो यतयः । *धनिष्ठार्धमिति । अतिनिषिद्धं धनिष्ठाया एव निषेधात् । *चत्वार इति चतुर्नक्षत्राभिप्रायकम् । तेन दर्भाणां प्रतिमाः कार्याः इत्यादिना न विरोधः । ऋक्षमन्त्रा जप्याः । अत्र वसवोरन्त१, तत्त्वायामि ब्रह्मणा२, सुतनोहिबुध्न्यः३, कद्रुद्राय४, पूषा गा अन्वेतु५ । शान्तिकपौष्टिकं वक्ष्यति ।

दक्षिणा दीयते विप्रे सर्वपातक*मोचनी ॥

मदनरत्ने गार्ग्यः—

यदि भद्रातिथीनां स्याद् भानुभौमशनैश्चरैः ।
त्रिपादृक्षैश्च संयोगो द्वयोर्योगे द्विपुष्करः ॥
द्विस्त्रिपुष्करयोगे तु मृतिर्मृत्यन्तरावहा ।
दहने मरणे चैव त्रिगुणं स्यात्त्रिपुष्करे ॥
खननेऽप्येवमेव स्यादेतद्दोषोपशान्तये ।
तिलपिष्टैर्यवैर्वापि शरीरं कारयेत्ततः ॥
शूर्पे निधायालंकृत्य दाहयेत्पैतृकोपरि ॥

तद्दाहे मन्त्रमाह बौधायनः—

अस्मात्त्वमिति मन्त्रेण तिलपिष्टं प्रदाहयेत् ।
द्विस्त्रिपुष्करयोर्दोषस्त्रिभिः कृच्छ्रैर्व्यपोहति ॥
वासवे मरणं चेत्स्याद् गृहे वापि पुनर्मृतिः ।
सुवर्णं दक्षिणां दद्यात्कृष्णवस्त्रमथापि वा ॥

वासवं धनिष्ठा । ब्राह्मे—

कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते ।
न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत् ॥
न तस्य दाहः कर्तव्यो विनाशात्स्वेषु*जन्तुषु ।
अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकम् ।
धनिष्ठापञ्चके जीवो मृतो यदि कथंचन ।
त्रिपुष्करे याम्यभे वा कुलजान्मारयेद्ध्रुवम् ॥
तत्रानिष्टविनाशार्थं विधानं समुदीर्यते ।

प्रेतस्य गतिसिद्ध्यर्थमाह—*पञ्चकेष्विति । *मोचनीति ।

बालवृद्धस्य यूनश्च पञ्चकेषु मृतस्य च ।
विधानं यो न कुर्वीत विघ्नस्तस्य प्रजायते ॥

इत्युत्तरश्लोकः । *जन्तुष्विति । ततः पञ्चकानन्तरं

दर्भाणां प्रतिमाः कार्याः पञ्चोर्णासूत्रवेष्टिताः ॥
यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् ॥
प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ।
प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ॥

अत्र प्रतिमा गन्धपुष्पैः पूजयित्वा प्रथमां शिरसि, द्वितीयां नेत्रयोः, तृतीयां वामकुक्षौ, चतुर्थीं नाभौ, पञ्चमीं पादयोन्यस्य तदुपरि नामाभिर्घृतं *हुत्वा—"यमाय सोमं" "त्र्यम्बकम्" इति मन्त्राभ्यां प्रत्येकं तास्वाज्यं हुनेदिति भट्टाः ।

सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ।
कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्मने ॥
ब्रह्मविष्णुमहेशेन्द्रवरुणप्रीतये ततः ।
माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति ॥
स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चनम् ।
गोभूदानं षडंशेन कुर्याद्दोषोपशान्तये ॥

अपरार्के—

धनिष्ठापञ्चकमृते पञ्चरत्नानि तन्मुखे ।
प्रास्याहुतित्रयं तत्र हुनद्वहवपामिति ॥
ततो निर्हरणं कुर्यादेष साग्नेर्विधिः स्मृतः ।
इतरं निखनेदेव जले वा प्रतिपादयेत् ॥
त्रिपादर्क्षमृते तद्वद्धिरण्यशकलं मुखे ।
न्यस्य पिष्टमयं कुर्यात्पुरुषत्रितयं ततः ।
होमं प्रतिमुखं कुर्यात्तथा वहवपामिति ।
कार्ष्णायसं च कार्पासं कुसुम्भं प्रतिपाद्य च ।
निर्यात्य साग्निं संस्कुर्यादभुक्त्यग्नौ वान्यमुत्सृजेत् ॥

कार्यं दाहादिकं मध्ये न त्वित्यर्थः । *हुत्वेति । उदकधारां च द-

तत्रैव—

कनकं हीरकं नीलं पद्मरागं च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्वदर्शिभिः ॥
रत्नानां चाप्यभावे तु स्वर्णं कर्षार्धमेव च ।
सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः ॥

मदनरत्नेप्येवम् । तथा—

एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकम् ।
नवषट्त्रिपलं वापि दद्याद्विप्राय शक्तितः ॥

तथा*न्यत्र—

*स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः ।
अन्वाधानं निर्वपणं देवतानां तथाहुतिः ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात् ॥
विधिना अर्पणं कृत्वा एकैकामाहुतिं *हुनेत् ॥

त्रिपादर्क्षेप्येतदेव । अपरार्के—

पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी ।
पूर्वाभाद्रा विशाखा च ज्ञेयमेतत्त्रिपादभम् ॥

मयूरचित्रे गर्गः—

मृतः श्मशानं यो नीत उपजीवति मानवः ।

त्वेति अन्त्येष्टिः । *अन्यत्र बौधायनीयशान्तिसर्वस्वे । *स्वगृह्योक्तेति ।

पञ्चके ये मृता विप्रास्तेषां शान्तिं विधानतः ।
अतीते सूतके कुर्यात्कोचित्तद्दक्षयोगतः ॥

इत्यादि । *हुनेदिति ।

कृष्णां गां कृष्णवत्सां च हैमनिष्कसमन्विताम् ।

गृहे यस्य प्रविष्टोसौ तिष्ठेदथ कदाचन ॥
अचिरान्मृत्युमायाति हृतदारपरिग्रहः।
तत्र शान्तिं प्रवक्ष्यामि धर्मराजमतं यथा ॥
सक्षीराणां घृताक्तानामग्नेर्हुत्वा मुखे बुधः।
औदुम्बराणां विधिवत्ततः शान्तिः कृता भवेत् ॥
साविंश्यष्टसहस्रेण क्षीरशान्तिं च कारयेत।
कपिलां तिलकांस्यं च हुतान्ते भूरिदक्षिणा॥ इति।

अथ ब्रह्मचारिमृतौ शौनकः—

ब्रह्मचारिमृतौ रीतिं कथयामि समासतः।
तत्रावकीर्णदोषस्य प्रायश्चित्तं प्रशान्तये ॥
द्वादशाब्दं षडब्दं वा त्र्यब्दं शक्त्याथवा*चरेत्।
स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि ॥
संयोज्य चार्कविधिना संयोज्यौ तौ ततः परम् ॥

देशकालौ स्मृत्वा-'अमुकगोत्राऽमुकनाम्नो मृतस्य ब्रह्मचारिणो व्रतविसर्गं करिष्ये' इत्युक्त्वा हेम्ना नान्दीश्राद्धं कृत्वाऽग्निं प्रतिष्ठाप्याघारान्ते चतसृभिर्व्याहृतिभिरग्नये व्रतपतये व्रतानुष्ठानसंपादनाय विश्वेभ्यो देवेभ्यश्चाज्यं हुत्वा स्विष्टकृदादि समाप्य पुनर्देशकालौ स्मृत्वाऽर्कविवाहं करिष्ये इत्युक्त्वा हेम्ना नान्दीश्राद्धं कृत्वाऽर्कशाखां शवं च हरिद्रया लिप्त्वा पीतसूत्रेण वस्त्रयुग्मेन चावेष्ट्याऽग्निं प्रतिष्ठाप्याघारान्तेऽग्नये बृहस्पतये विवाहविधियोजकाय च "यस्मै त्वं कामकामाय" इति कामाय व्याहृतिभिश्चाज्यं हुत्वा स्विष्टकृदादि

दद्याद् विप्राय शान्ताय प्रीतो भवतु मे यमः ॥
इत्यपि क्वचित्। *चरेदिति।
ततो वृषविसर्गाख्यं विधिं सम्यक् समाचरेत्।

समाप्यार्कशाखां शवं च दहेत् । विधानमालायाम्—

येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि ।
तत्कुलं क्षयमाप्नोति सोऽपि*दुर्गतिमाप्नुयात् ॥
मृतस्य म्रियमाणस्य षडब्दं व्रतमादिशेत् ॥
त्रिंशद्भ्यो *ब्रह्मचारिभ्यो दद्यात्कौपीनकान्नवान् ।
हस्तमात्रान्कर्णमात्रान्दद्यात्कृष्णाजिनानि च ॥
पादुकाछत्रमाल्यानि गोपीचन्दनमेव च ।
मणिप्रवालमालाश्च *भूषणादि समर्पयेत् ॥
एवं कृते विधाने च विघ्नः कोऽपि न जायते ।

अत्र मूलं मृग्यम् ॥

कुष्ठिमृतौ तु यमः—

मृतस्य कुष्ठिनो देहं निखनेद्गोष्ठभूमिषु ।
वासरत्रितयं पश्चादुद्धृत्यान्यत्र तं दहेत् ॥
न गङ्गाप्लवनं कार्यं निक्षेपे विधिरुच्यते ।
षडब्दव्रतपूर्णेन विधिनान्त्यं क्रतुं चरेत् ॥
ततोऽस्थिसंचयं तस्य गङ्गायां प्रक्षिपेत्सुधीः ।
मासिमासि ततः कुर्यान्मासि श्राद्धानि पार्वणान् ॥
इत्येतत्कुष्ठिमरणे कथितं शास्त्रकोविदैः ॥

शुद्धितत्त्वे भविष्ये—

शृणु कुष्ठिगणं विप्र उत्तरोत्तरतो गुरुम् ।
विचर्चिका तु दुश्चर्मा चर्चरीयस्तृतीयकः ॥

इत्युत्तरार्धम् । एवमेव ब्रह्मचारिपदस्थाने स्नातकपदं योजयित्वा विधिर्द्रष्टव्यः । *दुर्गतिमिति । सा च तत्रैव—

ग्रहत्वमाप्नुयाद् बोधिद्रुमेऽनवरतं वसेत् । इति ।

*ब्रह्मचारिभ्य इति । तदभावे "ये सकृद्रात्रौ संयुज्यन्ते ब्रह्मचारिण एव ते" इत्युक्तब्रह्मचारिभ्यः । साधुगृहस्थेभ्य इत्य-

विकर्चूव्रणताम्रौ च कृष्णश्वेते तथाष्टकम् ॥
इत्युक्त्वा—
मृते तु प्रापयेत्तीर्थमथवा तरुमूलकम् ।
न पिण्डं नोदकं कार्यं नच दानक्रियां चरेत् ॥
षण्मासीयस्त्रिमासीयो मृतः कुष्ठी कदाचन ।
यदि स्नेहाच्चरेद्दाहं यतिचान्द्रायणं चरेत् ॥
अकृतप्रायश्चित्तकुष्ठ्यादिदाहे इदं प्रायश्चित्तम् ॥
अत एव कुनख्यादिवत्कुष्ठिनोपि द्वादशरात्रं शूलपाणिनोक्तम् । अतएवान्यदीयकुष्ठिनो मरणान्तमाशौचमुक्तं कौर्मे—
क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥
महारोगास्तु—
वातव्याध्यश्मरीकुष्ठप्लीहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिताः ॥ इति ।
रजस्वलायास्तु वृद्धशातातपः—
रजस्वलायाः प्रेतायाः संस्कारादीन्न चाचरेत् ।
ऊर्ध्वं त्रिरात्रात्सा तां तां शवधर्मेण दाहयेत् ॥
अतः प्रक्षाल्य काष्ठैर्दग्ध्वा *त्र्यहोर्ध्वं दहेत् ॥ सङ्कटे तु मदनरत्ने स्मृत्यन्तरे—
उदक्या सूतिका वापि मृता स्याद्यदि तां तदा ।
आशौचे त्वनतिक्रान्ते दाहयेदन्तरा यदि ॥
उद्धृतेन तु तोयेन स्नापयित्वा तु मन्त्रतः ।
आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाश्चतसृभिः ॥
पवमानानुवाकेन यदन्तीति च सप्तभिः ।

न्ये । *भूषणादीति । ब्रह्मसूत्राणि चार्पयेदिति अन्त्येष्टिः । *त्र्य-

ततो यज्ञपवित्रेण गोमूत्रेणाथ ते द्विजाः ॥
स्नापयित्वाऽन्यवसनेनाच्छाद्य शवधर्मतः ।
दाहादिकं ततः कुर्यात्प्रजापतिवचो यथा ॥

यज्ञपवित्रमापो अस्मानिति । मिताक्षरायाम्—

पञ्चभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलाम् ।
वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकम् ॥

गृह्यकारिकायाम्—

अन्तरिक्षमृता ये च वह्नावप्सु प्रमादतः ।
उदक्या सूतिका नारी चरेच्चान्द्रायणत्रयम् ॥

ततो यवपिष्टेना*नुलिप्याष्टोत्तरशतं शूर्पोदकैः *संस्नाप्य *भस्मगोमयमृत्कुशोदकपञ्चगव्यशुद्धोदकै-*रापोहिष्ठापावमानीभिः संस्नाप्यान्यवस्त्रे धृते दहेदिति भट्टाः ।

अत्र प्रायश्चित्तमाह बौधायनः—

उदक्यासूतिकामृत्यौ चरेच्चान्द्रायणत्रयम् । इति ।

सूतिकायास्तु मिताक्षरायाम्—

सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ।
कुम्भे सलिलमादाय पञ्चगव्यं क्षिपेत्ततः ॥
पुण्याहैरभिमन्त्र्यापो वाचा शुद्धिं लभेत्ततः ।
तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥
अङ्गिरोभिर्मन्त्रिताभिर्वामदेव्याभिरेव च ।
अन्यैश्च वारुणैर्मन्त्रैः संस्नाप्य विधिना दहेत् ॥

होर्ध्वमिति अतन्त्रम् । *अनुलिप्येति । स्वयं स्नात्वेति शेषः । *संस्नाप्येति । प्रेतं प्रक्षाल्येति शेषः । *भस्मेति । संस्नाप्येत्यनुवर्तते । *आपोहिष्ठेति । पावमानीः स्वस्त्ययनीः, यदन्ति यच्च दूरके, आपोहिष्ठेति चतसृभिः, कया नः इति

गृह्यकारिकायाम्—

सूतिकामरणे प्राप्ते सर्वौषध्यनुलेपनम् ।
असूतकी तु संस्पृष्टः शूर्पाणां तु शतं क्षिपेत् ॥

प्रायश्चित्ते विशेषस्तत्रैव—

सूतिका तु यदा साध्वी विख्याता मरणं गता ।
त्रिवर्षपूर्णपर्यन्तं शुध्येत्कृच्छ्रेण सर्वदा ॥

इदं चाद्यन्यहे ॥

सूतिका तु यदा नारी रजसा तु परिप्लुता ।
म्रियते चेत्तु सा नारी द्विवर्षं कृच्छ्रमाचरेत् ॥

इदं द्वितीयन्यहे ॥

सूतिका तु यदा साध्वी विख्याता मरणं गता ।
अब्दं कृच्छ्रेण शुद्ध्येत व्यासस्य वचनं यथा ॥

इदं तृतीयन्यहे । अत्राशक्तौ पक्षान्तरमुक्तं तत्रैव—

सूतिका तु यदा नारी विख्याता मरणं गता ।
त्रिषण्णवदिनादर्वागे*काब्देन विशुद्ध्यति ॥

ऊर्ध्वं तु—

सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।
मासमेकावधिं यावत्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥

गर्भिणीमृतौ मदनरत्ने शौनकः—

गर्भिण्युदक्यासंस्कारं शिशुसंस्कारमेव च ।

त्रिभिरित्यर्थः । *एकाब्देनेति । एककृच्छ्रेणेति पठित्वा दशाहोर्ध्वमेककृच्छ्रमित्यन्ये ।

सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।
मासमेकावधिर्यावत्त्रिभिः कृच्छ्रैर्व्यपोहति ॥

इति तु दशाहोर्ध्वम् । सर्वं च प्रायश्चित्तं तदैव प्रत्याम्नायेन सूतकान्ते वा कार्यम् ।

प्रवक्ष्यामि समासेन शौनकोऽहं द्विजन्मनाम् ॥
गर्भिणीमरणे प्राप्ते गोमूत्रेण जलैः सह ।
आपोहिष्ठादिभिर्मन्त्रैः प्रोक्ष्य भर्ता समास्थितः ॥
प्रेतं श्मशाने नीत्वाऽथोल्लिख्य सव्योदरं ततः ।
पुत्रमादाय जीवंश्चेत्स्तनं दत्त्वा सुताय तु ॥
यस्ते स्तनः शशय इत्यृचा ग्रामे निधाय च ।
उदरं चाव्रणं कुर्यात्पृषदाज्येन पूर्यं च ॥
मृद्भस्मकुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः ।
स्नाप्य चाच्छाद्य वासोभिः शवधर्मेण दाहयेत् ॥

तत्रैव षडशीतिमते गद्यानि—"गर्भिण्यां मृतायां दक्षिणशिरसं निधाय तस्या नाभिरन्ध्रात्सव्यमुदरं चतुरङ्गुलं हिरण्यगर्भः समवर्ततेति छित्त्वा गर्भश्चेदप्राणस्तं प्रक्षाल्य निखनेत्स यदि जीवन् 'जीव त्वं मम पुत्रक' इत्युक्त्वा क्षेत्रियेत्वेति पञ्चभिः स्नापयित्वा हिरण्यमन्तर्धाय भूमौ निधाय व्याहृतिभिरभिमन्त्र्य यस्ते स्तनः शशय इति स्तनं पाययित्वा शिशुं ग्रामं प्रापयेत् । गर्भच्छेदस्थले शतायुधायेति पञ्चाहुतीर्हुत्वा प्राणाय स्वाहा पूष्णे स्वाहेत्यनुवाकाभ्यां व्याहृत्या वाऽऽज्यं हुत्वा भिन्नमुदरं सूत्रेण संग्रथ्य घृतेनानुलिप्य ब्राह्मणाय तिलान् गां भूमिं सुवर्णं दद्यादथ यथोक्तेन कल्पेन दहेत्" । बौधायनेन तु शतायुधायेति पञ्चहोमानन्तरं प्रयासाय यासाय वियासाय संयासायोद्यासाय शुचे शोकाय तप्यते तपत्यै ब्रह्महत्यायै सर्वस्मै इति स्वाहान्तैराहुतयोऽप्यधिका उक्ताः । गृह्यकारिकायाम्—

यदा गर्भवती नारी सशल्या संस्थिता भवेत् ।
कुक्षिं भित्त्वा ततः शल्यं निर्हरेद्यदि जीवति ॥
प्रमीतं निखनेत्तं तु प्रायश्चित्तमतः परम् ।

सा त्रयस्त्रिंशता कृच्छ्रैः शुध्यते शल्यदोषतः ॥
सगर्भदहने तस्या वर्णजं वधपातकम् ।
प्रायश्चित्तं चरित्वा तु शुद्ध्यन्ति पापकारिणः ॥
दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत् ॥
अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव च ।
सर्वपापक्षयकरं निरयोत्तारणाय च ॥
अनेकस्वर्गफलदं मुक्तिदं च तथैव च ।
जन्मान्तरे च सौभाग्यधनपुत्रादिवृद्धिदम् ॥
देशकालौ स्मृत्वाऽरुन्धतीसमाचारत्व-*स्वर्गलोकमहीयमानत्व-मनुष्यलोमसमसंख्याब्दावच्छिन्नस्वर्गवास-भर्तृसहितचतुर्दशेन्द्रावच्छिन्नकालिकक्रीडमानत्व-मातृपितृश्वशुरकुलत्रयपूतत्व-ब्रह्मघ्नमित्रघ्नकृतघ्नपतिपूतत्व-पत्यवियोग-कामा भर्तृ*ज्वलच्चितारोहणं करिष्ये । अनुगमने तु-फलमुल्लिख्यान्वारोहणं करिष्ये इत्युक्त्वा *हरिद्राकुङ्कुमाञ्जनादियुतशूर्पाणि सुवासिनीभ्यो दद्यात । मन्त्रस्तु—

लक्ष्मीनारायणो देवो बलसत्त्वगुणाश्रयः ।

---

*स्वर्गलोकेति । भर्त्रा स्वरोमसमिताब्दानां सहस्रं स्वर्गमाचरेत् । *ज्वलच्चितारोहणं स्वर्गमनम् । *हरिद्रेति ।

देवैः सम्पादितो मह्यं पतिस्त्वं सार्वदैवतः ।
त्वया सह गमिष्यामि भर्ता त्वं चान्यजन्मनि ॥

इत्युक्त्वा स्नात्वा कुङ्कुमादिना स्वात्मानमलङ्कृत्य पुत्रादिभ्यो बन्धुभ्यश्चाशिषो दत्त्वा—

चितिस्थो भगवानग्निर्विष्णुरूपी जनार्दनः ।
पतिलोकसमावाप्त्यै गृहाणार्घ्यं नमोऽस्तु ते ॥

इति विष्णुरूपिणेऽग्नयेऽर्घ्यं दत्त्वा—

गाढं सत्त्वं च मे देया(१)द्वायनैः परितोषितः ॥
सोपस्कराणि शूर्पाणि (१)वायनैः संयुतानि च ।
लक्ष्मीनारायणप्रीत्यै सत्त्वकामा ददाम्यहम् ॥
अग्नेः समीपमागत्य *पञ्चरत्नानि पल्लवैः ।
नीलाञ्जनं तथा बध्वा मुखे मुक्ताफलं न्यसेत् ॥
ततोऽग्निप्रार्थनं कृत्वा मन्त्रेणानेन मिश्रितम् ।
स्वाहासंश्लेषनि(२)र्विण्ण सर्वगोत्र हुताशन ॥
सत्त्वमार्गप्रदानेन नय मां भर्तुरन्तिकम् ॥
ततोऽग्नावाज्येनाऽग्नये तेजोऽधिपतये, विष्णवे सत्त्वाधिपतये, कालाय ध(३)र्माधिपतये, पृथिव्यै लोका-

---

एष चार्घ्यो मया दत्तः सूर्य साक्षिंस्त्वदग्रतः ।
प्रसादं कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥

इति सूर्याय तं दत्त्वा—

त्वं ब्रह्मा त्वं च वै रुद्रस्त्वं रविस्त्वं प्रजापतिः ।
त्वमिन्द्रो वसवस्त्वष्टौ परमात्मा त्वमेव हि ॥
त्वमेव शरणं विष्णो शरणं त्वं पतिर्मम ।
स्वर्गे वा नरके वाऽपि यत्र यत्र गमिष्यसि ॥
तत्र तत्र त्वहं पृष्ठे गमिष्यामि तवाशु वै ।
ब्रह्महत्यादिभिः पापैर्मोक्ष्यामि च यमालयात् ॥
अहं ब्रह्मा ह्यहं विष्णुरहं सूर्यश्च दिक्पतिः ।
आदित्यचन्द्रावानिलोऽनलश्च द्यौर्भूमिरापो(?)प्यहर्निशा च ।
एते च सर्वे मम साहसेन तुष्यन्तु ते देववराश्च सर्वे ॥

इति पठित्वा पञ्च शूर्पाणि हारिद्राकुङ्कुमाञ्जनकञ्चुक्यादियुतानि दद्यादित्यर्थः । *पञ्चेति । स्ववस्त्रपल्लवे पञ्चरत्ननीलाञ्जनबन्धः ।

---

(१) 'वाणकैः' ग० । (२) निर्वाण सर्वगात्र, क० ।
(३) 'सर्वाधिष्ठात्रे' क० ।

धिष्ठात्र्यै, अद्भ्यो रसाधिष्ठात्रीभ्यः, वायवे बलाधिपतये, आकाशाय सर्वाधिपतये, कालाय धर्माधिष्ठात्रे, अभ्यः सर्वसाक्षिणीभ्यः, ब्रह्मणे वेदाधिपतये, रुद्राय श्मशानाधिपतये च हुत्वाऽग्निं प्रदक्षिणीकृत्य दृषदमुपलां च संपूज्य पुष्पाञ्जलिं गृहीत्वाऽग्निं प्रार्थयेत्—

त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेव देव जानीषे न विदुर्यानि मानुषाः ॥
अनुगच्छामि भर्तारं वैधव्यभयपीडिता ।
सत्त्वमार्गप्रदानेन नय मां भर्तुरान्तिकम् ॥
मन्त्रमुच्चार्य शनकैः प्रविशेच्च हुताशनम् ॥

गौडास्तु—'इमा नारीरविधवाः' इति,

ॐ इमाः पतिव्रताः पुण्याः स्त्रियोऽपापाः सुशोभनाः
सह भर्तुः शरीरेण संविशन्तु विभावसुम् ॥

इति च विप्रः पठेदित्याहुः । कातरां तु—प्रेतोत्तरे सुसां देवरः शिष्यो वा उदीर्ष्वेति द्वाभ्यामुत्थापयेत् । एतन्माहिमा मिताक्षरादौ ज्ञेयः ।

पृथ्वीचन्द्रोदये स्कान्दे—

*अनुव्रजन्ती भर्तारं गृहात्पितृवनं मुदा ।
पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यनुत्तमम् ॥

यत्त्वङ्गिराः—

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ।
सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥ इति,

शीलापूजोत्तरं तदारोहणं कार्यम् । *अनुव्रजन्ती भर्तारमिति।

मृते भर्त्तरि या नारी धर्मशीला दृढव्रता ।
अनुगच्छति या नारी शृणु तस्यास्तु यत्फलम् ॥
तिस्रः कोट्योऽर्धकोटी च यावन्त्यङ्गरुहाणि वै ।

यच्च व्याघ्रपात्—

न म्रियेत समं भर्त्रा ब्राह्मणी (१)शोककर्शिता ।
न ब्रह्मगतिमाप्नोति मरणादात्मघातिनी ॥ इति,

तत् पृथक्चितिपरम् ,

पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृतः ॥

इत्युशनसोक्तेः ।

पृथक्चितिस्तु क्षत्रियादिपरा । तद्विधिर्ब्राह्मे—

देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत् ॥

इमा नारीरविधवा इति ऋग्वेदवादः । त्र्यहाशौचमन्वारोहणपरामिति स्मार्ताः । *निषेधवाक्यानि प्रायश्चित्तार्थं मृतेन पतितेन वा सह मरणनिषेधपराणीत्य-

---

तावन्त्यब्दसहस्राणि स्वर्गलोके महीयते ॥
मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ।
कुलत्रयं पुनात्येषा भर्त्तारं याऽनुगच्छति ॥

व्यासः—

यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः ।
संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः ॥
तिष्ठते विवशो दीनश्चेष्टमानः स्वकर्मभिः ।
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥
तद्वदुद्धृत्य सा नारी तेनैव सह मोदते ॥

*निषेधेति । यस्तु प्रायश्चित्तार्थं मृत एव शुद्धस्तेन सह

---

(१) 'शोकपीडिता' क० ।

प्याहुः । अस्थिदाहे पलाशदाहे वा न *पृथक्चितिदोषः । अङ्गत्वेन स्थानापत्त्या वा शरीरतुल्यत्वात् । यत्तु—

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः ।
पुनात्यविधवा नारी तमादाय मृता तु या ॥

इति हारीतीयम्, तत्*पतितदाहादिनिषेधेन सहगमनस्य दूरतोऽपास्तत्वादर्थवादमात्रमिति पृथ्वीचन्द्रः । जन्मान्तरीयपापवता सह मरणे नोद्धार इति स्मार्तगौडाः । शुद्धितत्त्वे व्यासः—

दिनैकगम्यदेशस्था साध्वी चेत्कृतनिश्चया ।
न दहेत्स्वामिनं तस्या यावदागमनं भवेत् ॥

तत्रैव भविष्ये—

तृतीयेऽह्नि उदक्यायां मृते भर्तरि वै द्विजाः ! ।
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम् ॥
एकां चितिं समासाद्य भर्तारं याऽनुगच्छति ।
तद्भर्तुर्यः क्रियाकर्ता स तस्याश्च क्रियां चरेत् ॥

*एतदशाहान्तम्,

यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात्स एव हि ।

इति वायवीयोक्तेः । आपस्तम्बः—

चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत् ।

कथं निषेधः स्यादित्यस्वरसः । *पृथगिति । यूपादिशब्दवाचितिशब्दस्य दृष्टादृष्टवाचित्वादन्यदेशे काष्ठवद्दाहे संस्काराभावान्न चितिभेदः, समन्त्रदाहे तु विप्राया दोषो न क्षत्रियादेः । *पतितेति । प्रायश्चित्ताधिकारी प्रायश्चित्तमकृत्वा मृतस्तस्य प्रायश्चित्तं दत्त्वौर्ध्वदेहिके सहगमनस्तावकमिदमिति तु वस्तुगतिः । *एतद् दशाहान्तमिति । एकादशाहादिभिन्नमित्याभिप्रायः । परे तु यदि मृतस्य भिन्नमातृका अनेके पुत्रास्तदा पितुः सर्वज्येष्ठ एवौर्ध्वदे-

प्राजापत्येन शुध्येत तस्माद्वै पापकर्मणः ॥

तथा—

अन्वारोहे तु नारीणां पत्युश्चैकोद्दिक्क्रियाम् ।
पिण्डदानक्रियां तद्वच्छ्राद्धं प्रत्याब्दिकं तथा ॥
अन्वारोहे कृते पत्न्या पृथक्पिण्डांस्तिलाञ्जलीन् ।
पृथक्शिले न कुर्वीत दद्यादेकशिले तथा ॥

*अन्यत्प्रागुक्तम् ।

इदं गर्भिणीबालापत्यासूतिकारजस्वलाव्यभिचारिणीभिर्न कार्यम् ,

स्वैरिणीनां गर्भिणीनां पतितानां च योषिताम् ।
नास्ति पत्याऽग्निसंवेशः पतितौ हि तथा उभौ ॥

इति मदनरत्ने स्मृतिसंग्रहोक्तेः । मदनरत्ने बृहस्पतिः—

बालसंवर्धनं मुक्त्वा बालापत्या न गच्छति ।
व्रतोपवासनियता रक्षेद्गर्भं च गर्भिणी ॥

तृतीयपादे 'रजस्वला सूतिका च' इति पृथ्वीच-

हिकं कुर्यात् । अन्वारूढायास्तु कनीयानपि साक्षात्पुत्र एव सर्वं कुर्यात्; नतु सपत्नीपुत्रो ज्येष्ठ एव, तत्र तन्निरूपितपुत्रत्वाभावात् । दाहस्तु एकस्यामेव चितौ । सपिण्डीकरणं तु ज्येष्ठेन पितुरेव पितामहादिभिः, कनिष्ठेन तु पत्या मातुः पितृसपिण्डनादिने दिनान्तरे वा कार्यमिति प्राहुः । अत्रैकादिने दिनान्तरे वा सपिण्डनं पितृसपिण्डनोत्तरमेव सम्भवति, पितृभावापन्नेन संयोजने प्रेतसंयोजनायोगादित्यप्याहुः । तत्रापि मातुः पितुश्चैकोद्दिष्टद्वयमेव । मातुरेकोद्दिष्टं पितुः पार्वणमित्यन्ये । *अन्यदिति ।

नवश्राद्धानि सर्वाणि सापिण्डीकरणं पृथक् ।
एक एव वृष्टोत्सर्गो गौरेका तत्र दीयते ॥ इति ।

अवयवपिण्डार्थः पाकस्तन्त्रेण, पिण्डः पृथगित्यादि ।

न्द्रोदये गौडीयशुद्धितत्त्वे च पाठः । तत्रैव बृहन्नारदीयेऽपि—

बालापत्या च गर्भिण्यो ह्यदृष्टऋतवस्तथा ।
रजस्वलाराजसुते नारोहन्ति चितां तु ताः ॥ इति ।

अत्र—

पतिव्रता सुसंदीप्तं प्रविशेद्या हुताशनम् ।

इति भारतात्, 'ऋग्वेदवादात्साध्वी स्त्री' इति ब्राह्माच्च पतिव्रतानामेवाधिकारो न दुर्वृत्तानाम् । यत्तु—

अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा ।
वर्तन्ते याश्च सततं भर्तॄणां प्रतिकूलतः ॥
तत्रानुमरणं काले याः कुर्वन्ति तथाविधाः ।
कामात्क्रोधाद्भयान्मोहात्सर्वाः पूता भवन्त्युत ॥

इति भारतम्, तत् कैमुतिकन्यायेन स्तावकमिति-पृथ्वीचन्द्रः । ब्राह्मण्या एकाचितिरेव न पृथक्चितिः । क्षत्रियादीनां पृथगेका वेति कल्पतरुरत्नाकरमदनपारिजातादयः । शुद्धिचिन्तामणौ चैवम् । तत्रान्वारोहणे भर्त्रशौचमध्ये तदूर्ध्वं वा कृते त्रिरात्रमध्ये एव दशापिण्डाः । सहगमने तु भर्तृशौचतुल्यमाशौचं पिण्डदानं च,

अन्विताया प्रदातव्या दश पिण्डास्त्र्यहेण तु ।
स्वाम्याशौचे व्यतीते तु तस्याः श्राद्धं प्रदीयते ॥

इति शुद्धितत्त्वे शूलपाणौ च पैठीनासिस्मृतेः ।

संस्थितं पतिमालिङ्ग्य प्रविशेद्या हुताशनम् ॥
तस्याः पिण्डादिकं देयं क्रमशः पतिपिण्डवत् ।

इति (१)शूलपाणिशुद्धितत्त्वधृतव्यासोक्तेः । अन्यत्प्रागुक्तम् । यदा तु रजस्वलाऽपि पत्नी मृते पत्यौ देश-

(१) 'जिकनशूल' छ० क०

कालवशात्तदैवानुगच्छति न शुद्धिं प्रतीक्षते तत्र देवयाज्ञिकनिबन्धे—

यदा स्त्रियामुदक्यायां पतिः प्राणान्समुत्सृजेत् ।
द्रोणमेकं तण्डुलानामवहन्याद्विशुद्धये ॥
मुसलाघातैस्तदसृक् स्रवते योनिमण्डलात् ।
विरजस्कां मन्यमाना स्वे चित्ते तदसृक्क्षयम् ॥
दृष्ट्वा शौचं प्रकुर्वीत पञ्चमृत्तिकया पृथक् ।
त्रिंशद्दिंशतिर्देश च गवां दत्त्वा स्वहःक्रमात् ॥
विप्राणां वचनाच्छुद्धा समारोहेद्धुताशनम् ।
नारीणां सरजस्कानामियं शुद्धिरुदाहृता ॥

अत्र श्राद्धादौ निर्णयः पूर्वमुक्तः ।

इति श्रीभट्टकमलाकरकृते निर्णयसिन्धावन्त्यकर्मनिर्णयः ।

अग्निप्रवेशाशक्तौ तु विष्णुः—'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा' इति । ब्रह्मवैवर्ते—

सहानुगमनं शस्तं वैधव्यस्याथ पालनम् ।

यत्तु तत्रैव—

कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते । इति,

तद्ब्रह्मचर्याशक्यत्वपरम् । तथा च मनुः—

ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशनम् ।

काशीखण्डेऽपि—

पत्यौ मृतेऽपि या योषिद्वैधव्यं पालयेत्क्वचित् ।
सा पुनः प्राप्य भर्तारं स्वर्गलोकं समश्नुते ॥
अनुयाति न भर्तारं यदि दैवात्कथंचन ।

तत्रापि शीलं संरक्षेच्छीलभङ्गात्पतत्यधः ॥
तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा ।
तस्याः पिता च माता च भ्रातृवर्गस्तथैव च ॥

अथ विधवाधर्माः । मदनरत्ने स्कान्दे—

विधवाकबरीबन्धो भर्तृबन्धाय जायते ।
शिरसो वपनं तस्मात्कार्यं विधवया सदा ॥
एकाहारः सदा कार्यो न द्वितीयः कदाचन ।
मासोपवासं वा कुर्याच्चान्द्रायणमथापि वा ॥
पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम् ।
नैवाङ्गोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्यं भर्तुस्तिलकुशोदकैः ॥
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम् ।

इदमपुत्रापरमिति मदनपारिजातः ।

नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि ॥
कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत् ।
वैशाखे कार्तिके माघे विशेषनियमं चरेत् ॥

प्रचेताः—

ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

श्राद्धादौ तु विशेषः प्रागुक्तः । यत्तु बौधायनः—

संवत्सरं प्रेतपत्नी मधु मांसं विवर्जयेत् ।
अधःशयीत षण्मासानिति मौद्गल्यभाषितम् ॥ इति,
तदसवर्णापरमित्यपरार्कः ।

अथ संन्यासः । याज्ञवल्क्यः—

वनाद्वा *गृहाद्वा कृत्वेष्टिं *सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥

एतदाश्रमसमुच्चयपक्षे । *जाबालश्रुतौ त्वन्येऽपि पक्षा उक्ताः—'यदि चे*तरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा । *अथ पुनर*व्रती वा व्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा *यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति । अङ्गिराः—

प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेद्वा गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखितः ॥

संसारमेव निःसारं दृष्ट्वा पारदिदृक्षया ।
प्रव्रजत्यकृतोद्वाहः परं वैराग्यमाश्रितः ॥

इत्यङ्गिरसोक्तेः । *गृहादिति । आश्रमपक्षः । *सार्ववेदसं सर्वस्वम् । आश्रमचतुष्टयसमुच्चयश्च—

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥

इति मनुनोक्तः । यदा तु प्राग्भवीयसुकृतपरिपाकादिवशाद्बाल्य एव वैराग्योत्पत्तिस्तदाऽऽह—*जाबालश्रुतौ त्विति । *इतरथा वैराग्ये । *अथेति । तथाच संन्यासो ब्रह्मचार्यादिभिरेव ग्राह्य इति न नियमः । किन्तु स्नातकविधुरादिभिरपीत्यर्थः । *अव्रतीति । उपनयनस्यापि नापेक्षा शुकनामदेवादिवत् सुकृतपाकातिशयसत्त्वे । *यदहरेवेति । अविरक्तस्य तु—

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥

आतुरो मुमूर्षुः । दुःखित*आर*व्याघ्रादिभीतः । भारते—

आतुराणां तु संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् ॥

जाबालश्रुतावपि—*यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्' इति । अत्र विप्रस्यैवाधिकारः 'ब्राह्मणाः प्रव्रजन्ति' इति जाबालश्रुतेः;

आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।

इति मनूक्तेश्चेति विज्ञानेश्वरादयः । वृद्धयाज्ञवल्क्योऽपि—

अनधीत्य गुरोर्वेदाननुत्पाद्य तथाऽऽत्मजान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

इति मनूक्तनिषेधाभिप्रायक एवकारः । *चौरेति ।

उत्पन्ने सङ्कटे घोरे तथा व्याघ्रादिसङ्कटे ।
भयभीतस्य संन्यासमङ्गिरा मुनिरब्रवीत् ।

इति महाभारतात् । *व्याघ्रादीति । आदिना नद्यादिग्रहः । *यद्यातुरः स्यादिति । नन्वत्र किं विधीयते ? न तावत्संन्यासः, तस्य यदहरेवेति प्रागेव विधानात् । नापि तदनुवादेन वाङ्मनसी । नहि तद्विधिर्नियमरूपः, प्रैषादिविधिपर्यालोचनया वाङ्मनसोर्नित्यं प्राप्तेरप्राप्तांशपूरणफलकस्य तस्यायोगात् । नापि परिसंख्या, त्रैदोष्यात् । नच संन्यासमनूद्यातुरः कर्ता विधीयताम्, तथा सति कर्तृस्वरूपमात्रस्य क्रियाऽविनाभावबललब्धतयाऽऽतुरत्वे विधिपर्यवसानापत्तेः । नचैवमेवास्तु, क्रियागुणभूतकर्तृविशेषणं हि तदङ्गं स्यात् । तच्च यद्युपादेयं, संन्यासदशायां नियमेनानुष्ठीयेत, वाग्यतस्तिस्रो दोहयित्वेति दोहदशायां वाग्यमवत् । अनुपादेयत्वे तु राजत्ववदधिकारिसङ्कोचकं स्यात् । उभयथापि

अनातुरस्य संन्यासाननुष्ठानापत्तिरिति चेत् ? न, यतः ज्ञानार्थतया काम्ये संन्यासकर्मणि सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारादतथाभूतस्यातुरस्याधिकारापाप्तौ तत्प्राप्तिफलकोऽयमपूर्वविधिरेव "यदि ब्राह्मणो यजेत" इत्यादिवत् । परं चास्य कर्तृपक्षाविशेषः, आतुरार्थतया संन्यासस्यैव विधेयत्वात् । तादर्थ्यं च तस्य तदपेक्षितफलजनकत्वेनैव सम्भवतीति । किं तत्फलमित्यपेक्षायां यदेवाप्रागवगतं वाक्यशेषात्तदेवात्रापि सम्बध्यते । यथा "यदि ब्राह्मणो यजेत" इत्यादिब्राह्मणादीन् प्रति नित्यापाप्तोऽवेष्टिप्रयोगविधायकवाक्ये फलापेक्षायाम् "एतयाऽऽग्नेयकामं याजयेत्" इत्येतत् । इयांस्तु विशेषः—तत्र राजसूयान्तर्गतत्वेनावेष्टेरितरसापेक्षतयैव साधनत्वावगमाद्राजसूयसाध्यत्वेनावगतस्य स्वाराज्यस्यावेष्टिफलत्वेनानुपस्थानाद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन वा फलस्यावेष्टिसाध्यत्वेन प्राप्तौ 'एतयाग्नेयकामम्' इत्येतस्य प्रवृत्तेरपेक्षितविधानात्सार्थक्यम् , अत्र तु प्रागेव संन्यासस्य निरपेक्षसाधनतावगमात्सन्न्यासस्साध्यत्वेनावगतस्याप्रत्यूहमुपस्थितस्यापरित्यागान्न फलोपस्थापकवाक्यापेक्षेति । यावज्जीवादिवाक्येषु तूपस्थितोऽपि स्वर्गस्त्यज्यते, निमित्तवशेन प्रयोगस्यावश्यकत्वसिद्धौ निष्कामं प्रति प्रयोगनिर्वाहाय पापक्षयार्थत्वस्यैव कल्प्यत्वात् । ननु "यदि रथन्तरसामा सोमः स्यात्" इत्यादाविवात्रापि यदिशब्दवशादातुरत्वं निमित्तं स्यादिति चेत् ? पीडावत्त्वं ह्यातुरत्वम् । तच्च संसृतस्य शरीरत्यागिनस्मतो न निमित्तम् । अत एव "यस्य पुरोडाशौ क्षायतः" इत्यत्र पुरोडाशक्षामस्य पुनः प्रयोगनिमित्तत्वे एकदेशक्षामस्य स्थायिनिमित्तत्वं ज्ञापयन्न एकदेशक्षामस्यावर्जनीयत्वेन नित्यतया निमित्तत्वायोगाद् 'इयानवर्जनीयो दाहो नाधिकः' इत्यपरिज्ञानाच्चावर्जनीयदाहातिरिक्तस्यैकदेशेऽपि वर्त्तमानस्य दाहस्य निमित्तत्वासम्भवात्सर्वक्षाममेव निमित्तमिति स्थापितं "क्षामे तु सर्वदाहे स्यात्" (जै०सू०६-४-५-१७) इत्यधिकरणे । अधिकारपक्षे तु

सर्वाङ्गोपसंहारासमर्थमात्रोपलक्षणतयाऽऽतुरशब्दार्थे नानुपपत्तिः। तथाचातुरस्य यथासम्भवमङ्गोपसंहारौ प्रत्युक्तौ। अनुवादोऽयं "मनसा वाचा वा" इति। यथाकथञ्चित् प्रधानमात्रेणापि आतुरस्य फलसिद्धिरिति वाक्यतात्पर्यम्, "आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी" इति न्यायेन विधिनैवातुरत्वतारतम्यानुरोधेनाङ्गोपसंहारतारतम्याभ्यनुज्ञानात्। नच काम्ये यथाशक्त्यङ्गोपसंहारोपगमे तिर्यगधिकरणविरोधः, आतुरसंन्यासविधिबलेनेह तदुपगमात्। एक एव संन्यासः स्वस्थातुररूपकर्तृभेदेन अङ्गान्यपेक्षते नापेक्षते इति विरुद्धमिति चेत्? सन्ध्यावन्दनादौ नित्ये तथादर्शनात्। यत्त्वातुरसन्न्यासो भिन्न एव इडो यजतीत्यादाविवाभ्यासेन कर्मभेदादिति। तन्न, अनन्यपरपुनःश्रवणरूपो ह्यभ्यासः कर्मभेदकः। नचेह सोऽस्ति, पुनःश्रवणस्यातुराधिकारसिद्धिप्रयोज्यकत्वेनान्यपरत्वात्। विधेर्हि प्रयोजनमात्रं वाच्यम्। नच पुनर्विधाने विधित्रैविध्यभङ्गः, इतरनिवृत्तिप्रयोजकत्वस्यैवापूर्वविधित्वेन तत्र प्रवेशात्। तत्त्वं च साक्षात्परंपरया वेत्यन्यदेतत्। यद्वा विधिस्त्रिधेति प्रायोवादः। "षडस्माकमनादयः" "समासश्चतुर्धा" "अनुपस्थितस्याप्रकारत्वम्" इति तत्तद्दर्शनस्थोद्घोषवत्। अस्ति हि मूलावरणादेरप्यनादिता। अस्ति च "सुप् सुपा" इति समासः। अस्ति चानुपस्थितामावत्वादेः प्रकारतेति। ननु तथापि यदिशब्दः कथं योज्य इति चेदत्र भट्टपादाः--यदिशब्दपरित्याग उताध्याहारकल्पना। व्यवधानेन सम्बन्धो हेतुहेतुमतोश्च लिङ्गिति। अस्यार्थः--"यदि ब्राह्मणः" इत्यत्रैव हुंफडादौ निपातानामनर्थकत्वदर्शनाद्यदिशब्दस्य तथात्वकल्पनया इह परित्यागः, अथवा यदि रोचेतेत्यध्याहारः, अथवा व्यत्ययेन सम्बन्धः यदि सन्यस्येत्तर्ह्यातुर इति "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्" इत्यादौ यदि गृह्णीयात्तर्हि रथन्तरसामा सोमः स्यादिति रथन्तराधिकरणपूर्वपक्षवत्। वस्तुतस्त्विह न व्यत्ययः कार्यः यद्यातुररूपेप्सितं फलं भावयेत्तर्हि

सन्न्यासेनेति तं विनैवोपपत्तेः । फलांशस्यातुरशब्देन समर्पणात्तत्र विधेरनुष्ठापकत्वात् । उक्तं हि सौभराधिकरणपूर्वपक्षे—पुरुषशेषता च तदभिलषितफलसाधनतयेति । अथवा सोमः स्यादिति हेतौ लिङ्, गृह्णीयादिति विधौ रथन्तरसामसोमहेतुकान् ऐन्द्रवायवाग्रान् गृह्णीयादिति अक्रियमाणस्य हेतुत्वासम्भवादर्थात्सोमविधिः । यद्वा गृह्णीयादिति हेतुमति । सोमः स्यादिति विधौ । हेतुपदादि.....
.....सोमस्यैव च ग्रहाग्रतारूपफलजनकः सोमया.....
संन्यासस्य श्रवणांगत्वादातुरस्य प्रधानभूतश्रवणाभावादनुष्ठानं व्यर्थमिति चेत्? न, अङ्गत्वासिद्धेः । तथाहि "एतमेव लोकमिच्छन्तः प्रव्राजिताः प्रव्रजन्ति" इतिश्रुतिर्विधिर्नार्थवादः । "एतद् ब्रह्म" इत्यर्थवादसम्बद्धत्वात् । अर्थवादस्यार्थवादान्तरापेक्षानुपगमात् । तस्मादनया संन्यासो विधीयते । स च फलमाकाङ्क्षमाणः एकवाक्योपात्तकामनार्थकधातुपदसमभिव्याहृतकर्मप्रत्ययान्तलोकशब्देनैतच्छब्दसमानाधिकरणेनोपस्थापितं प्रकृतं ज्ञानाविशिष्टमात्मानं फलत्वेन गृह्णाति । तत्र विशेष्यस्य कूटस्थनित्यस्य स्वरूपेण भाव्यत्वायोगादानर्थक्यंतदङ्गावतरणन्यायेन सविशेषणे हीति न्यायेन वा ज्ञानमेव भाव्यं गृहीत्वा पर्यवस्यति । न च प्रकरणप्रायपाठाभ्यां सन्न्यासस्य श्रवणाङ्गत्वाद्गुणार्थवादोऽयं "वर्म वा यज्ञस्य" इत्यादिवदिति वाच्यं, प्रकरणापेक्षया वाक्यस्य प्राबल्यात्। प्रयाजादौ अन्यतराकाङ्क्षयाऽऽर्थवादिकं फलं कल्प्यमिति तदपेक्षया दर्शपूर्णमासाङ्गताग्राहकस्य प्रकरणस्य प्राबल्यमिति वैषम्यात् । न च संन्यासस्य ज्ञानफलकत्वे तुल्यार्थत्वाच्छ्रवणेन सह विकल्पापत्तिरिति वाच्यं, द्वारभेदात् । अद्वितीये ब्रह्मणि वेदान्तानां तात्पर्यावधारणानुकूलव्यापाररूपमुपक्रमोपसन्धानं श्रवणम्। तच्च प्रमाणताऽसम्भावनानिवृत्तिद्वारोपयुज्यते। संन्यासस्तु प्रतिबन्धककल्मषनिवृत्तिद्वारा,

ये च संतानजा दोषा ये च स्युः कर्मसम्भवाः ।

चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः ।
क्षत्रियस्य त्रयः प्रोक्ता*स्त्रावेको वैश्यशूद्रयोः॥इति ।

संन्यासस्तान् दहेत्सर्वांस्तुषाग्निरिव काञ्चनम् ॥

इतिमाधवोक्तस्मरणात् ;

मृत्तोयैः शोध्यते शोध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥

इतिमनूक्तेश्च। एवञ्च संन्यासस्य ज्ञानाङ्गत्वे स्थिते श्रवणाङ्गत्वायोगाद् "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यादिवद् "वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्" इत्यादिवाक्यानि क्रममात्रविधायकानि । अतएव "अन्तरा चापि तु तद्दृष्टेः" (ब्र०सू०३-४-९-३६) इत्यधिकरणे विधुरस्यापि श्रवणाधिकारः समर्थितः, जन्मान्तरीयेणापि क्रमनिर्वाहात् । यदि च माधवोक्तरीत्याऽग्निहोत्राद्यभावात्सत्कर्मजन्यान्तःकरणशुद्ध्यभावेन साधनासम्भवाद्विधुराणां न सन्न्यासाङ्गविशिष्टश्रवणेऽधिकार इति पूर्वपक्षः । जप्यादिना चित्तशुद्धिसम्भवात्साङ्ग एवाधिकार इति सिद्धान्त इत्युच्यते । तदापि गार्गीप्रभृतिष्वगतिरेव "पुराकल्पेतु" इत्यादिना तासां वेदाध्ययनाधिकारावगमात् । अत एव गार्गीप्रभृतीनां विद्याधिकारोऽपि तत्रैव भाष्यकारैः समर्थितः । अत एव वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैरिति संक्षेपशारीरकं न केवलमैहिकमेव पारिव्राजकं किन्तु जन्मान्तरीयमपि .... त्वाद् श्रवणं न विरुद्ध्यते । जन्मान्तरीयसंन्यासकल्पनात् । नत्वेतज्जन्मन्येव संन्यासोत्तरं गार्हस्थ्यम् ,

त्रयाणामानुलोम्यं स्यात् प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः ॥

इति दक्षेण निषेधात् उत्तरमीमांसायां तृतीयाध्याये "तद्भूतस्य तु नातद्भावः" इत्याद्यधिकरणेऽवरोहाभावस्य निर्णीतत्वा-

*माधवस्तु—

ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ।

इति कौर्माद्युक्तैर्वर्णत्रयस्याप्यधिकारः । पूर्ववाक्यं तु काषायदण्डादिनिषेधार्थम् ,

मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।

राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः ॥

इति बौधायनोक्तैरिति पक्षान्तरमाह । तत्त्वं तु कुटीचकादिपरमेव तदिति । योऽपि 'संन्यासं पलपैतृकम्' इति कलौ निषेधः, सोपि त्रिदण्डादिपर इत्युक्तं प्राक् ।

च्च । *द्वाविति । द्वौ वैश्यस्य एकः शूद्रस्येत्यन्वयः । यत्तु—

चत्वार आश्रमाः प्रोक्तास्तेषु शूद्रस्तु नार्हति । इति,

तत्समन्त्रकविवाहनिषेधार्थम् । *माधवस्त्विति । अत्रायमस्वरसः—यद्यपि सुरेश्वरवार्तिके एव—

त्रयाणामविशेषेण संन्यासः श्रूयते श्रुतौ ।

पदोपलक्षणार्थं स्याद्ब्राह्मणग्रहणं तदा ॥ इति ।

प्रत्ययार्थात्म्यविज्ञानस्वभावश्चेत्समर्थ्यते ।

उत्थानं यस्य यस्य स्यात्स स व्युत्थातुमर्हति ॥

इति द्विजानां संन्यास उक्तस्तथापि भाष्यकृद्भिर्ब्राह्मणस्यैव संन्यासे अधिकारोक्तेः स एव युक्तः। न च क्वचित्सामान्यशब्दश्रवणबलात्सर्वत्र ब्राह्मणशब्दस्य द्विजपरत्वं सांप्रतम् , "पुरोडाशं चतुर्धा करोति" "आग्नेयं चतुर्धा करोति" इत्यत्रैव सामान्यस्य विशेषे उपसंहारात्। नतु विपरीतम्, अभिधात्र्यश्रुत्तेः। द्विजशब्दस्य ब्राह्मणपरत्वे च न कोपि बाधः। किञ्च क्षत्रियादिसंन्यासनिषेधानां मुखजानामिति वचनमालम्ब्य काषायादिनिषेधपरत्वप्रयुक्तलक्षणापत्तेः। मुखजानामित्यनेनापि हि अंगनिषेधमुखेन क्षत्रि-

तद्वैराग्यं विना जीवनार्थसंन्यासपरम्,

एकदण्डं समाश्रित्य जीवन्ति बहवो नराः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥

इति स्मृतेः । यच्चाऽवमेधिके—

एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा ।
काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिर ॥ इति,

तस्यापि पूर्वोक्तव्यवस्था ज्ञेया ।

*अथ तद्विधिः । बौधायनः—

कृत्वा श्राद्धानि सर्वाणि पित्रादिभ्योऽष्टकं पृथक् ।
वापयित्वा च केशादीन् मार्जयेन्मातृका इमाः ॥

सर्वाणीति स्वस्य नवश्राद्धषोडशश्राद्धादि कृत्वेत्यर्थः । स्मृत्यर्थसारेऽपि—

एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि षोडश ।
अग्निमान्पार्वणेनैव विधिना निर्वपेत्स्वयम् ॥ इति ।

कात्यायनः—

कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् ॥

बौधायनः—

सदैवमार्षकं दिव्यं पित्र्यं मातृकमानुषे ।
भौतिकं चात्मनश्चान्ते अष्टौ श्राद्धानि निर्वपेत् ॥

अत्र क्रममाह हेमाद्रौ शौनकः—"देवश्राद्धे ब्रह्मविष्णुमहेश्वरा देवताः । आर्षे देवर्षिब्रह्मर्षिक्षत्रर्षयः, देव-

---

माधूकरमथैकान्नं परहंसः समाचरेत् ॥ इति ।

आद्यौ त्रिदण्डावन्त्यावेकदण्डौ । इष्टेः प्राक्कर्तव्यतया श्राद्धादि वक्तुं प्रतिजानीते—*अथेति । एतच्च विश्वेश्वर्यादि-

र्षिक्षत्रर्षिमनुष्यर्षयो वा"। मरीच्यादिऋषय इति संन्यासपद्धतौ। तच्चिन्त्यम्। दिव्ये वसुरुद्रादित्याः। मानुषे सनकसनन्दनसनातनाः। भूतश्राद्धे पृथिव्यादिभूतानि चक्षुरादिकरणानि चतुर्विधो भूतग्रामश्चेति तिम्रः। पित्र्ये पित्रादित्रयो मातामहाश्च। मातृके मात्रादयस्तिस्रः। आत्मश्राद्धे आत्मपितृपितामहा देवताः। आत्मश्राद्धं परमात्मदैवत्यमिति संन्यासपद्धतौ। तच्चिन्त्यम्। सर्वत्र च नान्दीमुखत्वं विशेषणं ज्ञेयम्। सर्वत्र पिण्डदानम्। युग्मा विप्राः। दक्षक्रतू सत्यवसू वा विश्वेदेवौ। अन्यन्नान्दीश्राद्धवदिति हेमाद्रिः। स्मृत्यर्थसारे—

केशश्मश्रुलोमनखं वापयित्वोपकल्पयेत्।
दण्डं जलं पवित्रं च शिक्यं पात्रं कमण्डलुम्॥

आसनं कौपीनमाच्छादनं कन्थां पादुके इति दश पञ्च वा। एतच्च पूर्वेद्युर्नान्दीमुखं कृत्वा परेद्युः पुण्याहवाचनं कृत्वा कार्यमिति शौनकः।

बौधायनः—

त्रीन्दण्डानङ्गुलीस्थूलान्वैणवान् मूर्धसंमितान्।
एकादश नव द्वित्रिचतुःसप्तान्यपर्वकान्॥
वेष्टितान्कृष्णगोवालरज्ज्वा तु चतुरङ्गुलान्।
एको वा तादृशो दण्डो गोवालसदृशो भवेत्॥
अनग्निरग्निमुत्पाद्य नित्येन विधिना ततः॥

पृष्टोदिविधानेनेत्यर्थः।

स्वाग्नावेवाग्निमान्कुर्यादपवर्गोक्तमादितः।
आज्यं पयो दधीत्येतत्त्रिवृद्धा जलमेव वा॥
ॐभूरित्यादिना प्राश्य रात्रिं चोपवसेत्ततः।
अथादित्यस्यास्तमयात्पूर्वमग्नीन्विहृत्य सः॥

आज्यमग्नौ गार्हपत्ये संस्कृत्यैतेन च स्रुचा ।
पूर्णयाहवनीये तु जुहुयात्प्रणवेन तत् ॥
ब्रह्मान्वाधानमेतत्स्यादाग्निहोत्रे हुते ततः ।
संस्तीर्य गार्हपत्यस्य दर्भानुत्तरतोऽत्र तु ॥
पात्राण्यासाद्य दर्भेषु ब्रह्मायतन एव तु ।
जागृयाद्रात्रिमेतां तु यावद्ब्राह्मो मुहूर्तकः ॥
आग्निहोत्रं स्वकाले तु हुत्वा प्रातस्तनं ततः ।
इष्टिं वैश्वानरीं कुर्यात्प्राजापत्यामथापि वा ॥

जाबालश्रुतौ-'तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति तदु तथा न कुर्यादाग्नेयीमेव कुर्यात्पश्चात् त्रैधातवीयामेव कुर्यात्" इत्युक्तम् । तेनात्र विकल्पः । अत्राहुः-त्रेताग्नेः प्राजापत्या, तद्वाक्यशेषेऽग्नीनिति बहुत्वश्रुतेः, एकाग्नेस्त्वाग्नेयी इति । अनाहिताग्नेरिष्टिस्थाने वैश्वानर आग्नेयो वा चरुरिति माधवः । कात्यायनः—

आत्मन्यग्नीन्समारोप्य वेदिमध्ये स्थितो हरिम् ।
ध्यात्वा हृदि त्वनुज्ञातो गुरुणा प्रैषमीरयेत् ॥

कपिलः—

विधिवत्प्रैषमुक्त्वाऽथ त्रिरुपांशु त्रिरुच्चकैः ।
अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यपो भुवि ॥
निनीय दण्डाशिक्यादि गृहीत्वाऽथ बहिर्व्रजेत् ॥

निबन्धेष्वतिविस्तृतमिति तत एव न्यूनातिरिक्तं निश्चेतव्यमित्युपरम्यते ॥

इति आर्डोपाह्वकृष्णभट्टविरचिता रत्नमाला ॥

श्रीरस्तु । शुभं भवतु ।

(अ(१)भयमिति मन्त्रेणापां पूर्णमञ्जलिं निनीयेत्यर्थः।)

बौधायनः—

सखे मेत्यादिना दण्डं येन देवाः पवित्रकम् ।
यदस्य पारे शिक्यं तु पात्रं व्याहृतिभिस्तथा ॥
युवासुवासाः कौपीनं गृहीत्वा बान्धवांस्त्यजेत् ।

अथ क्रमः । तत्र संन्यासेऽधिकारसिद्ध्यर्थं स्वस्य नवश्राद्धषोडशश्राद्धसपिण्डनानि साग्निः पार्वणान्यनग्निस्त्वेकोद्दिष्टविधिना कृत्वाऽनाश्रमी चेत्कृच्छ्रचतुष्टयम्, अन्यस्तु तप्तकृच्छ्रं कृत्वोदगयने एकादश्यां द्वादश्यां वा साग्निरमावास्यायां पौर्णमास्यां चतुर्दश्यां वा यथा पर्वणि प्राजापत्या स्यात् । तत्र देशकालौ स्मृत्वा परमहंसादिसंन्यासग्रहणं करिष्य इति संकल्प्य गणेशं संपूज्य पुण्याहं वाचयित्वा मातृकापूजां वृद्धिश्राद्धं च कृत्वाऽस्तमयात्प्रागौपासनं समिध्याहिताग्निस्तु गार्हपत्यं, विधुरोऽग्निहोत्री तु त्रिकाण्डमण्डनोक्तदिशा कुशपत्न्या सह पवमानेष्ट्यन्तं पूर्णाहुत्यन्तं वाधानं कुर्यात् । ब्रह्मचारी चेल्लौकिके विधुरश्चेद्व्याहृतिभिः प्रणवेन चाग्निमाधायान्वग्निरुषसामित्यानीग्नि पृष्ठोदिवीति निधाय तेनैव समिध्य "तत्सवितुः" "तां सवितुः" "विश्वानि देव" इति तिस्रः समिधोऽभ्यादध्यात् । एवमग्नौ सिद्धे कक्षोपस्थवर्ज्यं वपनं कृत्वा पयोदधियुतमाज्यमपो वा—"ॐभूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम्" इति प्राश्याचम्य पुनरादाय—"ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि" इति द्वितीयम्, ॐस्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात्" इति

(१) कंसान्तर्गतं नास्ति ग० पुस्तके ।

तृतीयम्, समस्तया चतुर्थम्-ॐभूर्भुवः स्वः सावित्रीं प्रविशामि तत्सवितु०यात् इति। संन्यासपद्धतौ तु त्रिवृदसीति प्रथमं, प्रवृदसीति द्वितीयं, विवृदसीति तृतीयं प्राश्यापः पुनन्त्विति जलं प्राश्य सावित्रीप्रवेश उक्तः। तत आहवनीयं विहृत्य ब्राह्मणमुपवेश्याज्यं संस्कृत्य चतुर्द्वादश वा गृहीत्वा समित्पूर्वमोंस्वाहा परमात्मन इदमिति हुत्वोपवसेत्। (इ(१)दं ब्रह्मान्वाधानम्।) ततः सायंहोमं वैश्वदेवं च कृत्वा अग्नेरुदक्कुशानास्तीर्य दण्डादीनि दश पञ्च वाऽऽसाद्य ब्रह्मासने कृष्णाजिनोपविष्टो रात्रौ जागरणं कृत्वा प्रातर्होमानन्तरं प्राजापत्यां वैश्वानरीं वा कृत्वा ऋत्विग्भ्यः सर्वस्वं ब्रह्मणे च मधुपूर्णं तैजसपात्रं दत्त्वा दारुपात्राण्याहवनीयेऽश्ममृन्मयानि च जले क्षिपेत्। कृष्णाजिनं त्वाददीत। अनाहिताग्निस्तु वैश्वानरमाग्नेयं वा चरुं हुत्वा पात्राण्यग्नौ क्षिप्त्वा भूर्भुवः स्वरित्यपः स्पृष्ट्वा "तरत्समन्दी" इति सू(२)क्तं जप्त्वा विप्रान्संभोज्य पुण्याहं वाचयित्वा अत्र वा वपनं कृत्वा हेमरूप्यकुशजलैः स्नात्वा पुरुषाय चरुं कृत्वा प्राणाय स्वाहेति पञ्चाज्याहुतीर्हुत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं चरुं च जुहुयात्।

अत्र विरजाहोमं केचिदाहुः। यथोक्तं शिवगीतासु—

जुहुयाद्विरजामन्त्रैः प्राणापानादिभिस्ततः।
अनुवाकान्तमेकाग्रः समिदाज्यचरून्पृथक्॥
आत्मन्यग्नीन्समारोप्य यातेअग्नेति मन्त्रतः।
भस्मादायाग्निरित्याद्यैर्विमृज्याङ्गानि संस्पृशेत्॥
पापैर्विमुच्यते सत्यं मुच्यते नात्र संशयः।

---

(१) कंसान्तर्गतं नास्ति ग० पुस्तके।

(२) 'सूक्तं' नास्ति ग० पुस्तके।

यथा—"प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्माभूयासꣳ स्वाहा।" सर्वत्र लिङ्गोक्तदेवताभ्य इदमिति त्यागः। वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसङ्कल्पा मे शुध्यन्तां ज्योति०। त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योति०। शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं०। उत्तिष्ठ पुरुष हरितपिङ्गललोहिताक्षि देहिदेहि ददापयिता मे शुध्यन्तां ज्योति०। पृथिव्यापस्तेजोवायुराकाशा मे शुध्यन्तां ज्योति०। शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योति०। मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योति०। अव्यक्तभावैरहंकारैर्ज्योति०। आत्मा मे शुध्यन्तां०। अन्तरात्मा मे शुध्यन्तां०। परमात्मा मे शुध्यन्तां०। क्षुधे स्वाहा। क्षुत्पिपासाय स्वाहा। विविध्यै स्वाहा। ऋग्विधानाय स्वाहा। कषोत्काय स्वाहा। क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयमात्मा मे शुध्यन्तां ज्योति०। ततः स्विष्टकृदादि हुत्वा ब्रह्मणे हिरण्यमाज्यपात्रं धेनुं च दत्त्वा "संमासिञ्चतु" इत्युपतिष्ठेत। अत्र केचिदनग्नेः सावित्रीप्रवेशं पूर्णाहुतिं चाहुः।

ततो—"यात अग्ने यज्ञिया तनूः" इति त्रिस्त्रिरेकैकं जिघ्रन्नात्मन्यग्नीन् समारोप्य गुरवे सर्वस्वं दत्त्वा—

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।

तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।'

इत्युपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्याधीहि भगवो ब्रह्मेति वदेत् । ततो गुरुरात्मानं ब्रह्मरूपं ध्यात्वा शङ्खं द्वादशप्रणवैराभिमन्त्र्य तेन शिष्यमभिषिच्य—"शन्नो मित्रः" इति शान्तिं पठित्वा तच्छिरसि हस्तं दत्त्वा पुरुषसूक्तं जप्त्वा—"मम व्रते हृदयं ते दधामि" इति च जप्त्वोदङ्मुखः प्रणवार्थमनुसंदधद्दक्षिणे कर्णे प्रणवमुपदिश्य तदर्थं च पञ्चीकरणाद्यवबोध्य अयमात्मा ब्रह्म, तत्त्वमसि, प्रज्ञानं ब्रह्मेत्यादृयुपदिशेत् । तदर्थं च वदेत् । ततो नाम दद्यात् । ततः शिष्यस्तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन् देवान्साक्षिणः कृत्वा ॐभूर्भुवःस्वः संन्यस्तं मयेति त्रिरुपांशु त्रिरुच्चैस्त्रिरित्युच्चैश्चोक्त्वा जलसमीपं गत्वा स्नात्वा अभयं सर्वभूतेभ्यो मत्तः स्वाहेति त्रिरञ्जलिं क्षिप्त्वा "युवा सुवासाः" इति काषायं कौपीनं वासश्च परिधाय (१)सखे मा गोपायेति मुख्यं वैणवं पालाशं बैल्वमौदुम्बरं वा दण्डं गृह्णीयात् । अत्र पुत्रकामो गृहस्थः शङ्खेन पुरुषसूक्तेन दण्डमभिषिच्य दद्यादित्याचारः । ततः शिखामुत्पाट्य ॐभूःस्वाहेत्यग्नौ जले वा हुत्वा तथैवोपवीतं हुत्वा "येन देवाः पवित्रेण" इति जलपवित्रं, "यदस्य पारे" इति शिक्यम् , सावित्र्या कमण्डलुं, सप्तव्याहृतिभिर्भोजनपात्रमिदं विष्णुरित्यासनं बृसीं वा गृहीत्वा ॐभूस्तर्पयामीति व्यस्तसमस्ताभिर्महर्नम इति तर्पयित्वा ॐभूः स्वधों भुवः स्वधोंस्वः स्वधोंभूर्भुवःस्वर्महर्नमः स्वधेति पितॄंस्तर्पयित्वा "उदुत्यं" "चित्रम्" "तच्चक्षुः" "हंसःशुचिषद्" "नमो मित्रस्य" इति

(१) 'सखा' क० छ०

स्नात्वा सुरभिमतीभिरापोहिष्ठेति हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिश्च मार्जयित्वा अष्टोत्तरशतवारमघमर्षणं प्राणायामांश्च कृत्वा ॐभूर्भुवः स्वरिति च पठित्वा "नमःसवित्रे" इति सूर्यं चोपस्थाय पुनः स्नात्वा जङ्घे क्षालयित्वा ओमिति ब्रह्मोमितीदं सर्वमोमिति ब्रह्म वा एष ज्योतिर्य एष तपति वेद्यमेवैतद्य एष वेदो यदवनमस्तीति जपित्वा अष्टसहस्रं गायत्रीं जपेदिति ॥

अथ यतिधर्माः—प्रातरुत्थाय "ब्रह्मणस्पते" इति जपित्वा दण्डादीनि मृदं च निधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाऽऽचम्य पर्वद्वादशीवर्ज्यं प्रणवेन दन्तधावनं कृत्वा तेनैव मृदा बहिः कटिं प्रक्षाल्य जलतर्पणवर्ज्यं स्नात्वा पु(१)नर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनान्तं कृत्वा केशवादिनमोन्तनामभिस्तर्पयित्वा ॐभूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत्। ॐभूःस्वाहेति स्वाहाशब्दान्तैः स्वधाशब्दान्तैश्चैभिरेव पुनस्तर्पयेदिति केचित्। तत आचम्याञ्जलिना प्रणवेन जलमादाय व्याहृतिभिरुदधृत्य गायत्र्या त्रिःक्षिप्त्वा गायत्रीं जपेत्। उदिते सूर्ये प्रणवेन व्याहृतिभिर्वार्घ्यं त्रिर्दत्त्वा मित्रस्य चर्षणीत्याद्यैः पूर्वोक्तसौरीभिरिदं विष्णुस्त्रिर्देवो ब्रह्मजज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्तते। ततो नत्वा "आदित्याय विद्महे सहस्राच्चाय धीमहि। तन्नः सूर्यः प्रचोदयात्" इति त्रिर्जपेत्। एवं त्रिकालं विष्णुपूजां ब्रह्मयज्ञं च कुर्यात् ॥

---

(१) 'पुनः' नास्ति ग०

अथ भिक्षा ।

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
कालेऽपराह्णे भूयिष्ठे नित्यं भिक्षां यतिश्चरेत् ॥

इत्युक्ते काले उद्वयमिति चतसृभिरादित्यमुपस्थाय तेनैक्यं ध्यात्वा आकृष्णेनेति प्रदक्षिणं कृत्वा "येते पन्थानः" इति जप्त्वा—

योऽसौ विष्ण्वाख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः ।
सोऽहं नारायणो देव इति ध्यात्वा प्रणम्य तम् ।
त्रिदण्डं दक्षिणे त्वङ्गे ततः संधाय बाहुना ॥
पात्रं वामकरे क्षिप्त्वा श्लेषयेद्दक्षिणेन तु ।

इति बौधायनोक्तदिशा त्रीन्पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वां भिक्षां याचित्वा "पूर्णमसि पूर्णं मे भूयाः" इत्यागत्य शुचिरन्नं प्रोक्ष्य ॐभूःस्वधा नम इत्यादिव्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वा प्रणवेन षोडशप्राणायामान्कुर्यादिति संक्षेपः । गौतमव्याख्यायां भृगुः—

यतिहस्ते जलं दत्त्वा भैक्ष्यं दद्यात्पुनर्जलम् ।
भैक्ष्यं पर्वतमात्रं स्यात्तज्जलं सागरोपमम् ॥

अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयम् ।

कण्वः—

एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र, वर्षासु मासांस्तु चतुरो वसेत् ॥

जाबालश्रुतौ—"शून्यागारदेवगृहतृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनागिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः" इति । मात्स्ये—

अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।

अत्रिः—

भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् ।
कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥
मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च ।
दिवास्वापं च यानं च यतीनां पतनानि षट् ॥
आसनं पात्रलोभश्च संचयः शिष्यसंग्रहः ।
दिवास्वापो वृथाजल्पो यतेर्बन्धकराणि षट् ॥

दक्षः—

नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंचन ।
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ॥

मदनरत्ने अत्रिः—

पित्र्यर्थं कल्पितं पूर्वमन्नं देवादिकारणात् ।
वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा ॥

बृहस्पतिः—

न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः ।
न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् ॥

एतद्भेदार्थभिन्नपरम् । अत्रिः—

स्नानं सुरार्चनं ध्यानं प्राणायामो बलिः स्तुतिः ।
भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च ॥

एते यतिधर्मा इत्यर्थः । अन्येऽपि माधवमिताक्षरादौ ज्ञेयाः । यतिधर्मसमुच्चये—

न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते ।
पितृमातृक्षयं श्रुत्वा स्नात्वा शुद्ध्यति साम्बरः ॥

अथ यतिसंस्कारः स्मृत्यर्थसारे—

(१)संन्यसेद् ब्रह्मचर्याद्वा संन्यसेच्च गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाऽथ दुःखितः ॥
आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं च संन्यास आतुराणां विधीयते ॥
उत्पन्ने सङ्कटे घोरे चौरव्याघ्रादिगोचरे ।
भवभीतस्य संन्यासमङ्गिरा मनुरब्रवीत् ॥
"यद्यातुरः स्यान्मनसा वाचा वा संन्यसेद्विजः ॥"
इति जाबालश्रुतिः ।

आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र कारयेत् ॥
संन्यस्तोऽहमिति ब्रूयात्सवनेषु त्रिषु क्रमात् ।
त्रिवारं च त्रिलोकात्मा शुभाशुभसुधाद्रवे ॥
यत्किंचिद्बाधकं कर्म कृतमज्ञानतो मया ।
प्रमादालस्यदोषाद्यत्तत्संत्यक्तवानहम् ॥
एवं संत्यज्य भूतेभ्यो दद्यादभयदक्षिणाम् ।
पद्भ्यां कराभ्यां विहरन्नाहं वाक्कायमानसैः ॥
करिष्ये प्राणिनां हिंसां प्राणिनः सन्तु निर्भयाः ॥

इत्यातुरस्य स्वशक्त्याऽवस्थानुरूपमङ्गलभूतप्रैषोच्चारणादियथाशास्त्रं मनसा वाचा वा कुर्वतस्तावतैव कृच्छ्रचान्द्रायणनान्दीश्राद्धनखकृन्तनादीनि कृत्वा संन्यासपूर्तिरिति प्रतीयते । आङ्गिराः—

षष्टिः कुलान्यतीतानि षष्टीनामधिकानि च ।
कुलान्युद्धरते प्राज्ञः संन्यस्तामिति यो वदेत् ॥

---

(१) कंसान्तर्गतो भागो ग० पुस्तकं विहायान्यपुस्तकेषु नास्ति ।

विष्णुः—

एकरात्रोषितस्यापि यतेर्या गतिरुच्यते ।
न सा शक्या गृहस्थेन आतुरोऽपि च संन्यसेत् ॥
संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि ।
न तत्क्रतुशतैः पुण्यं प्राप्तुं शक्नोति मानवः ॥

मनुः—

यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥

अथ श्रौतातुरस्य विलम्बितस्य—

प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूजयेत् ॥ इति ।

अत्र मात्रत्वोपसम्भवादङ्गकलापाव्यापकत्वेनाप्युपपत्तौ कर्तुर्यागत्यागकलापव्यावृत्तस्यैकत्वानुपपत्तेः कृच्छ्रनान्दीश्राद्धविरजाहोमादिकर्तुमशक्तस्यातुरस्य विद्यमानाग्नेरिष्टदेवतायै पूर्णाहुतिं हुत्वा असौ स्वर्गाय लोकाय स्वाहेति आहवनीये दारुमयानि पात्राणि प्रज्वाल्य मृन्मयान्यप्सु प्रक्षिप्य समाप्तिं च मरुत इत्युपस्थाय याते अग्ने इत्यनेन हस्तं प्रताप्य आत्मन्यग्निं समारोप्य सर्वप्रायश्चित्तपूर्वकं सप्तपञ्चकेशान् विसृज्य वापयित्वा यथाविधि स्नात्वा आतुरसंन्यासं कुर्यात् ॥

अथातुरसन्यासविधिः। अपां समीपे गत्वा तिथ्याः स्मरणपूर्वकं स्नानसन्ध्यावन्दनादि कृत्वा देशकालौ सङ्कीर्त्य ममाशेषदुःखनिवृत्तिनिरतिशयानन्दप्राप्तिपरमपुरुषार्थप्राप्तये च परमहंससंन्यासं करोमीति सङ्कल्पयेत् । तत्र प्रधानानि प्रेषोच्चारप्रणवोपदेशमहावाक्यानि । ततः संन्यासोचितं क्षौरं कृत्वा पूर्ववत्सप्तपञ्चकेशान् विसृज्य स्नात्वाचम्य पात्रेण तोयमादाय उपस्पृ-

ऋय दक्षिणेन पाणिनाऽप्सु जुहोति । एष वोग्नेर्योनिर्यः प्राणं गच्छ स्वाहा इति प्रथमाहुतिः । आपो वै सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोमि स्वाहा इति द्वितीया । ततो हुतशेषम् आशुःशिशान इत्यनुवाकेनाभिमन्त्र्य पुत्रेषणा वित्तेषणा लोकेषणा मया त्यक्ता स्वाहेति प्रथमां पिबेत् । ॐ ॐभूर्भुवः स्वरोम् मया संन्यस्तं स्वाहेति द्वितीयां पिबेत् । अभयं सर्वभूतेभ्यो मत्तः स्वाहेति तृतीयां पिबेत् । ततोऽन्यत्तोयमञ्जलिपूर्णमादाय प्रागादिदिक्षु प्रत्येकं निनयेत् ॐभूः सावित्रीं प्रवेशयामि, ॐभुवः सावित्रीं प्रवेशयामि, ॐस्वः सावित्रीं प्रवेशयामि, ॐभूर्भुवः स्वः सावित्रीं प्रवेशयामि इति सावित्रीप्रवेशं कृत्वा अथोर्ध्वबाहुः सूर्याभिमुखो भूत्वा ॐभूः संन्यस्तं मया, ॐभुवः संन्यस्तं मया, ॐस्वः संन्यस्तं मया, ॐभूर्भुवःस्वः संन्यस्तं मयेति प्रैषोच्चारं ब्रूयात् । एवं मन्द्रमध्योच्चैस्त्रिरुक्त्वा तूष्णीं शिखां निकृत्य स्नात्वाचम्य यज्ञोपवीतमुद्धृत्याञ्जलिना गृहीत्वा भूःस्वाहेति अप्सु हुत्वा दिगम्बरो भूत्वा पुत्रेषणावित्तेषणालोकेषणातो मुक्तोऽहमिति ब्रूयात् । अत ऊर्ध्वं न पुत्रगृहं गच्छेत् । मृते च पुरुषसूक्तेन विष्णुबुद्ध्याऽभिषिञ्चति संस्कारमेव कुर्यात् । एवं विरक्तस्यातुरस्य स्वस्थस्य संन्यासविहिताङ्गेषु यन्मन्त्रानुष्ठाने शक्तिर्यथाविधिस्तदनुष्ठानपूर्वकं प्रधानं प्रैषोच्चारणमात्रं मत्वा संन्यासयुक्तिरिति श्रवणात् । तदुत्तरकालमेव मृतस्योपदेशविकलस्यापि खननसंस्कारमेव कुर्यात् । जीवतश्चेच्छिखां यज्ञोपवीतं च नित्यक्रियाविधिवद्विसृज्य दण्डकाषायवस्त्रादीनि चाऽऽदाय यतिधर्मानेवानुतिष्ठेत् । सद्गुरुमन्विष्य तदुपदेशं गृ-

हीत्वा स्वधर्मनिष्ठो भवेत् । अयमर्थो विद्वत्संम्मतः प्रयोक्तव्यः । इत्यातुरसंन्यासः) ।

सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च ।
न तस्य दहनं कार्यं नाशौचं नोदकक्रिया ॥

तथा—

कुटीचकं तु प्रदहेत्पूरयेत्तु बहूदकम् ।
हंसो जले तु निक्षेप्यः परहंसं (१)प्रपूरयेत् ॥

पालाशमूले नदीतीरेऽन्यत्र वा गन्धपुष्पालङ्कृतं शवं वाद्यघोषेण नीत्वा दण्डमात्रं व्याहृतिभिः खात्वा सप्तव्याहृतिभिस्त्रिः प्रोक्ष्य दर्भानास्तीर्य नवघटे पञ्चरत्नोदकं क्षिप्त्वा नारायणः परं ब्रह्मेत्यभिमन्त्र्य तेनैव संस्नाप्याष्टाक्षरेण वस्त्रगन्धपुष्पधूपदीपान् दत्त्वा विष्णो हव्यं रक्षस्वेति शवं गर्ते निधाय "इदं विष्णुः" इति दक्षिणहस्ते दण्डं "यदस्य पारे" इति सव्ये शिक्यं "येन देवाः पवित्रेण" इति मुखे जलपवित्रं सावित्र्योदरे (२)भिक्षापात्रं "भूमिः इवभ्रे" इति गुह्ये कमण्डलुं निधाय "चित्तिः स्रुक्" इति दशहोत्राभिर्मन्त्रयेदिति विद्वादर्शटीकायां स्मृत्यर्थसारे च । बृहच्छौनकस्तु—

यतिं पुरुषसूक्तेन स्नापयित्वाऽवटं ततः ।
प्रणवेनाष्टवारं तं प्रोक्षयेदथ सर्वतः ॥
विष्णो हव्यं रक्षस्वेति यजुषा प्रणवेन च ।
गर्ते प्रेतं विनिक्षिप्य चेदं विष्णुर्विचक्रमे ॥
इति मन्त्रेण दण्डं तु दद्याद्दक्षिणहस्तके ।
मूर्धानं भूर्भुवः स्वश्चेत्युक्त्वा शङ्खेन भेदयेत् ॥
गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् ।
सृगालश्वादिरक्षार्थं सम्यग्गर्तं प्रपूरयेत् ॥ इति ।

(१) 'प्रपूजयेत्' क० छ० । (२) 'भिक्षा' नास्ति ग० ।

कुटीचकस्य तु दाहः कार्यः । यथा सर्वं प्राग्वत्कृत्वाऽग्निं प्रज्वाल्य साग्नेर्दक्षिणकरे उपावरोहेत्यवरोह्य निर्मथ्य वा गर्ते चितिं कृत्वा "अग्निनाग्निः समिध्यते" इत्यग्निं दत्त्वा सावित्र्या प्रणवेन वा दहेत् । ततोऽष्टशतं प्रणवं नारायणः परं ब्रह्मेति जप्त्वा सशिरःप्रणवव्याहृत्या गायत्र्या तद्भस्मास्थीनि तीर्थे क्षिप्त्वा स्नानाच्छुचिः । नास्यान्यदौर्ध्वदेहिकम्,

त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ।

इति उशनःस्मृतेः । एकादशेऽह्नि पार्वणं तदपि त्रिदण्डिनः । हंसपरमहंसादीनां पार्वणादिकमपि न कार्यम्, इति शूलपाणिः । श्राद्धचिन्तामणौ दत्तात्रेयः—

एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् ।
न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे ॥

प्रेतक्रिययैकोद्दिष्टनिषेधे सिद्धे पुनस्तद्ग्रहणमाद्दिकपरम् । तेन तत्पार्वणमेव । त्रिदण्डिनां द्वादशे नारायणबलिः । तद्विधिरन्यश्च विशेषः प्रागुक्त इत्यलं बहुना ॥

एवं निरूपितामिदं गहनं तु धर्म-
तत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेचनीयं
विद्वद्भिरित्यविरतं प्रणतोऽस्मि तेषु ॥ १ ॥
मया सद्वाऽसद्वा यदिह गदितं मन्दमतिना
किमेतच्छक्यं वाऽऽध्यवसितुमपि स्वल्पमतिना ।
तदेवं यत्किंचिद्वादितामिह विख्यातमहिमा
प्रतापोऽयं सर्वो विकसति तु पित्रोश्चरणयोः ॥ २ ॥
यो भाट्टतन्त्रगणनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।

योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽसुनाऽस्तु सुकृती बुधरामकृष्णः ॥ ३ ॥
श्रीभट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसुनोः ।
श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबन्धं कमलाकराख्यः ॥ ४ ॥

नानानिर्णयवत्त्वान्निर्णयसिन्धुः प्रोच्यतां विबुधाः ।
निर्णयसरोजवत्त्वान्निर्णयकमलाकरोऽप्यस्तु ॥ ५ ॥
वसुऋतुऋतुभूमिते १६३८ गतेऽब्दे
नरपतिविक्रमतोऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितोऽयं
रघुपतिपादसरोरुहेऽर्पितश्च ॥ ६ ॥
जगति सकलविद्यासिन्धुमुष्टिंधयानां
परभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
यदि भवति विदग्धैस्तद्ध्रुवश्यं विमृश्यम् ॥ ७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायण भट्टसुतविद्वन्मुकुटहीराङ्कुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ तृतीयः परिच्छेदः ॥



इस कार्यालय द्वारा इस सूचीपत्र के अलावा ४ संस्कृत ग्रन्थमालायें यथा "चौखम्बासंस्कृतसीरिज़" "काशीसंस्कृतसीरिज़" "बनारससंस्कृतसीरिज़" तथा "हरिदाससंस्कृतसीरिज़" ग्रन्थमालायें भी निकलती हैं, सूचीपत्र पृथक् मंगवाकर देखने की कृपा करें। इन सब सूचीपत्रों में छपे ग्रन्थों के अलावा भारतवर्ष के सभी प्रकाशकों के प्रकाशित ग्रन्थ भी विक्रयार्थ प्रस्तुत रहते हैं, इसके अलावा इस प्रेस द्वारा सर्व प्रकार की संस्कृत, हिन्दी, अंग्रेजी की सुन्दर छपाई होती है, परीक्षा प्रार्थनीय है।

पत्रादि प्रेषणस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बासंस्कृतसीरिज़ आफिस, विद्याविलासप्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी।